சிவரகசியம்

அம்சம் - 9

PART - II

தஞ்சாவூர் மகாராஜா சரபோஜியின்
சரசுவதி மகால் நூலகம்
தஞ்சாவூர்.

தஞ்சாவூர் சரசுவதி மகால் வெளியீட்டு எண். : 511

ஸ்ரீ:

॥ शिवरहस्यम् ॥

சிவரஹஸ்யம்

(ஒன்பதாவது அம்சம்)

PART-II

பதிப்பாசிரியர்

தேதியூர். எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்,
முன்னாள் மேநிலை ஸம்ஸ்கிருத பண்டிட்,
சரசுவதி மகால் நூலகம், தஞ்சாவூர்.

தஞ்சாவூர் மகாராஜா சரபோஜியின்
சரசுவதி மகால் நூலகம்,
தஞ்சாவூர்

2008

சிவரகசியம் அம்சம்-9 தொகுதி-2

0511

T.M.S.S.M-2016

விலை : ரூ. 130-00

நூற்பதிப்பு விளக்கக் குறிப்பு

நூற்பெயர்	:	சிவரஹஸ்யம் (ஒன்பதாம் அம்சம் - PART-II)
பதிப்பாசிரியர்	:	எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்
வெளியிடுபவர்	:	இயக்குநர், சரசுவதி மகால் நூலகம்
வெளியீட்டு எண்	:	511
மொழி	:	ஸம்ஸ்கிருதம்
பதிப்பு	:	முதற்பதிப்பு
வெளியீட்டு நாள்	:	பிப்ரவரி, 2008
தாள்	:	TNPL 18.6 kgs.
நூல் அளவு	:	21 x 14 c.m.
பக்கங்கள்	:	212
படிகள்	:	250
எழுத்து	:	16 & 12
அச்சிட்டோர்	:	சரசுவதி மகால் நூலகம்
புத்தகக்கட்டு	:	மெலிந்த அட்டை
பொருள்	:	சிவ தத்துவம்
விலை	:	ரூ. 130-00

வெளியீட்டாளர் முகவுரை

தஞ்சையில் அமைந்து தரணி முழுமைக்கும் பயன்பட்டுக் கொண்டிருக்கும் அரும்பெரும் நிறுவனம் சரசுவதி மகால் நூலகமாகும். சுவடிக் கருவூலமாகவும், பன்மொழி நூற்களஞ்சியமாகவும், பன்மொழி ஆய்வு மையமாகவும் திகழும் சரசுவதி மகால் நூலகம் ஆற்றிவரும் தொண்டு அளப்பரியது.

இந்நூலகம் தமிழகத்தினர் மட்டுமின்றிப் பிற மாநிலத்தவரும், பிற நாட்டினரும் பயன்படுத்தி வருகின்ற ஓர் அரிய ஞான ஆலயமாகும். பாரதநாடு பழம்பெரும் நாடு. உலகின் மிகச்சிறந்த நாகரிகத்திற்கும், பண்பாட்டிற்கும், மொழி வளத்திற்கும், இலக்கிய, இலக்கண மேம்பாட்டிற்கும், இயல், இசை, நாடகம், சித்திரம், சிற்பம், கட்டிடம் போன்ற நுண் கலைகளுக்கும் மெச்சும் அறிவிற்கும் மேதினியினில் உயர்நாடு.மதச்சார்பின்மை, சமயச் சுதந்திரம் போன்றவற்றால் வேற்றுமையில் ஒற்றுமை காணும் ஒரு நாடு நம்நாடு. இமய முதல் குமரிவரை சைவநெறி தழைத்து பரவியது எனினும் தமிழகத்தில் சைவ ஒளி பரவி நாயன்மார்கள், தோன்றி சைவநெறி வளர்த்தனர். சைவநெறி அன்பு, அறம், விருந்தோம்பல், பணிவு போன்ற வாழ்வியல் நெறிகளைக் கூறுவது.

பதினெண் புராணங்களில் ஒன்றான ஸ்கந்த புராணத்தில் சிவரகசியம் எனும் பகுதியில் சிவ தத்துவங்களும், சைவ சமயச் சிறப்புகளும் கூறப்படுகின்றன. இதேபோன்று சமஸ்கிருத மொழியில் அமைந்த சிவரகசியம் நூலும் சிவ தத்துவம் பற்றிக் கூறுவதாகும். இதன் ஆசிரியர் பெயர் அறியக் கிடைத்திலது. ஒரு இலச்சத்து இருபதினாயிரம் சுலோகங்கள் கொண்ட இந்நூல் நம் சரசுவதி மகால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைத்துள்ளது. சிவபெருமானின் பன்னிரண்டு பெயர்களைக் கொண்டு பன்னிரண்டு அம்சங்களாக (பகுதிகளாக) பகுக்கப்பட்டுள்ளது இந்நூல். இந்நூலின் ஒவ்வொரு பகுதியிலும் இலக்கியச் செறிவோடு சிவ தத்துவங்கள் கூறப்படுகின்றன.

1971ஆம் ஆண்டில் நமது நூலகம் திரு. சுவாமிநாத ஆத்ரேயர் எனும் சமஸ்கிருத அறிஞரைப் பதிப்பாசிரியராகக் கொண்டு 3, 4, 5, 6 அம்சங்களைப் பதிப்பித்து வெளியிட்டது. இந்நூலக முன்னாள்

சமஸ்கிருதப் பண்டிட் திரு. எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள் அவர்களைப் பதிப்பாசிரியராகக் கொண்டு 1992ல் முதல் அம்சமும், 1996ல் 7வது அம்சத்தில் முதல் தொகுதியும், 2006ல் 2வது அம்சமும், பின்னர் எஞ்சிய மூன்று தொகுதிகளும் எட்டாவது அம்சமும் வெளியிடப்பட்டுள்ளன. தற்போது இதே பண்டிட்டைப் பதிப்பாசிரியராகக் கொண்டு ஒன்பதாவது அம்சம் வெளியிடப் படுகிறது.

இப்பொழுது வெளியிடப்படும் இந்த ஒன்பதாவது அம்சம் இரு பகுதிகளாக வெளியிடப்படுகின்றன. இந்த ஒன்பதாவது அம்சத்தில் கந்தப்பெருமான் ஜைகீஷவ்ய முனிவர் உள்பட பல முனிவர்களுக்குச் சிவ தத்துவ ரகசியக் கருத்துக்களை கூறுவதும், திருவாரூரின் சிறப்பினைக் கூறும்முகமாக கமலாம்பிகை சிவபெருமானைக் குறித்துத்தவம் செய்தமை பற்றியும், திருநீலகண்டர், கண்ணப்பர் சிவபக்தியும், திருநாவுக்கரசர், திருஞானசம்பந்தர், அப்பூதியடிகள் முதலான சைவ சமயக்குரவர்களின் வரலாறுகள் பற்றியும், சில விரிவாகவும் சில சுருக்கமாகவும் கூறப்பட்டுள்ளது பாராட்டும் வகையில் அமைந்துள்ளன.

இந்நூல் வெளிவர நிதி உதவி நல்கிய நடுவண் அரசுக்கும், நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும், இந்நூல் கணினி அச்சில் வெளிவர, கணினி பிரிவில் பணிபுரிந்த ஏனையோருக்கும் என் பாராட்டுதல்களைத் தெரிவித்துக்கொள்கிறேன்.

சா. விஜயராஜ் குமார், இ. ஆ. ப.
மாவட்ட ஆட்சித்தலைவர்
மற்றும் இயக்குநர்,
சரசுவதி மகால் நூலகம்.

தஞ்சாவூர்
7 -2-08

உ

சிவமயம்

முன்னுரை

உலகின் பிற நாடுகளில் நாகரிகமும், நெறிமுறைகளும் மலராமல் அறியாமை இருள்சூழ்ந்திருந்த காலத்திலும் **கர்மபூமி** எனப்படும் பாரதநாடு - முதிர்ந்த நாகரிகச் சிறப்புடனும், பண்பாடு, நெறிமுறை, மொழியறிவு, இலக்கிய அறிவு, இயல், இசை, நாடகம், சித்திரம், சிற்பம், கட்டிட வடிவமைப்புத்திறன் போன்ற கலையறிவு - இறையுணர்வு இன்னபிறச் சிறப்புக்களுடனும் சிறப்புற்றிருந்தது என்பது யாவரும் அறிந்ததே.

வேத நெறிகளிலும், இறை வழிபாட்டிலும், உலகின் பிற நாடுகளுக்கு காலங்காலமாகவே நம்நாடு வழிகாட்டியாக இருந்துவந்திருக்கிறது. நம் நாட்டில் உள்ளதுபோன்ற - விரிவான - நுட்பமான சமயச் சுதந்திரம் உலகில் வேறு எந்த சமயத்திலும் இல்லை. பாரதத்தில் இமயம் முதல் குமரிவரை சைவநெறி பரந்துள்ளதெனினும் தென்னாட்டில் அதுவும் தமிழகத்தில் சைவநெறி தழைத்ததுபோல் வேறெங்கிலும் சிறப்புடன் விளங்கவில்லை எனலாம். 'தென்னாடுடை சிவனே போற்றி' என்ற வழக்கும் இதனை உறுதிசெய்கின்றது. சைவம் வளர்த்த அறுபத்துமூன்று சமயக்குரவர்கள் தோன்றிய தமிழகத்தில்தான் சைவ ஆகமங்களும் - அவ்வழிவந்த பூசை முறைகளும் இன்றளவும் தழைத்து விளங்குவதாகும். சைவ சமயச் சிறப்புப்பற்றி சிவாகமங்களும், சிவபுராணம், கந்தபுராணம், திருமுறைகள் முதலானவை எழுதாக்கிளவி எனப்படும் வேதங்கள்போல் உலகுள்ளளவும் நிலைத்திருப்பவையாகும்.

சைவ சமயச் சிறப்புப்பற்றி பதினெட்டுப் புராணங்களில் ஒன்றான ஸ்கந்த புராணத்தில் **சிவரஹஸ்யம்** என்ற பகுதி விரிவாகக் கூறுவதாகும். இதேபோன்று ஸம்ஸ்க்ருத மொழியில் அமையப்பெற்ற சிவரஹஸ்யம் எனும் மாபெரும் தனி நூலும் சிவ தத்துவம்பற்றி விரிவாகக் கூறுவதாகும். இதன் ஆசிரியர் யார் என்று நூலில் எவ்விடத்திலும் கூறப்படவில்லை.

ஒரு லக்ஷம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட மாபெரும் இதிஹாஸமான மஹாபாரதம் பற்றிய ஒரு பழமொழி உண்டு. இந்த நூலில் கூறப்படும் தர்ம தத்துவங்கள், ரஹஸ்யங்கள் பலவும் பிறநூல்களில் காணப்படலாம். ஆனால் இதில் (மஹாபாரதத்தில்) காணப்படாத (கூறப்படாத) தர்ம ரஹஸ்யம் எதுவும் பிற நூல்களில் இருப்பதற்கில்லை என்ற கருத்துள்ள,

"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"

எனும் வாக்கின்படி இந்த நூல் முழுவதிலும் சைவநெறி சம்பந்தமான உயர்ந்த கருத்துக்கள் பலவும் சிறப்பாகக் கூறப்பட்டுள்ளன. ஒரு லக்ஷத்தி இருபதினாயிரம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட இந்நூல் நமது சரசுவதி மகால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைக்கக்கூடியதாகும்.

சிவபெருமானின் பன்னிரண்டு பெயர்களைக்கொண்டு பன்னிரண்டு அம்சங்களாக (பகுதிகளாக) இந்நூல் பிரிக்கப்பட்டுள்ளது. 1. மாஹேச்வர, 2. பவ, 3. ஹர, 4. சிவ, 5. பர்க, 6. சங்கர, 7. உக்ர, 8. பீம, 9. சதாசிவ, 10. ஈச்வர, 11. மஹாதேவ, 12. ஈச என்ற பெயர்களுடன் 12 பகுதிகளாக உள்ள இந்த நூலின் ஒவ்வொரு பகுதியிலும் சிவதத்துவங்கள் மிக அழகிய பலவித சந்தங்களுடன் - இலக்கிய நயம், சொல் நயமுடனும் விளங்கும் ஸம்ஸ்க்ருத ச்லோகங்களால் விளக்கப் படுகின்றன.

இந்த நூல் முதல் இரண்டு பாகங்கள் (மாஹேச்வர பவ எனும் அம்சங்கள்) மட்டும் 1913-ம் ஆண்டில் சென்னையைச் சேர்ந்த செல்வந்தரும், சிவநெறிச் செம்மலுமாக விளங்கிய சதாசிவ செட்டியார் என்ற அன்பரால் வெளியிடப்பட்டுள்ளன. அவைகளும் இந்நாட்களில் கிடைப்பதற்கு அரிதாகவுள்ளன.

கடந்த 1971-ம் ஆண்டில் நமது நூலகத்தில் அச்சிட்டு வெளியிடப்பட்ட 3, 4, 5, 6 அம்சங்கள் தஞ்சை ஸ்ரீஸ்வாமிநாத ஆத்ரேயர் எனும் ஸம்ஸ்க்ருத பேராசிரியர் அவர்களால் சிறந்த முறையில் பதிப்பிக்கப்பட்டுள்ளன.

மீதமுள்ள பகுதிகளை (7 முதல் 12 முடியவுள்ளவை)ப் பதிப்பிக்கும் பணி 1991-ல் முன்னாள் மாவட்ட ஆட்சியரும், நூலக இயக்குநருமான திரு. சண்முகராஜேச்வரன், இ. ஆ. ப., அவர்களால் எனக்களிக்கப்பட்டது. பிழைகளைத் திருத்தம் செய்து பதிப்பிக்கும் பணி அதுமுதல் இரண்டு ஆண்டுகளில் முடிக்கப்பட்டது.

முதல் அம்சத்தில் - சிவபெருமானைக் குறித்துக் கடும் தவம்செய்த **ஜைகீஷவ்ய முனிவர்** சிவனருள்பெற்று கந்தப் பெருமானை சேவித்தல், சிவநெறிகள்பற்றி பார்வதிதேவியிடம் சிவபெருமான் அருளிச்செய்ததை உடனிருந்து செவியுற்ற கந்தப்பெருமானிடம் சிவதத்துவம்பற்றி விரிவாகக் கூறும்படி ஜைகீஷவ்யர் வேண்டுதல் - நந்திகேச்வரர், ப்ருங்கி முதலான சிவகணத்தைச் சேர்ந்தோரும் திருமால் முதலான தேவர்களும் முனிவர்களும் அடங்கிய அவையில் கந்தப்பெருமான் சிவரஹஸ்யக் கருத்துக்களைக் கூறுதல், ஸத்யோஜாதம் - வாமதேவம், அகோரம் - தத்புருஷன், ஈசானன் எனும் பஞ்சப்ரம்மங்கள் செய்த சிவஸ்துதி - கைலாய வருணனை முதலான கருத்துக்களும்,

இரண்டாம் அம்சத்தில் - பார்வதிதேவி தவமியற்றுதல், சிவபெருமான் அருள்புரிதல், சிவகைலாயம் போன்று பராசக்திக்கென ***சிந்தாமணி த்வீபம்*** அமைத்தல், பராசக்தியின்

தனி வாசஸ்தலமாக அமைக்கப்பட்ட சிந்தாமணி த்வீப வருணனை, துர்வாஸ முனிவரின் தவம், சக்தி தத்துவ விளக்கம் ஆகியவையும்,

மூன்றாவது அம்சத்தில் - காயத்ரீயின் தவம், சிவ வழிபாட்டின் சிறப்பு, மேரு மலையின் சிறப்பு, வில்வமரத்தின் பெருமை, சிவபூஜை மகிமை பற்றியும்,

நான்காவது அம்சத்தில் - நந்திகேச்வரர், சண்டேசப் பெருமான், ப்ருங்கி, மார்க்கண்டேயர், அகஸ்தியர் முதலானோருக்கு சிவபெருமான் அருள்புரிதல்.

ஐந்தாவது அம்சத்தில் - கேதாரேச்வர, ஓங்காரேச்வர, வைத்தியநாதம், குஸ்ருணேச்வர, நாகநாத, மஹாகால, பீம, த்ரியம்பகேச்வர, விச்வநாத, ஸ்ரீசைல, கோகர்ண, ராமேச்வர எனும் தலங்களில் உள்ள பன்னிரண்டு ஜோதிர்லிங்க வருணனைகளும்,

ஆறாவது அம்சத்தில் - மஹாபாரதத்தில் பகவத்கீதை போன்று வேதாந்த உபநிடதக் கருத்துக்களடங்கிய ருபு கீதையும் கூறப்பட்டுள்ளன.

ஏழாவது அம்சத்தில் - சிவஸஹஸ்ர நாமத்தின் சிறப்பு காசித்தலச்சிறப்பு, புஷ்பதந்தன் எனும் கந்தர்வன் சிவெபருமானைக் குறித்துக் கடுந்தவம் செய்தது, அவர் இயற்றிய "**சிவமஹிம்ன ஸ்தோத்ரம்**" எனும் துதிச்சிறப்பு, சிவபூஜை செய்யும்முறை, காளஹஸ்தித் தலச்சிறப்பு, வேடன் (கண்ணப்பன்) செய்த விநோதமான சிவபூஜையால் அவன் சிறப்புற்றது, சிவாலயத்தில் பிரதக்ஷிணம் செய்யும்முறை, குளிர் காலத்தில் சிவலிங்கத்திற்கு உறைந்த நெய் கொண்டு போர்வைபோல் மூடிவைத்து வழிபடும் 'க்ருதகம்பள' வழிபாடுபற்றி, கும்பகோணம், திருவிடைமருதூர் தலச்சிறப்பு, காசி தலத்தில் கடினமான பஞ்சக்ரோச யாத்திரையின் சிறப்பு கூறப்பட்டுள்ளது.

எட்டாவது அம்சத்தில் - கந்தப் பெருமான் ஜைகீஷவ்ய முனிவருக்கும் பிற முனிவர்களுக்கும் சிவதத்துவக் கருத்துக்களைக் கூறும் முகமாக.

கச்யப முனிவருக்கு இரு மனைவியர். ஒருவர் விநதா. மற்றவர் கத்ரு. விநதா அருணனுக்கும் கருடனுக்கும் தாய். கத்ரு நாகங்களின் தாய். கத்ரு பொறாமையால் தமது பிள்ளைகளின் துணை கொண்டு வஞ்சகமாக விநதாவைத் தனக்கு அடிமையாக்கிக் கொள்கிறாள். கருடன் தன் தாயின் அடிமைத்தனத்தை விலக்கிக்கொள்ள - தேவருலகிலிருந்து அமுத கலசத்தைக் கொண்டுவந்து கொடுக்கவேண்டும் என்று கத்ரு கேட்க, கருடன் அதனை ஏற்று கடும் சிவவழிபாட்டின் பயனாக பெரும் போருக்குப் பின் அமுத கலசத்தைக் கொண்டுவந்து கொடுத்து தாயை அடிமைத்தனத்திலிருந்து விடுவிக்கிறான்.

அமுத கலசத்தை இழந்த தேவர்கள் கருடனின் பலத்தை அறிந்து பயந்து திருமாலின் துணையுடன் நயமாகப் பேசி கருடனிடமிருந்து அமுத கலசத்தைப் பெற முயன்றபோது திருமால் கருடனைப் புகழ்ந்து பேசி வேண்டிய வரம் கேள் என்று கூற, "நீங்கள்சிவபெருமானை வழிபட்டு சுதர்சன சக்கரத்தைப் பெற்றவர். சுதந்திர சக்தியற்றவர். எனக்கு வரம் தருவதா! நான் உங்களுக்கு வரம் தருகிறேன் கேளுங்கள் என்று கூற. அமுத கலசத்தைக்கொடு என்று திருமால் கேட்க. கருடன் சொல் தவறாமல் அமுத கலசத்தைக் கொடுத்த வரலாறு பல அத்தியாயங்களில் கூறப்பட்டுள்ளதோடு.

விபூதி (திருநீறு), ருத்ராக்ஷ மகிமை - தக்ஷகன் ஆதிசேஷன் முதலான அரவங்கள் பாதாள உலகில் உள்ள ஹாடகேசலிங்க வழிபாடு செய்தல் - அஷ்டதிக்கஜங்களும் சிவவழிபாடு செய்தது பற்றியும் கூறப்படுகிறது.

இப்பொழுது வெளியிடப்படும் இந்த ஒன்பதாவது அம்சத்தில் உள்ள 65 அத்தியாயங்களில் - கந்தப்பெருமான் - ஜைகீஷவ்ய முனிவருக்கும் பிற முனிவர்களுக்கும்

சிவரஹஸ்ய நாமாக்களை உபதேசித்து – கிருத யுகம், த்ரேதா யுகம், துவாபர யுகம் ஆகிய யுகங்களில் ஓரளவு தர்மம் நிலைத்து இருந்தமையால் சிவபக்தி – சிவவழிபாடு நடைபெற வில்லையென்றும், கலியுகத்தில் அதர்மம் மேலிட்டு தீமைகள் தீய செயல்கள் மிகுந்து வேதநெறி முற்றிலும் இல்லாத நிலையில் சிவபெருமானே "சங்கரர்" என்ற பெயரில் கேரளத்தில் "காலடி"யில் அவதரித்து நான்கு சீடர்களுடன் அத்வைத நெறியை நிலைப்படுத்துவது பற்றியும், ஹரதத்தர் என்ற சிவாசாரியரின் சிறப்புகளைப் பற்றியும்,

சுந்தரன் எனும் பூத கணம் காமவயப்பட்டு கைலாயத்தில் "கமலினீ"யெனும் பார்வதிதேவியின் தோழியை விரும்பிய செய்தியறிந்த சிவனார், சுந்தர ! நீ பூவுலகில் சுகபோகங்களில் ஈடுபட்டும், எம்மைப் பல தலங்களில் சென்று வழிபட்டும் இருக்கும் சமயம் கமலினியும் பூவுலகில் தோன்றுவாள். யாம் உரிய நேரத்தில் உங்கள் இருவரின் திருமணத்தையும் நடத்தி வைப்போம் என்று கூற, அந்த பூத கணம் சுந்தரமூர்த்தி சுவாமிகளாகத் தோன்ற, கமலினியும் திருவாரூரில் அழகிய மங்கையாகப் பிறந்து வளரும்போது சிவபெருமான் அவர்களுக்குத் திருமணம் செய்து வைத்தமை பற்றியும்,

திருவாரூரின் சிறப்பினைக்கூறும்முகமாக கமலாம்பிகை சிவபெருமானைக் குறித்துத் தவம் செய்தமை பற்றியும், திருநீலகண்டர் – வேடன் (கண்ணப்பன்) சிவபக்தி பற்றியும், திருநாவுக்கரசர் (வாகீசர்), திருஞானசம்பந்தர், அப்பூதியடிகள் முதலான சைவ சமயக்குரவர்களின் வரலாறுகள் பற்றியும் சில விரிவாகவும், பல சுருக்கமாகவும் கூறப்படுகிறது.

இந்த ஒன்பதாவது அம்சத்திலும் சொற்பிழைகள் இலக்கணப்பிழைகள் இல்லாமல் இல்லை. ஆனால், அருமையான யதுகை மோனையுடன் செய்யுட்களை அமைத்துள்ள ஆசிரியரின் ஆற்றலைப் போற்றாமல் இயலாது.

இவ்வரிய நூலை அச்சிட்டு வெளியிட அனுமதி வழங்கிய தஞ்சை மாவட்ட ஆட்சித்தலைவர் மற்றும் நூலக இயக்குநர் உயர்திரு. சா. விஜயராஜ் குமார், இ. ஆ. ப., அவர்களுக்கு என் உளம்நிறைந்த நன்றியைத் தெரிவித்துக் கொள்கிறேன். நூலக நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும் என் உளமார்ந்த நன்றியினைத் தெரிவித்துக்கொள்கிறேன்.

சென்னை
23-6-2007

தேதியூர். S. கிருஷ்ணமூர்த்தி சாஸ்திரிகள்

।। शिवाय नमः ।।

।। शिवरहस्यम् ।।

।। नवमांशम् ।।

।। चतुस्त्रिंशोऽध्यायः ।।

स्कन्द उवाच -

ततः प्रातः समुत्थाय सवयोभिः समं घनः ।
मृगयावेषमादातुं धनुःशालामुपागमत् ।। १ ।।

केशान् पल्लवसुस्निग्धानुत्तरङ्गितकुञ्चितान् ।
व्यायतान्ग्रथितांश्चक्रे ग्रथितैः पिच्छपल्लवैः ।। २ ।।

सौरभ्यभ्रान्तभृङ्गौघबाणकुन्दादिमाल्यभृत् ।
मूलान्तपिञ्छामूलोद्यद् गुञ्जारोमगुणोज्जवलः[1] ।। ३ ।।

गजदन्तकृताटङ्को वराटानद्धकन्धरः ।
वराहदंष्ट्रेभदन्तमणिस्त्रग्भिरलङ्कृतः ।। ४ ।।

महाशार्दूललाङ्गुलहस्ततालविराजितः ।
ज्याघातसहगोधाङ्ककराप्तमणिकङ्कणः ।।

सुतैलधौतसम्बद्ध क्षुरिकाविलसत्कटिः ।
व्याधैकवीरकटकश्लक्ष्णोपानत्पदद्वयः ।। ६ ।।

चापं प्रदक्षिणीकृत्य प्रणम्यादाय पाणिना ।
ज्यामारोप्य परामृश्य टङ्कारेणाप्यधोषयत् ।। ७ ।।

---

1. मुक्तान्तपिञ्छामूलोद्यद् गुञ्जारोमगुणोज्ज्वलः ।

बद्ध्वेषुधिं शरैः पूर्णं चापमायम्य पाणिना ।
बिभ्रदन्येन च शरमङ्गुलीरन्ध्रचारिणम् ।। ८ ।।

गृहाङ्गणे डिण्डिमानि प्रावाद्यन्मृगधारणे ।
तस्थौ सुदृप्ततरुणपुङ्गवप्रतिमो घनः ।। ९ ।।

तावद्देवार्चनकरी मधुमांसफलादिकम् ।
निवेद्य वनदेवीभ्यस्तं तं प्राप मृगयोन्मुखम् ।। १० ।।

सुरामांसादिकं तस्मै ददौ देवप्रसादजम् ।
उवाच तमसम्भ्रान्ता कुमारं जरती तदा ।। ११ ।।

पितुः पितामहस्यापि नास्ति त्वद्वैभवं सुत ।
दया तादृग्देवतानां दृष्टा यादृक्त्वयि प्रभो ।। १२ ।।

तां तदा जरतीं नत्वा दत्वा स पितरौ धनम् ।
सन्तोष्य बान्धवान्त्सर्वान्निर्ययौ मृगयां धनः ।। १३ ।।

प्रसक्त पादुकपदा बाणकार्मुकपाणयः ।
शबराश्चर्मवसना वीरव्याघ्रं तमन्वयुः ।। १४ ।।

पटहैः पाटयन्तस्ते ध्वनिभिर्दिग्वधूमुखम् ।
शुभान्यग्रे निमित्तानि दृष्ट्वा तैर्मुदितो घनः ।। १५ ।।

वृतो व्याधैश्च भिल्लैश्च स ययौ मृगयावनम् ।
गृहीतश्रृङ्खलापाशा धावद्भिः शबरार्भकैः ।। १६ ।।

लम्बारुणललज्जिह्वा ययुः श्वानः समं ततः ।
केचिद्ययुः पुरोरोधिगुल्मविच्छेदकारिणः ।। १७ ।।

ययुरन्ये मृगान् रोद्धुं वागुराभारवाहकाः ।
केचित् किराताः सन्नद्धाश्चर्मवर्मविधारिणः ।। १८ ।।

आलोकयिषवो व्याघ्रानिषुहस्तास्तमन्वयुः ।
पुरो रवत्सु श्रृङ्गेषु तूर्य ढक्कारवैः समम् ।। १९ ।।

व्यायतश्रेणिसञ्चारा ययुः सर्वे वनेचराः ।
निषादवाहिनी सान्द्रद्रुमश्यामे वनान्तरे ।। २० ।।

ययौ नीलाम्बुधिवहत्कलिदन्तनयोपमा ।
पुलिन्दवाहिनी भीमा मृगाणामन्तकोपमा ।। २१ ।।

अद्य दक्षिणदिग्भागस्थितस्यास्य गिरेस्तटे ।
हरिण्यः सञ्चरन्तीति संसत्सु पदवेदिषु ।। २२ ।।

घनेन वेष्टितं तत्र वनस्य जघनं महत् ।
तन्त्रीयन्त्रसुविन्यासवागुरामन्त्रसाधनैः ।। २३ ।।

विपिनावनिसञ्चारविचारनिरतास्तदा ।
वनेचराः स्म धावन्ति तमुद्दिश्य महीधरम् ।। २४ ।।

प्रसार्य वागुराः सर्वा निरुध्याथ वनेचरैः ।
व्याघ्रेभशरभैणीशसमूहं कोलसम्भवम् ।। २५ ।।

निवेदिते यथावृत्तं घनस्तत्प्राविशाद्वनम् ।
काहलाघारवत्रासादुत्पतत्सु पतत्सु च ।। २६ ।।

मृगगात्रेषु शबराः क्रुद्धा बाणानवाकिरन् ।
कृत्ताङ्घ्रिश्रृङ्गमूर्धानः पेतुरुर्व्यां मृगव्रजाः ।। २७ ।।

सिह्मव्याघ्रवराहेभ भल्लूकशरभादयः ।
पश्चार्धभागमग्नेषु फालाग्रेषु घनच्युतैः ।। २८ ।।

किराताः केचिदिच्छन्त मोचनं तानमूमुचत् ।
उत्पतन्निषुणा विद्धः कश्चिद्भुव्यपतन्मृगः ।। २९ ।।

अदृश्यत तदा राहुगृहीतेन्दुसमप्रभः ।
भिल्लभल्लानलज्ज्वालाभीतभल्लूकराजिषु ।। ३० ।।

मातङ्गवृकसारङ्गमहिषाश्च ययुर्वनम् ।
प्राप्ता बहु पयः पातुं घना इव पयोनिधिम् ।। ३१ ।।

जालच्युताश्च श्वगणा रुरुधुश्च मृगान्बहून् ।
विधुन्वन्त इषूंश्चापानिन्द्रयौघा इवात्मनः ।। ३२ ।।

कश्चित्तत्रापतत्पोत्री प्रदुद्राव घनारवः ।
तमन्वधावद्धावन्तं शरचापकरोधनः ।। ३३ ।।

तं घनं च महासत्वौ द्वौ किरातावनुद्रुतौ ।
तेनाप्यविज्ञातगती निष्प्रतिद्वन्द्वविक्रमौ ।। ३४ ।।

घनश्चापकरस्तौ च शुनो मुक्त्वा शरांस्तथा ।
वराहे दवृषे सोऽपि वञ्चयंस्तान्वनं ययौ ।। ३५ ।।

स वराहो महादर्पो गुञ्जानलसमेक्षणः ।
[1]गिर्यन्तो गर्तवृक्षाग्रादतिष्ठद्भैरवारवः ।। ३६ ।।

तं गुल्मान्तः स्थितं ज्ञात्वा धावन्नासक्तिभावतः ।
अशक्यबाणं मन्वानो घनः क्षुरिकयावधीत् ।। ३७ ।।

चापखिन्नजवासन्नकोलनाथं द्विधा कृतम् ।
[2]अहो पश्यन्ति तद्यत्तु कोशस्तं घनमानमत् ।। ३८ ।।

---

1. गृञ्जन् - सः - Roaring

2. अहो पश्यन्ति भिल्लास्ते क्रोशन्तो घनमानमन् ।

प्राहतुस्तौ घनं स्वामिन् खिन्नाश्च क्षुधाता वयम् ।
कोलमांसं प्रताप्यग्नावासाद्याहृत्य चोदकम् ।। ३९ ।।

प्रीतास्तृप्तास्ततः सर्वे व्रजामो मृगयावनम् ।
तच्छ्रुत्वा तच्च(क्व)पानीयमस्तीत्याह च तौ घनः ।। ४० ।।

तावाहतुर्महानग्रे गिरिरस्ति तदन्तिके ।
सुवर्णमुखरीत्यस्ति सरित्तुङ्गतरङ्गिणी ।। ४१ ।।

इत्युक्तोऽसौ तत्र यामः कोल आनीयतामयम् ।
इत्युक्त्वा योजनं गत्वा ददर्शेशालयं गिरिम् ।। ४२ ।।

अत्र श्रीकालहस्त्यद्रौ शिखादेवो विराजते ।
द्रष्ट्व्य इति तेनोक्तः प्रीतः प्राह घनस्तदा ।। ४३ ।।

दृष्ट्वाऽद्रिमेनं मे भावः[1] क्वापि यातीव मे मनः ।
अयथापूर्वमान्योऽति द्रष्टव्यान्तरकौतुकः ।। ४४ ।।

स देवस्तत्र कुत्रास्ते इति ताभ्यां त्वरान्वितः ।
गत्वा ददर्श सरितं सुवर्णमुखरीं घनः ।। ४५ ।।

तटान्तवेणु निर्मुक्तमुक्तापुलिनशोभिनीम् ।
कालागरुमणिद्योतितरङ्गां पुण्यदर्शनाम् ।। ४६ ।।

छायालवृक्षषण्डेऽस्यास्तटे स्थित्वा धनुर्धरः ।
चाषाच्चमक्षतां[2] वह्निं दृष्ट्वैनमचलं पुनः ।। ४७ ।।

आगमिष्याम इत्युक्त्वा घनः काशसमन्विताम् ।
अवातरन्नदीं तीरद्रुमपुष्परसोत्तराम् ।। ४८ ।।

---

1. मे भावः Temperament. 2. तीर्त्वाश्रमक्षतिं

वीतश्रमो निर्मलात्मा शैलं श्रीकालहस्तिनम् ।
दृष्ट्वा सहर्षः स घनस्तां तीर्त्वा तत्तटाध्वना ।। ४९ ।।

गिरेरूपत्यकां प्राप्य मध्याह्ने तस्य मूर्धनि ।
शुश्राव निःस्वनं धीरं चतुर्वाद्यसमन्वितम् ।। ५० ।।

शब्दः कोऽयमिति प्राह स किरातस्तमब्रवीत् ।

किरातः आह -

[1]सरघाणमेष घोषो महामधुजुषामिति ।। ५१ ।।

तपोभिः प्राग्जन्मकृतैः परां भक्तिं शिवेऽवहत् ।
आस्तिक्यं तत्कृतादेव भावयन् हर्षनिर्भरः ।। ५२ ।।

श्रीकालहस्तिशैलेन्द्र श्रृङ्गं सोपनापङ्क्तिभिः ।
आरुरोह किराताभ्यां ददर्श सत्वरं विभोः ।। ५३ ।।

प्राग्देवदर्शनादेव संहृतात्मनिबन्धनः ।
अभूत्तेजोलसन्मूर्तिर्घनोऽकृत्रिमभक्तिमान् ।। ५४ ।।

श्रीकालहस्तिश्रृङ्गोद्यज्जगद्बीजोद्यताङ्कुरम् ।
दृष्ट्वाऽऽनन्दाम्बुधौ मग्नो हर्षादालिङ्ग्य शङ्करम् ।। ५५

स नत्वा विवशो हर्षाच्चञ्चद्रोमाञ्चकञ्चुकः ।
सान्द्राऽऽनन्दाम्बुनयनः किं कुर्यामिति मूढधीः ।। ५६ ।।

करान्तरगतः सोऽयं भृत्यस्नेहो महानहो ।
इत्युक्त्वात्मबहुप्रेमः[2] तद्दर्शे प्रेमभागभूत् ।। ५७ ।।

---

1. सरघ - Bee.   2. प्रेमा

घनः उवाच -

वराह वारण व्याघ्रभल्लूकभवने वने ।
एवं त्वमसहायोऽसि हतोऽस्मीति शुशोच ह ।। ५८ ।।

हर्षाज्ञातस्रस्तचापो देवमम्बुदलादिभिः ।
कः पूजयेदिति प्राह घनः प्राह निषादकौ ।। ५९ ।।

तावब्रूतां निषादेशं घनं भक्तिघनाधनम् ।

निषादौ ऊचतुः -

मृगयार्थं पुरा सार्धं त्वत्पित्रा चागतौ हि [1]वाम् ।। ६० ।।

कश्चित्तदानीं दृष्टोऽत्र द्विजः शिवपदार्चकः ।
स देवमार्चयेन्नूनं तेनाद्याप्यर्चितो ह्ययम् ।। ६१ ।।

तच्छ्रुत्वाभूद्घनो हृष्टः कालहस्तीशलग्नधीः ।

घनः (उवाच) -

तोषयिष्याम्यहं देवं द्रव्यैः क्षौद्ररसादिभिः ।। ६२ ।।

इति ध्यात्वा शिवं हित्वा घनो गन्तुं न चक्षमे ।
नाप्यस्य पार्श्वगः कोऽपि मांसं [2]नोऽस्मै ददाति च ।। ६३

क्षुधार्तोऽयमिमं हातुं न शक्नोमि करोमि किम् ।
किन्नाम मांसमादाय प्राप्तः स्यामिति चिन्तयन् ।। ६४ ।।

स गच्छन् पुनरागच्छन् हृष्यन् जिघ्रन् मुहूर्मुदा ।
गच्छन् भूयोऽप्यतिस्नेहात् पश्यंस्तं परिवृत्य च ।। ६५ ।।

गौर्वत्सला वत्समिव देवं हातुं न चक्षमे ।
नवं मांसमहं नाथानयेयमिति चिन्तयन् ।। ६६ ।।

---

1. आवाम् इत्यर्थे ।   2. नो - नइत्यर्थे

को बन्धुस्ते स्थितो ह्येकः कथं वा त्वां जहाम्यहम् ।
क्षुधार्ते त्वयि तिष्ठामि कथं वेत्याकुलाशयः ।। ६७ ।।

अश्रुधारालनयनो भूत्वा गन्तुमुदीर्णधीः ।
चापमादाय हस्तेन नत्वेशं काशसंयुतः ।। ६८ ।।

स घनो निर्गतो यत्नात् गिरिश्रृङ्गादवातरत् ।
तीर्त्वा सुवर्णमुखरीं गत्वा दूरतरं वनम् ।। ६९ ।।

नत्वा चारोऽपि तं प्राह मथिताग्निं निरीक्ष्य सः ।
सर्वैरङ्गैर्वराहोऽपि निष्टप्तो छिद्य[1] तत्त्वचम् ।। ७० ।।

इति ब्रुवाणं तं काशो भाववित्प्रत्यभाषत ।

काशः उवाच -

अयं तत्र गिरेः श्रृङ्गे देवमालिङ्ग्य कञ्चन ।। ७१ ।।

बिलाभिसक्तगोधेव निरगान्न विसृज्य तम् ।
तस्मै देवाय मांसानि दातुमत्राप्युपाययौ ।। ७२ ।।

अस्मत्कुलेशतां त्यक्त्वा तस्मिन्नासक्तधीरभूत् ।
तच्छ्रुत्वा प्राह चापोऽपि घन किंन त्वया श्रुतम् ।। ७३ ।।

चाषः उवाच -

इयं का नाम ते भ्रान्तिः किं जहास्यस्मदीशताम् ।
इतीरितो घनश्चाषमुखमैक्षत केवलम् ।। ७४ ।।

विदग्धाङ्गानि बाणेन दग्धरोम्णोऽस्य पोत्रिणः ।
मांसं तद्दारुसम्प्रोतं प्रताप्योज्ज्वलितेऽनले ।। ७५ ।।

मृदुस्निग्धं यथा पाकं स्वादु (स्वाद्य)मस्तीति वेदितम् ।
तच्छ्रुतेनैव यत्स्वादु मृदुसुस्निग्धमेदुरम् ।। ७६ ।।

---

1. छिद्य - छिन्धि

तच्छ्लक्ष्णपर्णपात्रान्ते निचिक्षेप पृथक् पृथक् ।
चाषकाशौ च तत्कर्म दृष्ट्वा तौ प्रोचतुर्मिथः ।। ७७ ।।

भिल्लः उवाच -

अहो मोहो घनस्यायमुपर्युपरि वर्धते ।
ना सम्प्रतप्तं वक्त्रेण निदधाति परीक्ष्य च ।। ७८ ।।

न वेत्ति स्वक्षुधां मांसमावाभ्यां न ददात्ययम् ।
मांसानि बिभ्रद् रस्यानि वाराहाणि घनस्तदा ।। ७९ ।।

देवाविष्ट घनस्यास्य न जानीवः प्रतिक्रियाम् ।
देवार्चनकरं वक्ति नागेनात्रं वधे धृतः ।। ८० ।।

एवं विचिन्त्य दीनौ तौ गोधापुरमगच्छताम् ।
घनोऽप्यज्ञाततद्भावो मांसं निक्षिप्य पात्रतः ।। ८१ ।।

जलं देवाभिषेकार्थमास्ये सम्पूर्य सोऽचिरात् ।
बिभ्रत्पूजार्हपुष्पाणि गृहीत्वा सशरं धनुः ।। ८२ ।।

हस्तेनैकेन चान्येन वहन् पललभाजनम् ।
क्षुधार्तो वर्तते देव इयन्तं कालमित्यसौ ।। ८३ ।।

घनो दयालुस्त्वरितः स्खलन्नारुह्य तं गिरिम् ।
सोपनहा पदेनेशमूर्ध्नि पुष्पाण्यपोह्य सः ।। ८४ ।।

मूर्तेरिव प्रेमरसैरभिषिच्य मुखाम्बुभिः ।
देवं करोद्धृतैः पुष्पैरभ्यर्च्य प्राणमद्घनः ।। ८५

निदधे पुरतः शम्भोर्मांसं पत्रान्तरार्पितम् ।
स्निग्धदारुशिखाप्रोतं प्रतप्तं पललं पृथक् ।। ८६ ।।

दन्तनिष्पीडितं जिह्वाज्ञातपूर्वरसोदयम् ।
मयार्पितमिदं भोज्यमङ्गीकुरु जगत्प्रभो ।। ८७ ।।

इत्युक्त्वा तर्पयित्वेशं मांसं सोऽदात्पुनः प्रभोः ।
इति स्थितवतस्तस्य पुरो भक्तिं निरीक्ष्य तम् ।। ८८ ।।

दृष्ट्वा समानीतकरः प्राणमत्पश्चिमाचले ।
प्रवृत्तायां त्रियामायां तमोरुद्धासु दिक्षु च ।। ८९ ।।

हिंस्राः सन्त्यत्र ते नूनमनार्यं कुर्युरीश्वरे ।
इति चिन्ताकुलो भूत्वा घनः शूरो धनुर्धरः ।। ९० ।।

जाग्रदञ्जनशैलाभो न जहौ पार्श्वमीशितुः ।
अशक्यदर्शनं देवं तस्थौ पश्यन्निव स्वयम् ।। ९१ ।।

क्वाप्यद्रौ वेणुमुक्तौघः क्वचनागमणि व्रजः ।
तौ पुष्पवन्ताविव तं देवं सेवितुमागतौ ।। ९२ ।।

ज्वलितौषधिदीपैश्च गुहारत्नोपलांशुभिः ।
मुनीन्द्रद्युतिभिस्तत्र शैले रात्रिर्नसिध्यति ।। ९३ ।।

निशान्तवेदिनां रावं निशम्यासौ पतत्रिणाम् ।
अन्येद्युर्वीरः स्वात्मेशभोज्याहरणधीरभूत् ।। ९४ ।।

स यूथमावासजुषां मृगाणां
पृथङ्निहन्तुं मृगयाविधिज्ञः ।
गिरीशमानम्य गृहीतचापः
प्रभातशेषे तमसि प्रतस्थे ।। ९५ ।।

।। इति श्रीशिवरहस्ये नवमांशे चतुस्त्रिंशोऽध्यायः ।।

।। पञ्चत्रिंशोऽध्यायः ।।

स्कन्द उवाच -

उदिते तपने विप्रः पूर्ववद्देवपूजकः ।
पूजाद्रव्याणि सम्भृत्य शिवमर्चितुमागतः ।। १ ।।

तपः शमदमोपेतो भस्मरुद्राक्षभूषणः ।
शिवागमविधानज्ञः स्वात्मेशमचलस्थितम् ।। २ ।।

निरञ्जनं नीलकण्ठमवाप्याग्रे स्थितो द्विजः ।
ददर्श मांसान्यस्थीनि विकीर्णानि समन्ततः ।। ३ ।।

दूरं ततोऽपसृत्यासौ हा केनानुचितं कृतम् ।
निषादैर्निर्भयैरेतत्कृतमंहो हि नापरैः ।। ४ ।।

एवं स दुःखितो भूत्वा देवमाहातिखिन्नधीः ।
क्षान्तं त्वयैतदित्यार्तो निपत्योर्व्यां रुरोद सः ।। ५ ।।

सहमानः श्रुतौ प्रोक्तो महाकारुणिको हरः ।
ईदृशे न क्षमा कार्या त्र्यक्ष साक्षाच्छिवद्रुहि ।। ६ ।।

इमं विभुं पर्वताग्रे स्थितं ज्योतिर्मयाकृतिम् ।
अपूजयन् विलम्बेन किं तिष्ठामीति चिन्तयन् ।। ७ ।।

पललं पत्रमस्थीनि पादुकापदमप्यसौ ।
सम्मार्जन्या समुत्सार्य स्नात्वा नद्यां समागमतः ।। ८ ।।

सम्प्रोक्षणविधिं कृत्वा दोषशान्त्यै विधानतः ।
पूजयित्वोपचारैस्तं देवदेवं ननाम सः ।। ९ ।।

स्तुत्वा विज्ञाप्य देवेशं प्रयाते शिवपूजके ।
ततो घनो व्याधनाथो यच्चक्रे तद्वदाम्यहम् ।। १० ।।

धनुर्धरो यतस्तत्र गत्वा शैलैकपार्श्वतः ।
स्थित्वा निबिडकूटाश्ममहाद्र्य्अन्तरसन्दिषु। ११ ।।

चरतो धावतो हत्वा वराहैणवृकान् घनः ।
पदान्यन्विष्य गवयखड्गान् *खड्गेन सोऽवधीत् ।। १२ ।।

वनमध्ये निचिक्षेप क्वापि मेध्यान् मृगान् हतान् ।
विच्छिद्य वह्निमथनदारुं क्षुरिकया घनः ।। १३ ।।

उत्सार्य सरघाः प्रान्तं छित्वा शाखामधूत्तरम् ।
कदलीपत्रपुटकं कृत्वा निष्पीड्य तन्मधु ।। १४ ।।

शुष्क काष्ठचयैर्वह्निं प्रज्वाल्य स घनस्तृणैः ।
निर्मथ्य च विशस्यैव वराहैणवृकान् घनः ।। १५ ।।

उत्कृत्य मांसं स्थानेभ्य मृदु पक्वं प्रताप्य तत् ।
विदार्याथ क्षुरप्रेण मांसं पत्रपुटे न्यधात् ।। १६ ।।

दारुणि व्यायतप्रोतं कृत्वा भल्लाग्रतो घनः ।
नैवेद्यार्थं महेशस्य तद्रसस्य परीक्षणम् ।। १७ ।।

हव्यमग्निमुखे न्यस्तं त्रिदशानां यथा तथा ।
कालहस्तिपतेर्हृद्यं मांसं स्थातुं मुखार्पितम् ।। १८ ।।

यत्स्वादु मांसं तत्पत्रपुटे न्यस्य मधुप्लुतम् ।
मुखेनापूर्य नद्यम्भो भिल्लः स्नात्वा घनस्तथा ।। १९ ।।

---

* खड्ग - A Rhinoceros, खड्ग -Sword

दावभस्म समुद्धूल्य पुष्पाण्याहृत्य गन्धिलात् ।
धनुः शरकरो भिल्लो निषङ्गालम्बिपृष्ठभूः ।। २० ।।

पल्लवोद्दीप्तसन्मौलिरुपानद्गूढपादकः ।
पूर्ववत्स ततोऽयासीदारुरुक्षुर्गिरिं घनः ।। २१ ।।

व्याधनाथो जगन्नाथमेत्य विप्रेण यत्कृतम् ।
पुष्पादि सर्वमुत्सार्य गिरीशं समपूजयत् ।। २२ ।।

तन्मांसं न्यस्य देवाग्रे प्रहृष्टहृदयो घनः ।
मुखाम्बुभिर्लिङ्गमौलिमाप्लुत्याक्षिप्य तत्सुमम् ।। २३ ।।

पूर्वमांसादिदं स्वादु मयापि सुपरिक्षितम् ।
क्रोडैणन्यङ्कुगवयखड्गकायसमुद्भवम् ।। २४ ।।

मिश्रितं मधुसारेण नवाभिष्यन्दचारुणा ।
मधुरं मधुरं भुङ्क्ष्व मम नाथ मया शपे ।। २५ ।।

एवं निवेद्य नैवेद्यं तस्थौ स्थाणोरथाग्रतः ।
एवं दिवा स मृगयूरात्रौ जाग्रदथान्वहम् ।। २६ ।।

हिंस्रेभ्यो रक्षितं देवं प्रसार्यातिगिरेर्वनम् ।
घनः श्रीकालहस्त्यद्रावेवं देवमसेवत ।। २७ ।।

शिवद्विजोऽप्यनुदिनं विमना भिल्लपूजया ।
यथाशास्त्रं समर्च्येशं निनाय दिवसान् बहून् ।। २८ ।।

दृष्ट्वा घनं घनाभं तं हस्त्यद्रौ हस्तिवत्स्थितम् ।। २९ ।।

उवाच प्रणतं पुत्रं नागः सास्त्राविलेक्षणः ।

नागः उवाच -

पुत्र मा साहसं कार्षीर्गिरावस्मिन् मृगान् प्रति ।। ३० ।।

कोऽयं देवः कोऽत्र वासस्तवानुचित एव हि ।
समायाहि पुरं मेऽद्य भिल्ल भिल्लेन पालितम् ।। ३१ ।।

त्वया हि नोऽस्मिन् वार्धिक्ये धैर्यं धर्तुं न हि क्षमे ।
इत्थं पितुर्वचः श्रुत्वा घनघोषो घनोऽब्रवीत् ।। ३२ ।।

घनः (उवाच)

देवो दृष्टो गिरावस्मिन्नसहायेन संस्थितः ।
पुरेण मे न ते कार्यं माता बन्धुरयं पिता ।। ३३ ।।

कदाचिद्यामि ते गेहं व्रज मा शुच भोः पितः ।
इति तेनाशु पुत्रेण सान्त्वितो गृहमागतः ।। ३४ ।।

उवास स घनस्तत्र देवदेवदयारसैः ।
मुक्त जन्ममलाङ्गोऽभूत्तत्कृत्यं केन वर्ण्यते ।। ३५ ।।

देवं घनेऽर्चयत्येवं द्विजोऽप्यार्चयदन्वहम् ।
न चेक्षे पापकर्तारं वारयेशेति चाब्रवीत् ।। ३६ ।।

देवः सरिज्जटाचूडः स्वप्ने प्राह तमर्चकम् ।

शिव उवाच -

व्याधतो वै हितं साधु कर्म वक्ष्यामि तत्कृतम् ।। ३७ ।।

स भक्तिसारहृदयः शरासक्तकरोऽप्यसौ ।
तत्कर्म मत्प्रियं तस्य स्थितिरेवं विभाव्यताम् ।। ३८ ।।

प्राप्तस्याद्रिमिदं स्थानं मद्भक्तिप्रेमवारिधेः ।
यन्मूर्ध्नि पूर्वविधृतपुष्पोत्सारणकारिणः ।। ३९ ।।

वनेचरस्य भक्तानां प्रथमस्य महात्मनः ।
सोपानत्प्रपदं न्यस्तमिन्दुवत्तं दधाम्यहम् ।। ४० ।।

अन्तर्हृतप्रेमरसभरितं तन्मुखाम्बु च ।
जह्नुकर्णपथोदीर्णगङ्गाम्भः पावनं मम ।। ४१ ।।

स्वयं पतदिव प्रेमपुष्पजालं तदुत्कृतम् ।
तन्मूर्ध्ना कुसुमं हृद्यं ब्रह्मादृष्टेन मौलिना ।। ४२ ।।

गृह्णामि तत्प्रीतियुक्तो वसाम्यास्वाद्य तत्कृतम् ।
गाढाङ्गारप्रतप्तं तन्मधुनिष्यन्दि तद् द्विज ।। ४३ ।।

मुखाब्जनिःसृतरस रसनालेढितं मम ।
पललं तेन यद्दत्तं स[1] फलेन विशेषतः ।। ४४ ।।

भवेन्न सदृशं तस्य हव्यं शिखिमुखे हुतम् ।
स्वभावमुक्ता तस्योक्तिः स्मितफुल्लाननस्य सा ।। ४५ ।।

रोचते मे मुनिमुखवेदवाचां द्विजाधिका ।
द्रष्टासि त्वं तस्य भक्तिं मोहं सन्त्यज मा शुचः ।। ४६ ।।

देवोक्त्या स द्विजो रात्रौ परेऽह्नि प्राप्य पूर्ववत् ।
देवं सम्पूज्य तं गूढः क्वाप्यतिष्ठत्कुतूहली ।। ४७ ।।

दिनमध्ये तदा प्राप चित्रमेघनिभो घनः ।
प्राग्जन्मागतपुण्येन मृगयार्थं वनं ययौ ।। ४८ ।।

---

1. तत्

स पूर्ववत्स्वादुमांसं बिभ्रत्पुष्पं तथोदकम् ।
भिल्लो नल्वप्रमाणोऽयमाययौ सद्म शाङ्करम् ।। ४९ ।।

आरुह्य तं गिरिवरं गिरीशं प्रत्यभाषत ।

घनः उवाच -

विलम्बितोऽस्मि किं शम्भो क्षुधार्तोऽसि न संशयः ।। ५० ।।

भुङ्क्ष्वेदं त्वत्कृते मांसमुत्कृत्यानीतमञ्जसा ।
मृगाङ्गेभ्यो महादेव स स्नाहीति मुखोदकम् ।। ५१ ।।

संसेच्य पुष्पाण्युत्कीर्य पललं पुरतो न्यधात् ।
देवो दर्शयितुं भक्तिं द्विजायास्मै घनस्य ताम् ।। ५२ ।।

स्रुतासृग्दक्षनोत्रोऽभूत् तद्दृष्ट्वाऽभूच्च विस्मितः ।
शीर्णवक्त्राब्जहृदयो विह्वलाङ्गो बभूव ह ।। ५३ ।।

वेगादुत्पत्य गत्वासौ ममार्ज क्षतजं तदा ।
तद्दृष्ट्वाऽनारतस्रावं नाज्ञासीत्कृत्यमाकुलः ।। ५४ ।।

निपतन्नुत्पतंस्तत्र दीर्घमुष्णं च निःश्वसन् ।
केनेदं हि कृतं देव निर्गते मयि हिंस्रकैः ।। ५५ ।।

मा रोदीरक्षि ते दद्यामद्य हृद्यतमं मम ।
इति सज्यं धनुः कृत्वा दिक्षुव्यापारितेक्षणः ।। ५६ ।।

शैलमौलौ मृगान् कांश्चिददृष्ट्वा पुनरागतः ।
स देवपादमाश्लिष्य प्ररुरोद पुनः पुनः ।। ५७ ।।

मयि तिष्ठति देवेश साहाय्ये तव वै वने ।
यदि पश्यामि तं हन्मि शरेणैकेन लीलया ।। ५८ ।।

अस्येदमनुरूपं किं प्रमाणेभ्यो दवीयसः ।
केनायमसकृन्नेत्रसमं भूयान्महेश्वर ।। ५९ ।।

परीक्षितमिदं तस्मादानेष्याम्यौषधं वनात् ।
इत्युक्त्वा निर्गतः शैले विचचार वनाद्वनम् ।। ६० ।।

औषधं तत्तदानीय निर्मथ्य स्वकरेण सः ।
तदक्ष्ण्यसेचयत्कामं तद्रक्तं न शशाक सः ।। ६१ ।।

रोद्धुं निर्भिन्नहृदयो भिल्लो भल्लकरस्तदा ।
पुनः प्रवृत्ते सोऽप्यन्यमुपायं समचिन्तयत् ।। ६२ ।।

मांसेन वर्धते मांसमतोऽहमिषुणाक्षि मे ।
उत्कृत्यास्य विभोर्नेत्रे न्यस्यामीति स हृष्टधीः ।। ६३ ।।

उत्कृत्य नेत्रं तन्नेत्रे निर्यद्रक्तं समार्पयत् ।
शान्ते रक्ते स चोत्प्लुत्य करेणास्फालयद्भुजम् ।। ६४ ।।

मया कृतेयं सद्बुद्धि रित्यनृत्यत्स दर्पितः ।
तथैवानन्दचेष्टाभिः स चोन्मत्त इवाभवत् ।। ६४ ।।

निजभक्तेक्षणन्यासात् त्र्यक्षोऽप्यक्षियुतोऽभवत् ।
विप्रायैतत्प्रेम पुनरैच्छद्दर्शयितुं शिवः ।। ६६ ।।

वामेऽपि नेत्रे क्षतजं विभुरेष व्यभावयत् ।
स दृष्ट्वा पुनरन्याक्षि क्षरद्रक्तमवेक्ष्य* सः ।। ६७ ।।

---

* दृष्ट्वा-अवेक्ष्य इत्येकार्थकपदद्वयनिवशेनं न युक्तं अतः "स सद्यः" इति भवतु ।

दृशि तस्यां न्यधात्पादं ज्ञापनार्थं शरोद्धृतम् ।
निजाक्ष्युत्कृत्य [1]तस्याक्ष्णि व्यधाद् व्याधोऽतिहर्षतः ।। ६८

तदन्तरे महादेवः प्रादुर्भूतः सहोमया ।
तत्सोढुमक्षमस्त्र्यक्षस्तस्मै दत्तेक्षणो हरः ।। ६९ ।।

वीक्ष्याभूद्विस्मितो विप्रः पुष्पाणि ववृषुः सुराः ।। ७० ।।

दृष्ट्वा देवदृशौ शरेण निजदृक्पाटैकधीरं करं
संरुध्यात्मकरेण किङ्करवरं तं शङ्करः प्राह ह ।
कैलासे वस वासवादिविनुतो मात्रा च पित्रा स्वयं
मद्भक्तैर्गणपैर्विहृत्य सुचिरं मत्प्रेमभाक् त्वं भव ।। ७१

नेत्रार्पकस्येदमुदारकीर्तेश्चरित्रमेतच्च पवित्रमिष्टम् ।
पठन्ति ये भक्तिपरायणास्ते प्रयान्ति सामीप्यपदं[2] हरस्य ।।

।। इति श्रीशिवरहस्ये नवमांशे भिल्लनेत्रार्पणं नाम
पञ्चत्रिंशोऽध्यायः ।।

---

1. तत्स्थाने ।   2. सामीप्यमुमाधवलस्य ।

।। षट्त्रिंशोऽध्यायः ।।

स्कन्द उवाच -

कलानाथोऽभवद्वैश्यः सदावश्यधनो युवा ।
बिल्वारण्येऽवसत्पुण्ये दण्डकारण्यमध्यमे ।। १ ।।

कल्हारसौरभोदारकावेरीवारिभूरिषु ।
चोलेष्वस्ति घटग्रामो भूसुरेन्द्रनिवासभूः ।। २ ।।

यत्र गङ्गाशशिब्रह्मकपालाङ्कजटाधरः ।
भक्तं पातुं हरः क्रोधाद्यदा कालं पुरावधीत् ।। ३ ।।

यत्र क्षेत्रेषु शालिश्रीखङ्खमुक्तास्तटेषु च ।
पार्श्वे तु यज्ञशालाश्च [1]कल्हारौघाश्च सेतुषु ।। ४ ।।

गीतानि शालिकारस्त्रीणां [2]धान्यरक्षोद्य भूमिषु(?) ।
ऋग्यजुःशाखामुखरसामघोषोरुभूषिते ।। ५ ।।

तस्मिन् श्रीवर्धते ग्रामे कलानाथ इति द्विजः ।
आसीत्सरित्किरीटाङ्घ्रि[3]पदार्चनपरायणः ।। ६ ।।

मृकण्डुसूनोर्बालस्य गाढमाश्लिष्यतो भयात् ।
भक्तसंरक्षणे मृत्युं जघान प्रपदेन यः ।। ७ ।।

तं गङ्गावीचिवाचालकिरीटं स कलाधिपः ।
आनर्च सौरभजुषा नित्यं गुग्गुलुधूपतः ।। ८ ।।

देवेशदयया रिक्ते जातेऽपि स कलाधिपः ।
गुग्गुलूच्चसुधूपेन न तत्याज शिवार्चनम् ।। ९ ।।

---

1. वाप्यः कल्हार भासुराः ।
2. श्रूयन्ते धान्य (सस्य) वृद्धये ।
3. अङ्घ्रिपद्मार्चन ।

गोगृहक्षेत्रदासादि विक्रीय विभवं विभोः ।
कुर्वन् गुग्गुलुधूपार्चां सुतदारशुचं व्यधात् ।। १० ।।

उपोषितेषु पुत्रादिष्वतिरेके दिनद्वये ।
यवान् क्रीतुं ददौ भर्त्रे पत्नी माङ्गल्यसूत्रकम् ।। ११ ।।

स तद्गृहीत्वा विपणिं गच्छन् गुग्गुलुपूर्णया ।
नावा समागतं वैश्यं दृष्ट्वा हृष्टतरोऽभवत् ।। १२ ।।

गङ्गाधरस्य पूजार्थं सुगन्धिवरगुग्गुलुः ।
लब्धा नास्मात्परो लाभो किं व्रीहिग्रहणेन मे ।। १३ ।।

इति नृत्यन् कलानाथः स्वर्णं दास्यामि गुग्गुलोः ।
दिशेत्याह विशं वैश्यः प्राह किं मे ददेर्भवान् ।। १४ ।।

माङ्गल्यसूत्रं स्वर्णाढ्यं ददामीति कलाधिपः ।
तद्हृत्वा गुग्गुलुभरं दत्वा प्रीतमना ययौ ।। १५ ।।

प्राप्य वीरेश्वरस्थानं तत्रासौ गुग्गुलूच्चयम् ।
स्वगोत्र भक्तनाथस्य पद्मकोशगृहे स्थितः ।। १६ ।।

भार्यासुतभयाद्वैश्यः कलानाथधरार्चकः ।
तं भार्या तत्सुताश्चैव विचिन्वन्ति च तं तदा ।। १७ ।।

विपणापणवीथीषु क्वाद्यचास्ति कलाधरः ।
वैश्यपुत्राश्चतानाहुः निर्गतोऽद्यैव गुग्गुलुम् ।। १८ ।।

गृहीत्वा याति वैश्यात्तु न गृहीता यवास्तदा ।
इत्युक्ता वैश्यपुत्रैः सा पुत्रैः सह शुचाकुला ।। १९ ।।

तमन्वधावत् त्वरिता शून्यं तत्स्वसुतैर्गृहम् ।
इत्थं स्थिते महेशेन प्रेरितो धनदः स्वयम् ।। २० ।।

तद्गृहं पूरयामास धनधान्याम्बरादिभिः ।
साप्यन्विष्य शुचा पुत्रैर्गृहं प्राप्य क्षुधातुराम् ।। २१ ।।

सुप्तां कटे तदा स्वप्ने वृद्धविप्रस्वरूपधृक् ।
भस्मरुद्राक्षसम्पन्नस्तामुवाच महेश्वरः ।। २२ ।।

महेश्वरः (उवाच) -

मा पीडयाद्य भक्तं मे कलानाथं मदर्चकम् ।
गुग्गुलूद्दाम धूपेन पूरितं तेन मे गृहम् ।। २३ ।।

तव सम्पदियं सर्वा पश्येत्याह सुलोचनाम् ।
इत्युक्ता सा तथोत्थाय समन्ताद्वीक्ष्य मन्दिरम् ।। २४ ।।

स्वर्णरत्नादिभिः पूर्णं मत्वा शिवकृपेति सा ।
हर्षाश्रुपूर्णनयना सुतैः सह मुदा तदा ।। २५ ।।

ययौ भोज्यादिकं पक्तुं प्रवृत्ताऽभूत्पतिव्रता ।
तमन्तश्च शिवागारे सुप्तं भार्याभिया तदा ।। २६ ।।

दत्वा गुग्गुलुधूपं च नत्वा हृष्टं भयाकुलम् ।
देवदेवोऽपि दयया स्वान्यं प्राह कलाधिपम् ।। २७ ।।

महेश्वर उवाच -

कलानाथ क्षुधार्तोऽसि निजं गत्वा निकेतनम् ।
अन्नं क्षीरादिसम्पन्नं भवता भुज्यतामिति ।। २८ ।।

तच्छ्रुत्वाथ प्रबुद्धोऽसौ नत्वेशं निर्गतो गृहम् ।
स्वर्णरत्नादिसम्पूर्णं वीक्ष्य वेश्म विसिष्मिये ।। २९ ।।

तमागतं कलानाथं भार्या प्रत्युज्जगाम तम् ।
पुत्राश्चहर्षितास्तत्र पितरं प्रययुर्मुदा ।। ३० ।।

प्रणम्य तं कलानाथ ननन्दुः प्रीतमानसाः ।
तद्‌गृहप्रान्तसदना मदनारिदयेति ते ।। ३१ ।।

प्राहुस्तं भार्यया सार्धं पुत्रैः सोऽपि प्रहर्षितः ।
उवाच भार्यां हृष्टां तां कलानाथोऽति हृष्टधीः ।। ३२ ।।

कलानाथः (उवाच) -

अत्र चित्रं कथं सुभ्रु निःसीमा श्रीरियं वद ।
गोमहिष्यादिसम्पूर्णा धनधान्याम्बरादिभिः ।। ३३ ।।

प्रासादकक्ष्यावितताः प्रासादः कस्य वा मम ।
इति तद्वचनं श्रुत्वा पत्युर्भार्या तमब्रवीत् ।। ३४ ।।

भार्या (उवाच) -

स्वप्ने मामाह विप्रेन्द्र तवाद्य सदनं शुभम् ।
श्रिया सम्पूरितं भद्रे गृहाण वसुपूरितम् ।। ३५ ।।

इत्युक्त्वा निर्जगामैव तदाद्राक्षं गृहं मम ।
धनधान्यादि सम्पूर्णं तूर्णं शम्भोः प्रसादतः ।। ३६ ।।

इत्युक्त्वा सा तदा वैश्या वैश्येनाभूत् सुविस्मिता ।
अन्नैः षड्रससम्पूर्णैर्भोजयामास बान्धवान् ।। ३७ ।।

ब्राह्मणाञ्छिवभक्तांश्च भोजयामास हर्षितः ।
लब्ध्वा श्रियं कृपोन्मेषैर्विभोर्भिक्षाटनस्य सः ।। ३८ ।।

अन्नैराराधयन् भक्तानन्वहं रसशालिभिः ।
तच्छ्रुत्वोदन्तमधुना चोलेन्द्रो विस्मितोऽभवत् ।। ३९ ।।

तं वैश्यं पूजयामास धूपदं शङ्करालये ।
सोऽपि गुग्गुलुधूपेन अधिकं सोह्यधूपयत् ।। ४० ।।

तेन भक्तेन चोलेन्द्रः श्रीतालविपिनं ययौ ।
तत्र तालवनाधीशो नीलग्रीवोऽपि शङ्करः ।। ४१ ।।

वक्रितग्रीवमालोक्य समीकर्तुं नृपोऽभवत् ।
पत्नीभिर्वाजिभिः पाशैर्गजशुण्डाबलोद्धृतैः ।। ४२ ।।

पाशैरुद्बध्य देवेशं चकर्षातिबलेन सः ।
स तदुन्नमनाशक्तो भक्तेन स नृपो ययौ ।। ४३ ।।

स्वयं दर्शयितुं देवं स्वयं निरगमद् गृहात् ।
मार्गे महेश्वरं नत्वा तेषु तेषु च धामसु ।। ४४ ।।

प्राप्य यज्वद्द्विजावासं श्रीतालविपिनं ययौ ।
दृष्ट्वा नृपस्य तत्कर्म तद्बलं च कृतश्रमम् ।
कथं नृपः कृतार्थः स्यादिति भक्तो व्यचिन्तयत् ।। ४५ ।।

सार्धं नृपबलेनैव यतिष्ये स्वयमित्यसौ ।
देवोत्तमाङ्गसम्बद्धकण्ठरज्जुश्चकर्ष तम् ।। ४७ ।।

करवालं गले बिभ्रद्वैश्योऽकर्षन्नृपाग्रतः ।। ४७ ।।

वैश्यः (उवाच)

पाहीशेन्दुकलाललाम भगवन् श्रीकण्ठ कण्ठीरवा-
दुद्यच्चर्मधराव्ययेश भगवन् त्र्यक्षाधुना पाहि माम् ।
ब्रह्माद्यच्युतवन्द्यपाद सुमहानागाङ्ग गौरीमुख-
प्रोत्फुल्लाब्जविकासनार्क भगवन् त्र्यक्षाधुना पाहि माम् ।।

भक्तिरूपेण पाशेन एवं कर्षति शङ्करे ।
कण्ठकर्तनजं दुःखं न सस्मार स्मरद्रुहि ।। ४९ ।।

भक्तिमाधत्त वैश्योऽसौ ऋजुर्जातो महेश्वरः ।
ववृषुः कुसुमं देवास्तत्र वैश्यनृपोपरि ।। ५० ।।

ततो नृपः कलानाथपादयोः प्रणनाम सः ।
वनस्थलीव तत्सेना वर्षेणोल्लासिताऽभवत् ।। ५१ ।।

त्रिपुरं दग्धुकामस्य स्थितस्य पृथिवीरथे ।
मौर्वीं नीतवतः शम्भोर्नागं कर्मुकमद्रिराट् ।। ५२ ।।

स्थितं स्थाणुमिवाशक्यं स्थाणुर्वै भक्तिनिर्भरः ।
ब्रह्मणा मृग्यमौलिं तं ऋजूचक्रे नृपाग्रतः ।। ५३ ।।

भक्तादृते केन शक्यो महेशो भक्तिभावनः ।
नृपः पुरमगाद्भक्तः स वैश्योऽपि स्थितस्तदा ।। ५४ ।।

तत्र तालवनाधीशं गुग्गुलूद्दामधूपतः ।
धूपयन् श्रीमहादेवं तत्रैवास प्रहृष्टधीः ।। ५५ ।।

प्रविश्य वेश्मसाम्राज्यमाज्यान्नैर्भक्तिपूजकः ।
स देहान्ते शिवं प्राप भार्यापुत्रसमन्वितः ।। ५६ ।।

सूतः (उवाच) -

कलाधिनाथश्च घटेशसन्निधौ
स्थित्वा प्रयातो रजताद्रिमौलिम् ।
स गुग्गुलूद्दामसुधूप सौरभैः
सुधूपयित्वा(?)ऽभवदीशसन्मुखः ।। ५७ ।।

चोळेश्वरोऽपीशकृपाभरेण
प्राज्यं स राज्यं प्रशशास भूमौ ।
देहान्तिमेऽभूच्छिवधामकिङ्करः
सदैव कैङ्कर्यरतः स शाङ्करः ।। ५८ ।।

।। इति श्रीशिवरहस्ये नवमांशे षट्स्त्रिंशोऽध्यायः ।।

।। सप्तत्रिंशोऽध्यायः ।।

आस्पदं सम्पदामस्ति श्रीमत्कञ्जनदीपुरम् ।
सगङ्गामौलिसान्निध्यं साङ्गवेदविदाश्रितम् ।। १ ।।

हलाजीववधूलूनशेषकल्हारसौरभम् ।
आघ्रातुमिवनम्राग्रा यत्र पाकेन शालयः ।। २ ।।

यत्र शूद्रकुलोद्भूता गृहस्थाश्रमधर्मिणः ।
नारीनृत्तानकस्वानैर्वीथ्यश्च मुखरान्तराः ।। ३ ।।

मानकञ्जनदीनाथस्तस्मिन् कञ्जनदीपुरे ।
कोऽपि शूद्रकुलोत्पत्तिरासीच्चोलचमूपतिः ।। ४ ।।

चिन्तानावन्दनाभ्यर्चावर्तनाभावनानि सः ।
नियतं नीलकण्ठस्य निदधे पादपद्मयोः ।। ५ ।।

बालेन्दुमौलेर्विन्यस्य दास्ये कलयतां धृतिम् ।
शुश्रूषालग्नधीश्चासीद्भक्तानां भक्तिनिर्भरः ।। ६ ।।

निजसम्पदमीशानभक्तानामेव भावयन् ।
प्रागेवाभ्यर्थनायाः स वाञ्छापूरणमातनोत् ।। ७ ।।

ततोऽनपत्यताखेदात्सोऽभजत्परमेश्वरम् ।
तदीयदयया पुत्रीं प्रासूतास्य कुटुम्बिनी ।। ८ ।।

चतुर्थवंशवाराशेश्चन्द्रिकां रतिसोदरीम् ।
चतुर्मुखकराम्भोजसृष्टिकौशलसम्पदम् ।। ९ ।।

आसीज्जन्मोत्सवे तस्या भूयान्मङ्गलसम्भ्रमः ।
ददौ शङ्करभक्तेभ्यो यथेप्सितमसौ धनम् ।। १० ।।

भृत्येन्द्रापूर्णसङ्घोषैर्मङ्गलस्नेहधारया ।
भक्तानां स मुदं कुर्वन् स चकार महोत्सवम् ।। ११ ।।

स तदा पोषयामास भागधेयस्य कन्दलीम् ।
*मूर्तामिवेन्दिरां साथ मन्दिरे सुन्दराऽभवत् ।। १२ ।।

सा क्रमेणाङ्गणे चक्रे जानुभ्यां परिरिङ्खणम् ।
सिञ्जानहंसिकामञ्जुवाचालमणिकङ्कणा ।। १३ ।।

धूलिपालिभिरालीनां निकुरुम्बकराम्बिता ।
केलीं वितन्वती वीथ्यां चूलीवेल्लितभल्लका ।। १४ ।।

मणिपाञ्चालिकाद्वन्द्वकृतोद्वाहोत्सवा क्रमात् ।
अक्षिबन्धनलीलाभिराततान मुदं पितुः ।। १५ ।।

वैडूर्यौघान्तरे न्यस्तं पद्मरागशिखावलम् ।
हरिन्मणिद्युतिभ्राजिक्षिप्तमौक्तिकतण्डुला ।। १६ ।।

सखीहस्तसमालम्ब विहितभ्रमविभ्रमा ।
डोलाकन्दुकलीलाभी रेमे चित्रकथोक्तिभिः ।। १७ ।।

माणिक्यमेखलाबद्धनानाचित्रदुकूलका ।
पुष्पापचितिमातानीदारामेषु सखीयुता ।। १८ ।।

पूरिते मधुना पद्मे निजाकारं विलोक्य सा ।
मम श्रीराविरासेति मौग्ध्येनानतिमातनोत् ।। १९ ।।

---

* मूर्तेवेन्दिरा साथ ।

शारिकाशुककेकीभिः क्रीडाहरिणपोषिणी ।
विलासकलिकावल्लीमतल्लीसेककारिणी ।। २० ।।

अनङ्गरससर्वस्वमिवाङ्कुरितसत्कुचा ।
लावण्यरससम्पूर्णा तारुण्यकुलदेवता ।। २१ ।।

सा विवाहोचितां प्राप्य दशां प्रीतिं पितुर्व्यधात् ।
रमाभिमुखिनीमेनां सञ्चारमणिदीपिकाम् ।। २२ ।।

उद्वोढुमाभिजात्याद्यैरुचितस्तामयाचत ।
वृद्धैः सञ्चिन्त्य सम्मन्त्र्य कुलक्रमगतैः मुहुः ।। २३ ।।

उद्वाहमनुमेनेऽस्या मानकञ्जनदीश्वरः ।
उक्तोऽथ सम्मतो दूतैरेननाथो वरः सुधीः ।। २४ ।।

अन्तरानन्दमाधत्त मुहूर्ते द्विजकल्पिते ।
मानकञ्जनदीशोऽपि बन्धूनाहूय सर्वतः ।। २५ ।।

नगरेऽलङ्कृते स्त्रीभिरङ्कुरार्पणमादधे ।
आहूय निखिलान् बन्धून् चतुरङ्गबलान्वितः ।। २६ ।।

मानकञ्जपुराधीशमाससादैननायकः ।
एतस्मिन्नन्तरे शम्भुर्मानकञ्जनदीशितुः ।। २७ ।।

भवनं प्राप वेषेण महाव्रतिकयोगिनः ।
जटाचञ्चन्मणीनागकृतकुण्डलमण्डितः ।। २८ ।।

रुद्राक्षभूतिधवलो योगपट्टोपवीतवान् ।
कौपीनी पादुकोल्लासी मदद्विरदसद्गतिः ।। २९ ।।

एकप्रकोष्ठव्यानद्धस्फटिकाक्षस्त्रगुज्ज्वलः ।
मानकञ्जनजीशेन कौतुकोल्लासिचेतसा ।। ३० ।।

स वन्दितो बभूवान्तर्भवने भिक्षुशेखरः ।
तमाह विनतं भिक्षुर्मङ्गलं किं भवद्गृहे ।। ३१ ।।

इत्युक्तोऽसौ विनीतः सन् प्राह प्राञ्जलिरेव हि ।

मानकञ्जः उवाच -

स्वामिन्मत्तनयोद्वाहो भविष्यत्यद्य मे गृहे ।। ३२ ।।

अस्ति कल्याणमित्युक्त्वा कल्याणाचलकार्मुकम् ।
प्रणिपत्य स्वयं पुत्र्या तन्नतिं [1]कारयत्तदा (?) ।। ३३ ।।

प्रणिपत्यार्थितामेनामुद्वाहालङ्कृतोज्ज्वलाम् ।
आलोक्य चिकुरे तस्याः कपोलमुकुरे तदा ।। ३४ ।।

भिक्षुर्बबन्ध स्वां दृष्टिमिक्षुसाराधरे तदा ।
मुहुरालोक्य तन्वङ्ग्या धम्मिल्ल धृतहल्लकम् ।। ३५ ।।

कृताञ्जलिपुटे चक्रे तस्मिन्नक्षि स तापसः ।
तद्दृष्टियष्टिं[2] वीक्ष्यैव भिक्षुं प्राञ्जलिरब्रवीत् ।। ३६ ।।

कञ्जनदी (उवाच) -

स्वामिन् किं करवाणीतिवाण्यामेणीदृशेक्षणम् ।
तदीक्षणं च स्वपदे क्षणमक्षीणपद्धतिः ।। ३७ ।।

उवाच भिक्षुस्तं तत्र तस्मिन्वैवाहिके गणे ।

भिक्षुः उवाच -

कर्तुं पञ्चवटी[3]मेतच्चिकुरो दीयतामिति ।। ३८ ।।

---

1. चाप्यकारयत् 2.दृष्टयष्टि 3. वटी - A Roap - a string.

मानकञ्जनदीनाथस्तथास्त्विति मुदं व्यधात् ।
छित्वा छुरिकया तस्याः केशानस्मै समार्पयत् ।। ३९ ।।

आमूललूनतत्केशान्गृहयालुरिवेश्वरः ।
अन्तर्धायोमया सार्धमाविरासीद्वृषोपरि ।। ४० ।।

प्राणंसीत्कञ्जनाथोऽपि प्रावर्षन्कुसुमं सुराः ।
चक्रुरप्सरसो नृत्यं नेदुर्दुन्दुभयो दिवि ।। ४१ ।।

भक्तिनिर्भरजानन्दभरितं भूरितेजसम् ।
अभिवन्द्य निजं धाम नयन्नीशस्तिरोदधे ।। ४२ ।।

मानकञ्जनजीशोऽपि कृत्वा वैवाहिकं विधिम् ।
बन्धुभिः स्वसुतायाश्च पौरैरीरितवैभवः ।। ४३ ।।

विधायान्ते स कैलासमयासीद्भक्तिभावितः ।। ४४ ।।

श्रीमानकञ्जतटिनीशचरित्रमेत-
दत्यद्भुतं पठति यो भुवि यः श्रृणोति ।
[1]एतौ महेशपदभक्तिविधूतायौ
कैलासधाम [2]विशतः स्वकलेवरान्ते ।। ४५ ।।

।। इति श्रीशिवरहस्ये नवमांशे सप्तत्रिंशोऽध्यायः ।।

---

1. सोऽयं महेशपादभक्तिविधूतपापः ।
2. विशति ।

।। अष्टत्रिंशोऽध्यायः ।।

स्कन्द उवाच -

कावेरीशुक्तिनिर्मुक्तमुक्तासैकतमण्डितम् ।
कणमङ्गलनामास्ति नगरं चोळमण्डले ।। १ ।।

चरीवसर्वतोऽप्यत्र शङ्खेष्वग्राधिरोहिषु ।
पाञ्चजन्यकरो विष्णुर्गोपुरेण विडम्ब्यते ।। २ ।।

यत्र सौधविटङ्केषु चषके चन्द्रमण्डले ।
चकोरमिथुनं माध्वीसपीतिं कुरुते निशि ।। ३ ।।

यत्र (तत्र) दायाभिधः कश्चिच्चतुर्थान्वयशेखरः ।
मृणालीति यशो यस्य मरालीलेढिवेधसः ।। ४ ।।

भामिन्या संयुतः शम्भुं शिवभक्त्येव मूर्तया ।
सर्वदाराधयामास तथैव हरकिङ्करान् ।। ५ ।।

हलबाहुल्यसातत्यसर्वङ्कषधनागमः ।
महाभिषेकपूजाभिस्तोषयामासधूर्जटिम् ।। ६ ।।

स रक्तशाकिनीचूतशलाटुसहितं सदा ।
शम्भोर्निवेदयामास नदीनं शालितण्डुलम् ।। ७ ।।

सङ्कल्प्य स दिशन् शम्भोर्नियमेन दिने दिने ।
*शाकिनीचूतशाल्यन्नं परां प्रीतिमुवाह सः ।। ८ ।।

एवं गतेष्वनेकेषु वत्सरेषु महेश्वरः ।
तस्य संशोधयन् भक्तिं विततान दरिद्रताम् ।। ९ ।।

---

* शाकिनी - A field of vegitables.

पूजां पूर्वाद्विशेषेण तथापि कलयन्विभोः ।
वृत्त्यर्थं कृषिमाकार्षीत्परेषांमवसत्सुखी ।। १० ।।

न किञ्चिदात्मने कुर्वन् भृतिप्राप्तेषु शालिषु ।
शिवायैव दिशन् सर्वं निनाय दिवसान्बहून् ।। ११ ।।

प्राप्यते कृषितस्तेन भृतित्वेन शिवाशया ।
केवलं शालयस्तेषु न्यवेदिषत शम्भवे ।। १२ ।।

स्वकीयनिष्कुटे* शाकानुत्साद्य सततं गृही ।
ईश्वराय ददौ सोऽपि तैरेवात्मस्थितिं व्यधात् ।। १३ ।।

क्रमेण निष्कुटे शाकप्रभेदे क्षीणतां गते ।
केवलं वारि तद्दत्तं पीत्वा देहं दधार सः ।। १४ ।।

एवं केवलमम्भोभिर्देहयात्रां प्रवर्तयन् ।
शाकिनी शङ्करायादाच्छालीं चूतशलाटुभिः ।। १५ ।।

स कदचिन्महेशार्थमखण्डितमहाव्रतः ।
शाकिनी नवचूताभ्यां शालितण्डुलमावहत् ।। १६ ।।

महाभिषेकहेतोस्तद्गृहिणी पूजनार्चितम् ।
वहन्ती शनकैः पश्चात् ययौ चारित्रदेवता ।। १७ ।।

चण्डभानु कराघट्टजातस्फोटाविले पथि ।
चचाल सा तदा रन्ध्रे तत्सर्वं न्यपतत्करात् ।। १८ ।।

शालितण्डुलमालोक्य शाकिनीचूतसंयुतम् ।
रन्ध्रे निपतितं खेदादन्तस्तापमवाप सः ।। १९ ।।

---

*निष्कुट- a pleasure grove near a house.

भार्यकरं समालम्ब्य प्रस्खलन् स बिलान्तरे ।
पूजाद्रव्यं समुद्धर्तुं न शशाक करादपि ।। २० ।।

इतःपरं किमेतेन पूजार्थं गमनेन मे ।
व्रतहानेर्वरं जीवं त्यक्तुमैच्छदथैष सः ।। २१ ।।

इति निश्चित्यकर्तव्यं[1] कण्ठं [2]शङ्कुलया हठात् ।
दलयन् संसृतेर्मूलमिवरेजे स कौतुकी ।। २२ ।।

तदा बिलान्तरे शम्भुः पाणिमेकं प्रदर्शयन् ।
चखाद दशनैश्चूतशलाटुं सुरसोल्बणम् ।। २३ ।।

भक्तप्रीत्या महापूजा स्वीकृतेति प्रदर्शयन् ।
अन्तरेव बिले चूतं [3]दर्शन्नाविर्बभूव सः ।। २४ ।।

वृषभारूढमथाद्रीन्द्रकन्यया सह शङ्करम् ।
सभार्यो वीक्ष्य वीक्ष्यान्तर्भावयन् प्राञ्जलिःस्थितः ।। २५ ।।

स्वामिन् जय जयेशानेत्येव स स्तोतुमुद्यतः ।
मौग्ध्यान्मे वीक्ष्य भोज्यं तु श्वभ्रास्थं भुक्तवानसि ।। २६ ।।

शम्भो मां रक्ष वामाङ्गवामभाग विनोदय ।
प्रसीद पार्वतीनाथ भक्तवत्सल पाहि माम् ।। २७ ।।

इति स्थितो दृश्यवपुर्वृषस्थित-
स्त्वयास्यतां[4] दारसखेन मत्पदम् ।
इति ब्रुवंस्तं मिषतां दिवौकसां
परं पदं स्वं परमेश्वरो ययौ ।। २८ ।।

---

1. इति निश्चित्यकर्तव्यः । 2.शकुलया - with a knife.

3. दर्शयन्नाविरभूत् भवः । 4. त्वयेयतां ।

यः शङ्कुलाखण्डितकण्ठ काण्ड-
श्रीकण्ठकारुण्यपदं बभूव ।
तदादिनाम्नां जगदीशभक्ता-
स्तं शङ्कुलादाय इति ब्रुवन्ति ।। २९ ।।

यः शङ्कराराधनभक्तियुक्तां (दात्रीं)
श्रीशङ्कुलाद्रायकथां शृणोति ।
संसारबन्धं स विधूय सर्वं
साक्षात्पदं शाश्वतमेति शम्भोः ।। ३० ।।

स्कन्दः (उवाच) -

चोळेषु शुभकावेरीप्रोतोऽवर्धत शालिषु ।
श्रीविलासपदो देशो दृशोरानन्ददायकः ।। ३१ ।।

हंसाः स्वपन्ति पद्मान्तः कोकिलाश्चूतपल्लवे ।
हल्लकीकुड्मले भृङ्गा यत्र मीनाश्च शैवले ।। ३२ ।।

सह्यदाम्बुरवोत्क्षिप्ताः शङ्खा रम्भादलोद्धृताः ।
पूगाग्रगूढसच्छायनागवल्ली विराजिते ।। ३३ ।।

तस्मिन् देशे मङ्गलाख्ये ग्रामे नियतमङ्गले ।
गोनाथ इत्यभूत् कश्चिद्गोपालकुलपालकः ।। ३४ ।।

भवे भक्तिं स्थिरां बिभ्रद्भूतिलेपनभूषणः ।
व्यभावयत्स गोनाथो धेनूः शतसहस्रशः ।। ३५ ।।

सञ्चार्य शाद्वलवने पाययित्वा नदीपयः ।
रक्षन् दुष्टमृगेभ्यश्च गवां कुलमपालयत् ।। ३६ ।।

गावो वत्साः पयोहीना गर्भवत्यश्च दोहिनीः ।
यूथपोतवृषैर्युक्ता वृद्धाश्च तरुणास्तथा ।। ३७ ।।

ताः स पालयितुं गोपान् गोष्ठे गृष्टीः पृथक् पृथक् ।।
नियुज्य देव पादानां वेणुना गातुमुद्ययौ ।। ३८ ।।

वेणौ सुषिरशास्त्रोक्तं रन्ध्राण्यष्ट विधाय सः ।
आदिरन्ध्रं मुखे न्यस्य रन्ध्रेष्वन्येषु चाङ्गुलीः ।। ३९ ।।

व्यापारयन्यथास्थानं तानसप्तस्वरान्वितम् ।
देवेशं मनसा ध्यायञ्जगौ पञ्चाक्षरं मनुम् ।। ४० ।।

भावावेशवशं विश्वं कृत्वा स्थावरजङ्गमम् ।
तोषयामास देवेशं वेणुनादामृतेन सः ।। ४१ ।।

स कदाचिद्वत्सरज्जुः वल्लिनीकेशरज्जुभिः ।
नव्यद्देतस्य कुसुममेकपार्श्वं समुन्नतम् ।। ४२ ।।

तूलिकाबन्धने रम्ये निवेश्याह्वानश्रृङ्गकम् ।
कंदलं कुसुमं कर्णे नह्यन्फाले त्रिपुष्ड्रकम् ।। ४३ ।।

वक्षोल्लसत्कुन्दमालाभृङ्गगीतमहाभुजः ।
वल्कलोपरि संवीतव्यालम्बिक्षौमपल्लवः ।। ४४ ।।

वेणुयष्टिलसत्पाणिः सपादुकपदद्वयः ।
गौर्गोभिः समस्ताभिर्गोनाथो निर्ययौ वहिः ।। ४५ ।।

इन्द्रगोपाधरा चञ्चद्विद्युद्दामपयोधरा ।
श्रृङ्गालका कुन्दहासा वनं वर्षावधूरगात् ।। ४६ ।।

गोष्ठे तत्र चरन्तीषु गोषु संभृत यष्टिषु ।
पार्श्वेचरन् स गोनाथः कृतमालवनं ययौ ।। ४७ ।।

तत्र दृष्ट्वा जटादीर्घलम्बपुष्पावलिं सुधीः ।
आरग्वधं शिवं मत्वा तस्थौ तल्लग्नमानसः ।। ४८ ।।

बिल्वैर्नल्वप्रमाणैस्तैस्तत्फलैश्च पचेलिमैः ।
कुर्वन्स्वोदरपूर्तिं स गोपः क्षौद्राप्लुतैस्तथा ।। ४९ ।।

गोनाथो भूतनाथस्य गायन् पञ्चाक्षरं मनुम् ।
वेणुनादादृतं विश्वं गवां गणमतन्द्रितम् ।। ५० ।।

स्तब्धकर्णोद्धृतं पुच्छं तृणवक्त्रस्रुतस्रवम् ।
वत्सानप्युज्जिहन्त्यस्ता स्तमेवानु परिश्रिताः ।। ५१ ।।

स सप्तस्वरतत्कालरागैः पञ्चाक्षरं मनुम् ।
गायन् जिगाय गोनाथः सर्वान्वैणविकान्भुवि ।। ५२ ।।

महद्भिर्मध्यमैःकान्तैर्माधुर्यपरिबृंहितैः ।
वर्णभेदैर्मनोहारिरागतालक्रमान्वितम् ।। ५३ ।।

व्यक्तं मानादिविन्यासगतिवैचित्र्यसंभृतम् ।
विष्वग्विस्तारयामास रागमानं गतिक्रमम् ।। ५४ ।।

प्रारब्धं तत्र रोमन्थं प्रस्मरन्ति स्म धेनवः ।
छायावृक्षेषु दिग्वातावधूतेषु पयोधिषु ।। ५५ ।।

संविशन्तीषु मध्याह्ने मध्ये वत्सावृतासु च ।
वत्सा मातुः स्तनं हित्वा क्षरत्क्षीरं मुखस्थितम् ।। ५६ ।।

मृगास्तृणानि विजहुस्ताण्डवानि शिखण्डिनः ।
विश्वं तद्गान विवशं चित्रार्पितमिवाभवत् ।। ५७ ।।

पातलगाः पार्वतीया नाकिनश्च नभश्चराः ।
तद्गानश्रवणात्सर्वे विवशा विस्मयं ययुः ।। ५८ ।।

एकात्मभावात्तद्वेणुनिनादेन ह्रताशयाः ।
सहजं वृषमुत्सृज्य गावो गोपं समन्वयुः ।। ५९ ।।

मन्दवायूद्धताः स्तब्धा नद्यास्स्तिमितरंहसः ।
निस्तरङ्गाः समुच्चेरुस्तद्वेणुनिनदश्रवाः ।। ६० ।।

एकरूपेन्द्रियग्रामवृत्तिवैचित्र्यमैक्ष्यत ।
आगन्य स्वात्मजस्नेहविवशा गोप संयुताः ।। ६१ ।।

तद्वेणुनादो देवस्य श्रवणान्तिकमागमत् ।
देव्याः सहृदयोल्लासि कैलासस्थापिश्रृण्वते ।। ६२ ।।

इन्दुर्नन्दिजटा चूडो वियतोऽवतरद्भुवम् ।
तद्वेणुनादैकचित्तैरेणैर्गलितवीक्षणैः ।। ६३ ।।

सेवितो गायतस्तस्य पञ्चाक्षरमनोहरम् ।
गोनाथस्य पुरस्तस्थौ स्तुवतो नटनायकः ।। ६४ ।।

देवोदयाररसैः सिञ्चन् साञ्जलिंभक्तमागतम् ।

ईश्वरः (उवाच) -

गोनाथ *वेणुनादोत्थ तव पञ्चाक्षरश्रवात् ।। ६५ ।।

---

* तव वेणुगादोत्त्थ पञ्चाक्षरश्रवात् इत्यर्थे एवं असंगतः प्रयोगः -

आगतोऽस्म्यद्य कैलासात् अद्रिकन्यायुतोऽस्म्यहम् ।
गोभिस्सहैभिर्गोपस्त्वं समायाहि मदन्तिकम् ।। ६६ ।।

सदाश्रोतुमिमं नादं मम धाम्नीति सोऽदिशत् ।
गोनाथः साञ्जलिस्तस्थौ गोभिः सह शिवाग्रतः ।। ६७ ।।

देवेषु देवो विकिरस्तु पुष्पा-
ण्यधीतवेदेषु पठत्सु वेदम् ।
गोनाथवेणुक्वणितं स श्रृण्वन्
विश्वाधिको हेमसभां विवेश ।। ६८ ।।

वेणुनादविवशीकृतेश्वरं
गोपतेश्चरितमेतदादृतम् ।
यः श्रृणोति पठति स्मरत्यसौ
शाम्भवं पदमुपैति शाश्वतम् ।। ६९ ।।

।। इति श्रीशिवरहस्ये नवमांशे अष्टत्रिंशोऽध्यायः ।।

।। एकोनचत्वारिंशोऽध्यायः ।।

स्कन्द उवाच -

सुकीर्तेर्मूर्तिनाथस्य वर्तनं कथयामि वः ।
यः श्रीमान् पाण्ड्यदेशेऽस्ति तत्तद्वर्षक्रमोक्ततः ।। १ ।।

बहुश्रुतजनावासो यः प्रत्यक्षसुरालयः ।
यत्र वेणुषु वन्येषु ताम्रपर्णीयुतार्णवे ।। २ ।।

स्त्रीमुखेषु च मुग्धेषु मौक्तिकानि चकासति ।
मन्दानिलं चन्दनाद्रिबन्धुभृङ्गानुसन्ततम् ।। ३ ।।

सुखे यः सुखदं तच्च द्रामिडं वाङ्मयामृतम् ।
तत्रास्ति मधुरा नाम पुरी पाण्ड्यपरिष्क्रिया ।। ४ ।।

यस्यां परिहरन्ति श्रीलावण्यं हरिणीदृशः ।
यत्र सौधे चरन्तीनां सुभ्रुवां तटितामपि ।। ५ ।।

तारल्येनैव भूयेत भेदवादपटीयसा ।
यत्र सत्फलकस्थास्नुकविद्रमिडसूक्तयः ।। ६ ।।

लीलायुतोद्वलद्वाणीकबरीगन्धबन्धवः ।
तत्र कश्चिद्वणिग्वंशमुक्तामणिरभून्महान् ।। ७ ।।

मूर्तिनाथाभिधो यस्य ब्रह्म सौधसुधाशयः ।
वणिक् श्रीकुलधौरेयः शम्भुपादाम्बुजं परम् ।। ८ ।।

*दृढमालम्ब्य चिन्तेन श्रीकैङ्कर्यं मुदाऽतनोत्
यः श्रीहालास्यदेवस्य पूजार्थं दिव्यसौरभम् ।। ९ ।।

---

* चिन्तया दृढमालम्ब्य ।

द्वीपान्तरात्समानीतमर्पयामास चन्दनम् ।
एवं दिशति पाटीरं भारवत्परिमलोर्मिलम् ।। १० ।।

शफराक्षीसनाथस्य मूर्तिनाथो महेशितुः ।
कश्चिदान्ध्रमहीनाथः कण्डूलभुजमण्डितः ।। ११ ।।

विजेतुं सह सेनाभिरयासीन्मधुरां प्रति ।
यत्सेनारजसा सप्तसमुद्राः शोषिताः पुनः ।। १२ ।।

गन्धद्विरदगण्डान्तर्गलद्दानेन पूरिताः ।
तद्धाटिविघटद्घोटी चञ्चत्खुरपुटीरजः ।। १३ ।।

पङ्केरुहत्वमानीतं नभोगङ्गापयोरुहाम् ।
यत्पदातिपदाक्रान्तक्ष्मामण्डलमहीश्वरः ।। १४ ।।

उद्वोढुमक्षमः क्रीडाकमठेन विमूर्छितः ।
मधुरां साहवां कुर्वन्नग्रहीदान्ध्रभूपतिः ।। १५ ।।

चतुरङ्गमहीपालचूडाचुम्बितपादुकः ।
सामन्तजन्यसम्भूतपापपिञ्जरिताशयः ।। १६ ।।

जैनशास्त्रप्रवृत्तोऽभूत्पालयन्पाण्ड्यमण्डलम् ।
पञ्चास्तिकायषड्द्रव्यसत्वतत्त्वार्थविन्नृपः ।। १७ ।।

रत्नतन्त्रपरामर्शी जैनतन्त्ररतोऽभवत् ।
स पञ्चपरमेष्ठिश्रीचरणाम्भोरुहार्चकः ।। १८ ।।

सप्तभङ्गीः प्रयुञ्जानो वञ्चयामास वैदिकान् ।
भेदाभेदकथाप्राप्तसर्वसङ्करविभ्रमः ।। १९ ।।

खिलीचकार पाषण्डी वेदमार्गं स वञ्चकः ।
हरिशङ्करपूजायामन्तरायपरम्पराम् ।। २० ।।

आविष्कुर्वन् त्रयीबाह्यानर्चयामास दुर्मतीन् ।
हालास्यपूजामालोक्य मूर्तिनाथः प्रवर्तिताम् ।। २१ ।।

निजालङ्घनं पश्यन् तां विहन्तुं प्रचक्रमे ।
पाटीविक्रयो नास्मत्पट्टणे क्रियतामिति ।। २२ ।।

प्रतिवीथीं समुद्घृष्य जैनघण्टामताडयत् ।
एवं दुर्मेधसा तेन पाल्यमाने जिताध्वनि ।। २३ ।।

मूर्तिनाथो न कुत्रापि लब्धवान् चन्दनं विभोः ।
पर्यटन् परितः क्रेतु पाटीरं पण्यवीथिकाम् ।। २४ ।।

श्रान्तो भूत्वा विभावर्यां प्राविक्षद्गिरिशालयम् ।
चन्दनालाभखेदेन तत्र शाणोपले करम् ।। २५ ।।

पेषयामास सङ्क्षुण्णत्वगासीन्मध्यभागतः ।
सम्यक् सङ्क्षुद्यमानेऽन्तर्धारालरुधिरे करे ।। २६ ।।

दयालोराज्ञया शम्भोर्वागासीदशरीरिणी ।

वाणी -

हे मूर्तिनाथ मा मैवं नीयतां साहसार्भटी ।। २७ ।।

मदाज्ञया त्वमेवास्य पाण्ड्यदेशस्य भूपतिः ।
भूत्वा जैनान्निराकृत्य प्रतिष्ठाप्य त्रयीपथम् ।। २८ ।।

शैवसिद्धान्तमुद्दीप्य मत्पूजा क्रियतां त्वया ।
अधुनैव दुरात्मासौ पञ्चकायपतिः परैः ।। २९ ।।

निरुद्धः सन् समं जैनैर्निरयं विशतादिति ।
श्रुत्वाशरीरिणीं वाणीं विस्मेरहृदये सति ।। ३० ।।

तस्मिन्नारुरुधे शत्रुर्बलेन मधुरापुरीम् ।
सन्निरोधासहिष्णुः सन् पाषण्डधरणीपतिः ।। ३१ ।।

सैन्यैर्नियन्त्रणोद्योगैर्निजान्निरगमत्पुरात् ।
शिवभक्तिजुषां पुंसां स्थितिर्विद्यादिवेति सः ।। ३२ ।।

तत्प्रदर्शयितुं प्राप सङ्कुलं समराजिरम् ।
वञ्चकस्य महीपस्य शत्रुरुद्धस्य तस्य यः ।। ३३ ।।

इति शेपुर्जना भूपं पांसुवर्षेण शाङ्कराः ।
नरके पतिते तस्मिन् शोकार्ते तत्सुहृद्गणे ।। ३४ ।।

साक्षादक्षीयत तदा तद्वृत्तिरिव तामसी ।
अह्नायाह्नामधिपतौ पूर्वाद्रिं भूषयेद्यथा ।। ३५ ।।

कृतौर्ध्वदेहिका राज्ञः सचिवाः समचिन्तयन् ।
भूनाथेन विना लोकः कायो जीवात्मना यथा ।। ३७ ।।

क्षीयते ह्यस्य राज्यस्य रक्षिता को भवेदिति ।
*बद्धनेत्रश्च करटी मुक्तो यत्स्कन्धगो भवेत् ।। ३८ ।।

स वै महेशदत्तेन पाल्यतामवनीतलम् ।
गजेन स्कन्धरोप्यो यः स भूयत् पृथिवीपतिः ।। ३९ ।।

इति निश्चित्य सिद्धार्था मन्त्रिणस्ते मिथोऽभवन् ।
सिताभ्रचयसङ्काशं भद्राकारं महागजम् ।।
समानीय कुथास्तीर्णं पथा तेनाप्यवासृजन् ।। ४० ।।

---

* बद्धद्विनेत्रकरटी मुक्तो ।

ऊचुस्ते मन्त्रिणस्तस्य मन्त्रिणः सिन्धुरेशितुः ।

मन्त्रिण ऊचुः -

भद्रानय भुवोभ्रद्रं गोप्तारं गुणवत्तरम् ।। ४१ ।।

इति तन्नेत्रमाबद्ध्य इभं गिरिनिभं शुभम् ।
स द्विपः क्षौमबद्धाक्षः क्षरद्गण्डश्चरन् पुरीम् ।। ४२ ।।

विश्रृङ्खलः श्रृङ्खलाभिर्घोषयन् रोदसी तदा ।
प्राप हालास्य नाथस्य गोपुरं द्योतिताम्बरम् ।। ४३ ।।

सिञ्चयन् पुष्करजासारं मदगन्धितदिक्पथः ।
मूर्तिनाथोऽपि देवस्य निशि प्रोक्तां स्मरन् गिरम् ।। ४४ ।।

रक्षिता स्यां क्षितेरस्यास्त्र्यक्षाज्ञामे गरीयसी ।
शिवालये स्थिरं तत्र स्थाणुमूर्तिमिव स्थितम् ।। ४५ ।।

स प्रविश्य गजेन्द्रोऽपि भुवो भाग्येन भूयसा ।
प्राप कक्षा मणिं स्पृष्ट्वा क्षितिस्थं स्कन्धमानयत् ।। ४६

उदयस्थरविप्रख्यं मूर्तिमन्तमिवानलम् ।
गजस्कन्धस्थितं नेमुःपौरा हृष्टाश्च मन्त्रिणः ।। ४७ ।।

श्रृङ्गदुन्दुभिशङ्खाश्च पटहाश्चापि दध्वनुः ।
परे शुश्रुविरे श्राव्या वाचो माङ्गल्यसंयुताः ।। ४८ ।।

ववृषुः सुमनोलाजैर्नार्यः सौधगतास्तदा ।
द्विपेन्द्रादवतार्यैनं मन्त्रिणो मान्यदर्शनम् ।। ४९ ।।

तेन ते विविशुः सार्धं मकुटार्पणमण्टपम् ।
तत्र सिह्मासने दिव्ये रत्नमालापरिष्कृते ।। ५० ।।

आरेभिरेऽभिषेक्तुं तं मानतांनीतिमत्तरम् ।
कुण्डेषु पण्डितास्तेषु सम्यक्प्रज्वलितेऽनले ।। ५१ ।।

जुहुवुर्मङ्गलं हव्यं मन्त्रपूतं महीसुराः ।
नदत्सु भद्रवाद्येषु सोऽभिषिक्तो विधानतः ।। ५२ ।।

आलोक्य सचिवान् पौरान् मूर्तिनाथो वचोऽब्रवीत् ।
हित्वाऽहितमतं शैवं शासनं पाल्यतामिति ।। ५३ ।।

ते स्वामिन् यत्त्वयादिष्टं तत्कुर्म इति चाब्रुवन् ।
गोप्ता स्यां लोकतन्त्रस्य यद्यहं दीप्तभूषणम् ।। ५४ ।।

कोटीरं शिवमुद्राङ्कजटाकोटीरमेव मे ।
इत्युक्त्वा(क्ता) मन्त्रिणस्तेन प्रणम्यैनं त्वया प्रभो ।। ५५ ।।

सम्यगादिष्ट एवायं क्रम इत्यनुमेनिरे ।
स भद्रवाद्यो मूर्तीशो जटामकुटमण्डितः ।। ५६ ।।

नन्तुं श्रीहालवक्त्रेशं[1] गजारूढः स निर्ययौ ।
[2]वीथिना विधिना चाद्याप्यदृश्यं चन्द्रशेखरम् ।। ५७ ।।

नत्वा शिवं मूर्तिनाथः शुभवीथ्यां ययौ पुनः ।
प्राप्य राजगृहद्वारं युक्तं कल्याणलक्षणैः ।। ५८ ।।

गलन्मदझरीगण्डाद्गजादवततार सः ।
भास्वानिवोदयं भास्वन्महार्हमणिमण्टपम् ।। ५९ ।।

स सिह्मासनमध्यास्त रामाचामरवीजितः ।
भुजेन वलयं भूमेश्छत्रच्छाये दधौ च सः ।। ६० ।।

---

1. हालवक्त्रेशं = हालास्यानाथमित्यर्थः ।

2. वीथिनम् - a row, aline.

जहुः सर्वे च दर्दान्तं सिद्धि[1] श्रीभस्मपालकः ।
जगतो मूर्तिनाथोऽयं जननाथ इति स्मृतः ।। ६१ ।।

स रामाभोगविमुखो विहितेन्द्रियनिग्रहः ।
शासनं वर्धयञ्छैवं शशास सुचिरं महीम् ।। ६२ ।।

पादानतैः परनृपैः परिषेव्यमाणो
रक्षास्तलोकदुरितोनृजकञ्जकात्मा ।
कमारिदास्य परिपूर्णकृपाधिपत्यः
काले जगाम शिवधाम स मूर्तिनाथः ।। ६३ ।।

मूर्तिनाथचरितं स्मरन्ति ये
कीर्तयन्ति शिवभक्तिमूर्तयः ।
मूर्तिलेशरहिता वसन्ति ते
कार्तिकेयजनकान्तिके सदा ।। ६४ ।।

।। इति श्रीशिवरहस्ये नवमांशे मूर्तिनाथचरितं नाम
एकोनचत्वारिंशोऽध्यायः ।।

1. दुदार्न्त सिद्धान्तम् ।

।। चत्वारिंशोऽध्यायः ।।

स्कन्द उवाच -

स्कन्दनाथचरित्रं ते निबोध मुनिसत्तम ।
ज्योतिःस्फुरद्ररत्नमौलिचोलेषु प्रथितोऽभवत् ।। १ ।।

विषये सह्यजाङ्कस्थसम्भवत्सस्यसम्पदि ।
शरण्यग्राम इत्यस्ति शालिछायासमन्वितः ।। २ ।।

पुष्पोद्यानस्फुरत्पार्श्वो दीर्घदीर्घिकया वृतः ।
यत्र सच्चित्तविमलप्रभ भस्मप्रभोदयैः ।।
न परं तिमिरं नैशं धवलं भ्रमवानपि ।। ३ ।।(?)

भृङ्गाक्रान्तं पुष्पमुखं मधु यत्र न केवलम् ।
मुञ्चन्ति पञ्चमोद्गीतं केकीशुकमुखोद्गतम् ।। ४ ।।

यत्राब्जमकरन्दस्था भृङ्गागानेन केवलम् ।
तद्गानाकर्णनोन्मुक्तमृगरोमन्थमन्थितम् ।। ५ ।।

तस्मिन् श्रीशरणग्रामे *स्कन्दाख्योऽभूद् द्विजोत्तमः ।
फणिभूषपदे भक्तः प्रबोधाम्भोधिचन्द्रमाः ।। ६ ।।

सरोजपत्रनिद्राणकुलीरोद्बोधकादिभिः ।
मीनोद्भटैः स्फुरत्क्षेत्रसेतौ तस्मिन् कृतस्थितेः ।। ७ ।।

वृषवाहस्य देवस्य पादावस्य तपोनिधिः ।
तं पुष्पैस्तज्जटाजूटयोग्यैः स्कन्दः सदार्चयत् ।। ८ ।।

---

* श्रीस्कन्दनाथचरितं निबोध मुनिसत्तम - ते इति अत्र सङ्गच्चचे ।।

पुष्पाणि गङ्गोडुपतिसत्कपर्दोचितानि सः ।
पृथक् पृथक् संमाहृत्य न्यस्य पुष्पकरण्डके ।। ९ ।।

स प्राप मालाग्रथनभवनं भुवनेशितुः ।
फलके पुरतः शुद्ध आसीनो नियतः क्वचित् ।। १० ।।

स पुष्पाणि विभज्याथ मालाः कर्तुं प्रचक्रमे ।
स वृत्तकेसरदलोद्दण्डनद्धनिकुञ्चितः ।। ११ ।।

लम्बिनीश्च यथा शिल्पसृजो(स्रजो)ऽबध्नात् द्विजोत्तमः ।
स ताभिराभिरात्मेशमौलिसङ्गतहर्षभूः ।। १२ ।।

भक्त्याऽऽनर्च शिवं जिह्वान्यस्तपञ्चाक्षरीमनुः ।
हेमपात्रे द्विजास्तन्यमास्वादितवतः प्रभोः ।। १३ ।।

ज्ञानसम्बन्धनाम्नोऽथ भक्तस्याभूद्द्विजः सखा ।
विरिञ्चिमाधवादृष्टमौलिमूलार्चने रतः ।। १४ ।।

नमः शिवायेति जपन् अवर्तत शिवाश्रमे ।
स्तोत्रेण स्तोत्रविन्मुख्य श्रीपञ्चाक्षरलक्ष्मणा ।। १५ ।।

शिवमभ्यर्च्यहृष्टात्मा तुष्टावाभीष्टदायिनम् ।

स्कन्द उवाच -

नमः शिवाय निर्गुणाय निष्कलाय त्रिशूलिने ।। १६ ।।

नमःशिवाय शन्तमाय श्रुतिगोचराय शम्भवे ।
नमःशिवाय निष्क्रियाय निर्मलाय योगिने ।। १७ ।।

नमःशिवाय सिद्धिमुक्ति हेतवे चिदात्मने ।
नमःशिवाय सोमाय(सोम)सूर्यवह्न्यतीततेजसे ।। १८ ।।

नमःशिवाय वेदवागगोचराय वाङ्मयाय ।
नमःशिवाय सत्यकृत्यसाक्षिणे महात्मने ।। १९ ।।

नमःशिवाय शङ्कराय शक्तिबीजहेतवे ।
नमःशिवाय चन्द्रशेखराय ते कपर्दि ने ।। २० ।।

नमःशिवाय भूतिभूषणायभूति हेतवे ।
नमःशिवाय नित्यशुद्धतेजसे त्रिशूलिने ।। २१ ।।

नमःशिवाय भक्तबन्धमोचकाय शम्भवे ।
नमःशिवाय बिन्दुवाच्यवाचकात्मने नमः ।। २२ ।।

नमःशिवाय नित्यसान्द्रसौख्यसीमतेजसे ।
नमःशिवाय दिव्यबोधरूपिणे परात्मने ।। २३ ।।

नमःशिवाय सत्यवागगोचराय बन्धवे ।
नमःशिवाय भक्तलोकवाञ्छितप्रदायिने ।। २४ ।।

नमःशिवाय *विष्णुवेधसाप्यदृश्यमौलये (मूर्तये) ।
नमःशिवाय भुक्तिमुक्तिदायिने हराय ते ।। २५ ।।

नमःशिवाय शक्तिहस्ततारकारिसूनवे ।
नमःशिवाय पर्वतेन्द्रजार्धदेहभागिने ।। २६ ।।

---

* नमःशिवाय विष्णुधात्रदृश्यमौलिमूर्तये ।

नमःशिवाय सिन्धुरेन्द्रमुख्यवक्त्रसूनवे ।
सदा नमःशिवाय ते सदाशिवाय शम्भवे ।। २७ ।।

सूत उवाच -

एवं देवं स्तुवन् भक्त्या पञ्चाक्षरमयं प्रभुम् ।
शिवाग्रतस्स्तवमिमं भक्त्या देवस्य यः पठेत् ।। २८ ।।

स यातु तत्पदमिति भक्तेन प्रार्तितः सदा ।। २९ ।।

हृद्यः सदा शम्भुसमर्चनेन
स्कन्दः स पञ्चाक्षरमन्त्रसिद्धः ।
तत्प्राप यत्प्राप महेशधाम
सम्बद्धनाथं स विवाहवेषः ।। ३० ।।

इन्दुमौलिपदकिङ्करामृतं
स्कन्दनाथचरितं शुभावहम् ।
चिन्तयन्ति परिकीर्तयन्ति ये
सन्ततं शिवपदे वसन्ति ते ।। ३१ ।।

स्कन्द उवाच -

प्रवक्ष्येऽहं पशुपतेर्व्रतं पशुपतिप्रियम् ।
कावेरीवारिपूरेण वर्धिते(त)क्षेत्रशालिषु ।। ३२ ।।

चोलेषु द्विजधामास्ति पुरं श्रीमुखसंज्ञकम् ।
तस्मिन् गामे पशुपतिरिति कश्चिद्द्विजोऽभवत् ।। ३३ ।।

सच्चरित्रपरिष्कारचतुर्वेदिकुलोद्भवः ।
सदा शाक्वरवाहस्य वामाङ्गे वहतः शिवाम् ।। ३४ ।।

प्रमथेशस्य पादाब्जचञ्चरीको बभूव सः ।
रुद्रसूक्तेन तं रुद्रमधीतेनान्वहं द्विजः ।। ३५ ।।

सकलश्रुतिसारेण स तुष्टावातिभक्तिमान् ।
भस्मरुद्राक्षसम्पन्नो 'दीप्तफालत्रिपुण्ड्रकः ।। ३६ ।।

व्रजन् तिष्ठन् शयानोऽपि दिवानक्तमनन्यधीः ।
कर्मान्तराळेषु सदा रुद्रसूक्तजपादरः ।। ३७ ।।

स कदाचित्सरः प्राप्य मृगपक्षिसमाकुलम् ।
उत्फुल्लाब्जमरन्दोद्यद्भङ्गसम्बन्धगन्धिक(त)म् ।। ३८ ।।

कण्ठदघ्नजले तिष्ठन् पश्यन् भानुस्थितं हरम् ।
मौलिन्यस्ताञ्जलिः प्रेम्णा प्रस्फुरत्पुलकाङ्कुरः ।। ३९ ।।

स्वच्छगङ्गातरङ्गोद्यदिन्दुशेखरभक्तिमान् ।
द्राविताघसमूहेन रुद्रसूक्तेन तुष्टुवे ।
भूसुरः श्रुतिसारेण रुद्रसूक्तेन शाङ्करः ।। ४० ।।

पशुपतिः (भक्तः उवाच) -

नमस्ते रुद्रं वा श्रुतिशिरगमन्योऽहमिषुमान्
नमस्ते बाहुभ्यां तव शिवखरेषूद्यतकरः ।
शरव्या हेतिभ्यां तव वरद सङ्क्षुब्ध धनुषे
तवेशस्याह्वद्या तनुरपि मनो मेऽद्य पदयोः ।। ४१ ।।

हिरण्यो देवस्त्वं नखशिखमुखा ते नयनयोः
तनुं सम्पश्यन् वै भव शिव नमः सोम वपुषे ।
अतोऽणीयञ्ज्यायान् श्रुतिकलितवाक्यार्थकलनैः
नमःशेषी देवः श्रुतिगदित पञ्चक्षरमनोः ।। ४२ ।।

तस्य तादृक्तपोनिष्ठां श्रीरुद्रजपवासनाम् ।
अङ्गीकृत्याथ तद्भावं आनिनायाथ तं सदा ।। ४३ ।।

रुद्रसूक्त जपेनैव सदा पशुपतिर्द्विजः ।
पशुपाशविमुक्तोऽभूत् शिवप्रेमास्पदोऽभवत् ।। ४४ ।।

श्रोतुर्जनस्य शुभदं प्रथितस्य रुद्र-
पूर्वस्य यः पशुपतेश्चरितं श्रृणोति ।
लोकैकनायकमहेशकृपानिधिः सन्
नाकौकिनामपि (कसामपि) दुरासदमेति लोकम् ।।

।। इति श्रीशिवरहस्ये नवमांशे स्कन्दपशुपति चरिते
चत्वारिंशोऽध्यायः ।।

।। एकचत्वारिंशोऽध्यायः ।।

श्वोगन्तुनाम्नो भक्तस्य वैभवं ते वदाम्यहम् ।
ऊर्ध्वाङ्घ्रिसंज्ञके देशे लोकाभिष्टुत कीर्तिमत् ।। १ ।।

धाम द्विजन्मनां श्लाघ्यं यत्सानन्दपरं महत् ।
आददाने शुभे भाति यङ्गोले वाहिनीतटे ।। २ ।।

पल्लवानातपम्लानान् यत्र सिञ्चन्ति भूरुहाः ।
मधुवर्षैस्तदग्रस्था वारिवर्षैश्च वारिदाः ।। ३ ।।

द्विरदा वारिदाकारा यद्ग्रामोपवनेष्वपि ।
धावत्करेणुपादोत्थरेणुभिर्मदजस्रवैः ।। ४ ।।

भुवो यत्र विराजन्ते भवं तं भाविताः सदा ।
केदारसस्यसन्नद्धमौलयो विनयानताः ।। ५ ।।

प्रसादेन महेशस्य प्रासादतलचारिणः ।
एधन्ते यत्र नियतं सदैव गृहमेधिनः ।। ६ ।।

पुरस्य तस्यास्य बहिःकेदारान्तेऽत्र सेतुषु ।
काचित्प्रकाशते श्रेणी निःश्रेणी स्वर्गमार्गिणम् ।। ७ ।।

द्विजानां प्राज्यवेदानां तदन्ते निष्कुटाद्बहिः ।
श्वकुक्कुटैर्विचरिता ह्यन्त्यजानां गृहावलिः ।। ८ ।।

तृणाचितैर्जीर्णगृहैरलाबूलतिकाततैः ।
सूकरप्रान्तचरितैः कुटीरैः सारमेयकैः ।। ९ ।।

दृश्यादृश्यमनुष्येऽपि सारमेयरवाकुलैः ।
सास्त्रपङ्केष्वङ्गणेषु क्रयविक्रयवृत्तिषु ।। १० ।।

उपरिभ्रान्तगृध्रेषु समिद्धोग्रैकगन्धिषु ।
निशावसाने निद्राणे चर्मणास्तृतभूतले ।। ११ ।।

भवन्ति बोधिता यत्र शिवाकुक्कुटकूजितैः ।
मधु पीत्वाऽन्त्यजा मत्ता गायन्तो यत्र निर्भयम् ।। १२ ।।

कश्चिच्छायासु हेरण्ड वृक्षाणां चर्मणास्तृते ।
वन्यधान्यावहननैर्नयन्ति[1] किल बालकाः ।। १३ ।।

शुकमत्स्यावृततले मक्षिकायूथभूषिते ।
[2]पक्कणे निक्वणं नाना श्रृङ्गवेणुकृतस्वनैः ।। १४ ।।

पललारुणितानग्रबालकैर्हस्तभूषितैः ।
ग्रामकर्मकरः कश्चित्तत्र नन्दाह्वयोऽन्त्यजः ।। १५ ।।

जातमात्रसमुत्पन्नभवपादाब्जभावनः ।
नन्दोऽन्यत्कर्म कुत्रापि त्यजन्बाह्यान्मनोरथान् ।। १६ ।।

शिवमेव परं मेने तद्दास्यविहिताशयः ।
कृतस्थितिर्वेतनेनाप्यवर्तत तदान्त्यजः ।। १७ ।।

अन्त्यजोऽपि द्विजं प्राप्य भक्तिं लेभे महेश्वरे ।
भक्तिमेव परं मेने भवस्य भवनुत्तये ।। १८ ।।

दुन्दुभीनां मद्दलानां चर्मयन्मुखबन्धनम् ।
रथकर्षणरज्जूनां चर्मणामपि दायकः ।। १९ ।।

---

1. अहनन Pounding.   2. पक्कण – The hut of a savage.

शम्भोस्तदालयद्वारि पुलकाङ्कितगात्रकः ।
भक्त्या सम्प्रणमन् गायन् भस्मफालो मुदं ययौ ।। २० ।।

स कदाचिद्दरिद्रोऽपि शिवकैङ्कर्यधूर्वहः ।
श्रीकरञ्जवनेशस्य द्वारि देवालयस्य सः ।। २१ ।।

गत्वा स्तुत्वा शिवं नत्वा प्रार्थयामास भक्तिमान् ।

चण्डालः (नन्दः प्राह)

शिवाभिधानरहितं वन्दनं तव मा मास्त्विति ।। २२ ।।

यस्यानन्दनतो नृत्तं वीक्षितुं शङ्करः स्वयम्[1] ।
उमापतिः पुरःस्थं तं नन्दिकेशं तदाब्रवीत् ।। २३ ।।

शिवः (उवाच) -

पार्श्वे त्वया धेनुसुत स्थीयतामित्यशाद्धरः ।
तथा स्थिते द्विजे तस्मिन् देवेशमृजुदर्शनम् ।। २४ ।।

नत्वा स हृष्टस्तद्भेरीमुखचर्मादिकं ददौ ।
मद्दलानां स निर्माणं कृत्वा ध्वनिमथाकरोत् ।। २५ ।।

पुरोगतस्थलं दृष्ट्वा तटाकमखनत्तदा ।
प्रदक्षिणा प्रणामाद्यौर्देवं नृत्तैरतोषयत् ।। २६ ।।

स्वकैः प्रत्युद्गतोवर्गैर्निजं प्राप निकेतनम् ।
इति प्रत्यालयं शम्भोश्चर्मवाद्यान्यथातनोत् ।। २७ ।।

दर्शनोल्लासि हृदयः शिवं तिल्लपुरेश्वरम् ।
विधेर्वशेनान्त्यजोऽपि द्रष्टुं सन्निदधे मनः ।। २८ ।।

---

1. आनन्दनृत्तं नन्दो नः वीक्षतामिति शङ्करः - इति व्यक्तः पाठः ।

रात्रावनायातगतिः श्वोगन्तास्मी त्यचिन्तयत् ।
प्रभो(भा)ते कार्यमार्याणां कुर्वन् रुद्धो हि बन्धुभिः ।। २९ ।।

तिल्लेशो भक्तहृत्पद्मलासोल्लसितमानसः ।
श्वो गन्तास्मीति सञ्चिन्त्य निनाय दिवसान् बहून् ।। ३०

प्राप्तेशभक्तिसन्दोहो नन्दो मुदितमानसः ।
ततः स तिल्लनाथस्य प्रणामोल्लासिमानसः ।। ३१ ।।

अविचार्य निजापत्यं दारान् बन्धूनथान्त्यजः ।
निरगात्कञ्जनगरान्मनो मारुतरंहसः ।। ३२ ।।

अदूराच्च शिवोत्तुङ्गगोपुराणि ददर्श सः ।
सह्यजायां ततः स्नात्वा चिताभस्म विभूषितः ।। ३३ ।।

त्र्यक्षस्य पुरमद्राक्षीत् विस्मयेन स्मयावहम् ।
मल्ली वल्ली सुमल्लीभिर्वेष्टितं तिल्लभूरुहैः ।। ३४

अन्यैः शाखिसमूहैश्च मृगपक्षिगणोज्ज्वलम् ।
अत्यन्तदृप्तशफरीवापीशतविराजितम् ।। ३५ ।।

श्रीतिल्लनगरोपान्तं प्राप शङ्करकिङ्करः ।
तत्रैव नत्वा चोत्थाय स्थित्वोपानं ददर्श सः ।। ३६ ।।

पुराद्बहिः स्थितो नित्यं पुरं चक्रे प्रदक्षिणम् ।
स्थितिं श्रुत्वाहिताग्नीनां त्रिसहस्रद्विजन्मनाम् ।। ३७ ।।

प्रवेष्टुं न मया शक्यमित्यवर्तत सो बहिः । (?)
कृतावासः स्मरेदेवं गोपुरं तद्विलोकयन् ।। ३८ ।।

इति तत्र दिवा नक्तं पुरं चक्रे प्रदक्षिणम् ।
कुर्वन् खिन्नमनाः शिश्ये धिक्कुजन्मेति चिन्तयन् ।। ३९ ।।

नृत्येशदर्शनोत्कण्ठाकुण्ठितात्मजनुस्तदा ।
[1]तदुज्झितमहादेवो भवो भक्तार्तिनाशनः ।। ४० ।।

स्वप्ने प्राहान्त्यजं गत्वा त्यज त्वं वै कलेबरम् ।
लोकाचारपरत्वेन जन्मना ते तनुं त्यज ।। ४१ ।।

त्वं मे भक्तोऽसि नृत्तं मे नित्यमद्य विलोकय ।
सहेमगोष्ठीनिष्ठः सन् नृत्तं तस्मै प्रदर्शयेत्[2] ।। ४२ ।।

द्विजान् तदागतः स्वप्ने हरः प्राह दयाघनः ।

शिव (आह) -

कश्चित्प्रवेक्ष्यत्यनलं तद्भवन्तोऽषद्य पश्यत ।। ४३ ।।

श्रुत्वा शिवाज्ञां ते प्रातर्दृष्ट्वान्त्यजमथो द्विजाः ।

द्विजाः (ऊचुः) -

रे रे शिवाज्ञया साधो त्वत्कृतेज्ज्वाल्यतेऽनलः ।। ४४ ।।

प्रवेष्टुमर्हस्यचिराद्देहमुन्मुच्य पापजम् ।
पुरेऽस्मिन् भक्तवर्याद्य त्वचं जीर्णामिवोरगः ।। ४५ ।।

इति तैः स समादिष्टो हर्षोत्कर्षाश्रुलोचनः ।
कृतार्थोऽस्मीति तानुक्त्वा प्रविष्टोऽग्निं महेश्वरम् ।। ४६ ।।

विचिन्तयंश्च मनसा स नृत्तेशपदाम्बुजम् ।
प्रविष्टमात्रो वह्नौ स उत्पपातोपवीतवान् ।। ४७ ।।

---

1. तच्चित्तज्ञो ।   2. तस्मै नृत्तमदर्शयत् ।

द्विजवर्यवपुर्धृत्वा भस्मरुद्राक्षभूषणः(म्) ।
पुष्पाणि ववृषुर्देवा नेदुर्दुन्दुभयो दिवि ॥ ४८ ॥

तिल्लद्विजाः प्रणेमुस्ते तं द्विजं हर्षनिर्भराः ।
स द्विजोऽपि द्विजैः सार्धं नन्तुमागात्सभापतिम् ॥ ४९ ॥

दृष्टा स तुष्टहृदयो ननर्तानन्दनिर्भरः ॥ ५० ॥

पाहीशान दयानिधान भगवन् हेमोत्तमाङ्गोल्लस-
न्नाट्याडम्बरनिर्जिताखिलजगत्त्रुट्यन्महोड्डुछटम् ।
त्वां दृष्ट्वा मुनयः सुरासुर वराः प्रापुर्विमुक्तिं परां
नो जन्मादिकविभ्रमं भवतु मे त्वत्पादपद्मं प्रभो ।
मच्चित्तभ्रमरः पिपासति हृदा त्वत्पादपङ्केरुहम् ॥ ५१ ॥

इत्युक्त्वा स तिरोधत्त तस्मिन्हेमसभान्तरे ।
भक्तेष्वानन्दमग्नेषु साश्चर्येषु द्विजेषु च ॥ ५२ ॥

स्ततवत्सुरबृन्देषु[1] हर्षप्रोतोत्प्लुतेषु च ।
स तदा प्राप सायुज्यमिज्याद्यैरपि दूरगम् ॥ ५३ ॥

आकाशे भासतः शम्भोः शातकुम्भसभापतेः ॥ ५४ ॥

श्वोगन्तृनाम्नश्चरितं विचित्रं
त्रिणेत्रभक्तिप्रदमुक्तिसारम् ।
श्रृणोति यः सन्ततमादरेण
सभानटेशस्य पदं स याति ॥

॥ इति श्रीशिवरहस्ये नवमांशे नन्दचरित्रं नाम एकचत्वारिंशोऽध्यायः ॥

---

1. स्तुतवत्सु सुरेन्द्रेषु ।

।। द्विचत्वारिंशोऽध्यायः ।।

स्कन्द उवाच -

उक्तं विचारभक्तस्य कथ्यतेऽद्य कथा मया ।
जननीव्यस्तशस्तश्रीवस्तुमत्स्याद्यविस्मृतिः ।। १ ।। (?)

पापानां खण्डनं यत्र मण्डनं च भुवो द्विज ।
[1]डिण्डीरनिभमृत्सारमस्ति तौण्डीरमण्डलम् ।। २ ।।

जननी जीवना नाम सर्वेषां सर्वमङ्गला ।
परिरब्धुं शिवा यत्र चकार सुमहत्तपः ।। ३ ।।

तादृग्देव्यास्तपस्स्थानं भवितुं यत्तपो व्यधात् ।
यत्र सर्वेऽपि मध्यस्था मध्याचाराः प्रतिष्ठिताः ।। ४ ।।

यत्रैव कृतिनः सर्वे सुकृतां राशयो द्विजाः ।
भवन्ति गृहिणो यत्र सदैव द्रुहिणोपमाः ।। ५ ।।

दशनानाविधोद्दामधामप्राकारसंवृता ।
कालिकोज्ज्वलकण्ठश्रीश्रीकण्ठोत्कण्ठया शिवा ।। ६ ।।

द्वत्रिंशद्धर्मगोत्प्रीतिगाथा यत्र च विश्रुता ।
यत्र श्रीकालहरत्यद्रिश्रृङ्गारपुरयोषिताम् ।। ७ ।।

केशसृका[2] व्याधवधूकचलग्ना न याति च ।
वृषारण्ये च पूजार्थं सुराश्चाप्सरसोऽपि च ।। ८ ।।

---

1. डिण्डीर - Foam of the sea.

2. सृका - A kind of garland made of jewels

शबराश्च शबर्यश्च यत्र जाता यशस्विनः ।
श्रीकण्ठशैलश्रृङ्गाग्रसरसीष्वमरीगणाः ।। ९ ।।

विहरन्ति शबर्यो यत्सा च ताण्डीरभून्नतिः ।
गङ्गा गङ्गाधरस्येव मज्जनार्थं नदी तलम् ।। १० ।।

समुद्भिद्योन्नता यत्र नगरे कुलिशाह्वये ।
नद्यद्रिवारिसुरभिस्नानरक्ततपोमया ।। ११ ।।

यत्र क्षीरापगापार्श्वद्वये तीव्रकृषीवला ।
यत्रोद्यानवने वाह्याश्चन्दनामोदिदायवः ।। १२ ।।

रम्भाचम्पकजम्बीर हिन्तालाम्रार्जुनैरपि ।
वेदशास्त्रनहावादैर्वर्धितैर्वह्निधूमकैः ।। १३ ।।

आविर्भवद्वार्षिकाद्या ग्रामाः सङ्ग्रामवर्जिताः ।
यत्र द्विजात्मजा भूत्वा देवी वल्याह्वये पुरे ।। १४ ।।

तपसि स्थितवत्यास्तु दैत्यसंरक्षणादुमा ।
वह्निरूपं शिवं शान्तं क्रौर्यं चक्रे दयानिधिः ।। १५ ।।

शौरिलाभाह्वये शम्भोर्यत्रधाम च सम्मतम् ।
यत्र मुक्तामयाकार श्रीपाशपुरशङ्करः ।। १६ ।।

जगत्प्रसूते यस्यासीज्जननी वेणुवल्लरी ।
यत्राधिपुरमेकान्तमुमाकान्तस्य सम्मतम् ।। १७ ।।

मयूरपुरवाल्मीकिपुरमल्लपुराणि च ।
तुण्डीरमण्डले तस्मिन् वर्णनाशक्यवैभवे ।। १८ ।।

अस्ति सर्वयुगोत्कृष्टा पुरी काञ्चीति विश्रुता ।
सस्यावृतक्षेत्रयुता सर्वलोकाभिनन्दिता ।। १९ ।।

प्रत्यक्षयत्तदाश्चर्यप्रभावाय प्रकाशते ।
आत्मीयं नायकं यत्र दयासारं कुचाश्रयैः ।। २० ।।

उपचारैः समानार्च तैस्तैः श्रुतिसमीरितैः ।
ररक्ष राक्षसत्रस्तां धरित्रीं धर्मगोपनैः ।। २१ ।।

यथामति पुरस्यास्य माहात्म्यमपि वर्ण्यते ।
त्वङ्गद्गङ्गाजटाजूटं कैलासनिलयं पुरा ।। २२ ।।

नत्वा नाथमुमा धर्मानश्रृणोल्लोकनायिका ।
सर्वधर्मात्प्रियं त्वस्मात्तस्य लिङ्गसमर्चनम् ।। २३ ।।

तामर्चनोन्मुखीं किं ते पूजयेत्याह शङ्करः ।
स्मेराननं तदानम्य देवी प्राह तदर्चनम् ।। २४ ।।

देवी (उवाच) -

कर्तुं कामयते चेतस्त्वदुक्तानि दयानिधे ।
दधौ मनस्तथा संवित्साच शम्भोस्तथात्मनः ।। २५ ।।

ततश्च चतुरशीति लक्षजीवात्मनः प्रभोः ।
मुखेन कथितं तत्र वेदमार्गं विवृण्वती ।। २६ ।।

आत्मनायकमानम्य साञ्जलिः साथ निर्ययौ ।
पर्वतेन्द्रश्च तां प्राप्य तस्यै परिजनं ददौ ।। २७ ।।

काञ्चीं सा च ययौ देवी सिद्धविद्याधरस्तुता ।
पद्मनाभमणिस्तत्र प्रणम्यैनामुवाच ह ।। २८ ।।

हरिः (उवाच)

देवी भूतलमेतन्मे भवत्या भवनं शुभम् ।
भवत्विति तदा तस्य वाक्यं चैवान्वमन्यत ।। २९ ।।

सर्वस्य प्राणिजातस्य देवी तत्र विभूतये ।
चन्द्रशेखरमानर्च कृपागर्भमनाः सती ।। ३० ।।

सिद्धःसंरूपि (सिद्धस्वरूपी) सर्वत्र स्वैरक्रीडापरः शिवः ।
तस्यै चात्मानमद्वन्द्वं जगन्मूर्तिरदर्शयत् ।। ३१ ।।

काङ्क्षन्ती मनसा द्रष्टुं कामाक्षीत्यपि सा शिवा ।
पञ्चाक्षरलसद्वाणी प्रवृत्तात्मा तपस्यभूत् ।। ३२ ।।

सहेत किं तदात्मेशः श्रुतमूलं तयैक्षि सः ।
तपःफलं सा दृष्ट्वैव जहौ श्रृङ्गारभावनम् ।। ३३ ।।

शान्ताशं सा प्रणम्यैनं बिम्बोष्ठी लम्बकुन्तला ।
इत्थं मनो दधौ तस्या भक्ता भर्तुः समर्चने ।। ३४ ।।

सा शिवागमसारज्ञा शिवाभ्यर्चनकारणात् ।
पुरस्कृता पत्रपुष्पपाणिभिश्चेटिकाजनैः ।। ३५ ।।

पादाभ्यां पल्लवाभाभ्यां प्राप्योद्यानं स्वयं शिवा ।
पुष्पाणि पूजनार्हाणि तानि हृद्यान्वाचिनोत् ।। ३६ ।।

अभिषिच्य शुभैस्तोयैः कम्पासरिदुपाहृतैः ।
सुगन्धिभिश्चन्दनाद्यैरुपलिप्य च चन्दनैः ।। ३७ ।।

अलङ्कृत्याहृतैः पुष्पैर्धूपदीपादिभिस्तदा ।
हृद्यैर्नैवेद्यजालैश्च फलताम्बूलकैस्तथा ।। ३८ ।।

नीराजनारार्तिकैश्च कर्पूरोज्जवलदीपकैः ।
प्रदक्षिणाप्रक्रमणैः स्तुत्या देवमतोषयत् ।। ३९ ।।

पार्वती (उवाच) -

शम्भो रसालवरमूलग हस्तशूल
व्यालाङ्गमाल जितकाल ललामसोम ।
गङ्गाविशालरयचुम्बि जटालवाल
श्रीकण्ठमूल भजतामघहारशील ।। ४० ।।

एकाम्रमूलनिरयं भुजगाधिराज-
राजत्किरीटवलयं सदयं सदैव ।
अत्यन्तमेव भजमान जनान्तरङ्गे
नृत्यन्तमाशु गिरिशं परिशीलयामि ।। ४१ ।।

एकाम्रमूलनिलयं भजतामनेक-
जन्मार्जिताघविनिवारणकारणं तत् ।
तेजः श्रयामि शिवमद्य शिवेतराणां-
निर्णोदनैकनिरतं भरितं जगत्याम् ।। ४२ ।।

एकाम्रमूलनिलयाय दयालयाय
संसारघोर वरुणालयतारणाय ।

तापत्रयोपशमनाय सकृन्नराणां
लोकत्रयैकविभवे करवै नमस्याम् ।। ४३ ।।

एकाम्रमूलनिलयादिनवीतिहोत्र-
सोमाम्बकादखिल[1]पूर्वसुरान्तकर्तुः ।
मन्ये नवान्यदिहदैवतमादिमध्य-
जगतोनाशङ्करात् शङ्करात् ।। ४४ ।।
(हीनादथान्तरहिताद्वरचन्द्रचूडात् ।।)

सूतः

जगन्माता पतिं स्तुत्वा कालेकालेऽन्तकान्तकम् ।
नायके चूतमूलस्थे गाढप्रेम जगच्छ्रिये ।। ४५ ।।

पाण्योरिदं फलमिति शिवमानर्च सान्वहम् ।
सप्तार्णवीमिवोत्कूलामोघैः कम्पानदीभरैः ।। ४६ ।।

दृष्ट्वा स्वपतिना हृष्टा जलौघं कामलोचना ।
अनेनात्याहितं शम्भोः स्यादिति व्यथिताऽभवत् ।। ४७ ।।

कराभ्यां लिङ्गमालिङ्ग्य तटिनीतट विप्लवे ।
ब्रुवन्ती नाथनाथेति मन्मथान्तकमीश्वरी ।। ४८ ।।

कूले कम्पातरङ्गिण्या मूले चूतमहीरुहः ।
दुकूलसंवृताङ्गी सा [2]मूललिङ्गं परिष्वजे ।। ४९ ।।

कामाक्षी तत्र कामारिं चकार कुचमुद्रितम् ।
शिवाकुचाभ्यामाश्लिष्टो गाढं दृढतरो मुहुः ।। ५० ।।

---

1. पूर्वसुर - असुर । 2. तल्लिङ्गं परिषस्वजे ।

कम्पा[1]शम्पाभवेगेन क्वणत् कङ्कणहस्तया ।
स्थाणुर्मुदुलतां प्राप्य शिवः स्मेरमुखश्रिया ।। ५१ ।।

करीन्द्रचर्मवसनः कर्कशाङ्गोऽपि कामजित् ।
प्रादुरासीच्छिवाश्लिष्टः शिपिविष्टोऽष्टमूर्तिमान् ।। ५२ ।।

दिव्यां देवदयां दृष्ट्वा परिरम्भणसम्भवाम् ।
नवीनपाणिग्रहणं शृाङ्गसङ्गं च शाङ्करी ।। ५३ ।।

देवैः प्रहर्षितो दृष्टः पुष्पोत्कीर्णैरवर्ष्यत ।
अन्तर्हृताशयाः सर्वा जहृषुर्जीवकोटयः ।। ५४ ।।

वर्षत्सु देवपुष्पेषु नेदुर्दुन्दुभिकोटयः ।
कम्पानदी ननामैनामम्बिकामनुकम्पिनीम् ।
मृदुलस्वच्छसौभाग्यवरवेषः सदाशिवः ।। ५५ ।।

शिवः आह -

वरं देवि वृणीष्वेति प्राह देवी तदा ब्रवीत् ।
प्राञ्जलिः पादयोः शम्भोः प्रणता शाम्भवी तदा ।। ५६ ।।

देवी उवाच -

निरुद्धसरिदोघेन न समाप्तं त्वदर्चनम् ।
वर्तयिष्यामि तद्भूयो मत्प्रियस्त्वं प्रसीद मे ।। ५७ ।।

अश्मनीसीमसम्पत्यां काञ्चीपुर्यां दिवानिशम् ।
करिष्याम्यखिलान्धर्मान् भवत्पादलसन्मनाः ।। ५८ ।।

क्रियावन्तोऽत्र सर्वे स्युः फलैधर्मैश्च संयुताः ।
इति लोकेशमात्मेशं ययाचे शैलनन्दिनी ।। ५९ ।।

---

1. शम्पा - Lighting

भोगीन्द्रभूषणो देवस्तस्यै सा (स्वा)र्धाङ्गमादधत् ।
भुवनत्रयबीजार्थं सिद्ध्यर्थं धर्मसन्ततेः ।। ६० ।।

शालिप्रस्थद्वयं देव्यै ददुः सर्वेऽपि शाङ्कराः ।
निर्दोषाः स्युः सुकर्माण इति भूयो वरं ददौ ।। ६१ ।।

सूतः (उवाच) -

लब्ध्वा वरान् सा गिरिशाद्गीरीन्द्रजा
त्रिलोकसंरक्षणकारणाय ।
श्रीकामकोष्ठे विभवैकधाम्नि
द्वात्रिंशतं पालयति स्म धर्मान् ।। ६२ ।।

अनिर्वाणैश्च नम्लानैः फुल्लहल्लकमण्डितैः ।
शरदादौ स्थापितोऽयं चकास्ति शरदां शतम् ।। ६३ ।।

व्यनक्ति द्विविधं चापि लोकानां भाविलक्षणम् ।
प्रत्युद्दामेव कल्हार त्रयमप्येव मेव ते ।। ६४ ।। (?)

इत्याश्चयकरी तत्र जागर्त्यखिलनायिका ।
दुर्विनिघ्नमिदं तीर्थं तीर्थं देवाभिरक्षितम् ।। ६५ ।।

यत्रास्ते कामकोष्ठस्य दक्षिणे कच्छपेश्वरः ।
महीनिदर्शनं तीर्थमस्ति लोकैकविश्रुतम् ।। ६६ ।।

काञ्चीधामायितोऽम्भोधिः भूचक्राकारयोगतः ।
रक्षन्त्याः सर्वधर्माणि देव्याः श्रीमन्दिरे शुभे ।। ६७ ।।

कामकोष्ठे सदा हृष्टे प्रादक्षिण्येऽर्कचन्द्रकौ ।
शश्वच्छायाविपर्यासाद्दिशः प्राच्यादिषु क्रमात् ।। ६८ ।।

निर्णेतुं न हि शक्यन्ते सर्वैरद्यापि मानवैः ।
कामाक्षी रक्षते तत्र धाम्नि कम्पासरित्तटे ।। ६९ ।।

कामिकाञ्ची तरुच्छाया सन्ध्ययोरविकारिणी ।
यत्र कृत्वा तपो देवैः कृतकृत्यैर्महर्षिभिः ।। ७० ।।

समर्चितान्यनेकानि शिवधामानि सत्तम ।
शरासनमनालक्ष्यं सांश्चर्यं तत्र तिष्ठति ।। ७१ ।।

तद्‌दृश्यते यैर्मनुजैस्तेषामायुर्विवर्धते ।
पुण्यश्रावकमाङ्गल्यतीर्थान्यन्यानि सन्ति च ।। ७२ ।।

एकनालाम्रपत्रा च कापि रक्तसुपद्‌मिनी ।
आश्चर्यकारिणी फुल्लहल्लकारुणगन्धिला ।। ७३ ।।

मज्जतामघहन्त्री सा पुण्यदात्री ससौरभा ।
बिलं तत्र प्रविशतां स्वर्गमार्गगतिप्रदम् ।। ७४ ।।

तत्र पालयति द्वारं पञ्चहस्तो गजाननः ।
षडाननः शक्तिधरो बाह्यप्राकाररक्षकः ।। ७५ ।।

त्रिशूलपाणिरम्भोदनिभो मुखरनूपुरः ।
निशीथे रक्षति चरन् भैरवो भैरवारवः ।। ७६ ।।

यत्र पश्यति भूतानि प्रविष्टस्तं पुनः पुरे ।
न पश्यामि यथा धाम न तद्यत्रापि दृश्यते ।। ७७ ।।(?)

शिला काचन तत्रास्ति मुक्तिदानैकवर्त्मति ।
यत्किञ्चित्पतितं तस्यां वस्तु तत्कनकायते ।। ७८ ।।

तत्र पीठानि देव्यास्तु सप्त सन्ति महीतले ।
देवोऽनुकम्पमेकाम्रमूले तिष्ठत्युमार्चितः ।। ७९ ।।

कदाचित्तत्र कालाख्यश्चोलेन्द्रस्तत्र आगतः ।
शिवकैङ्कर्यवनिष्णातो निधित्सुः काञ्चनाचलम् ।। ८० ।।

काञ्चीमालेस्य हृष्टात्मा काञ्चीं तां मणिसद्युतिम् ।
तां पुरीं प्राप्य कामाक्षीकामुके[1] भक्तिमानभूत्[2] ।। ८१ ।।

यत्र विष्णुर्महादेवं समाराध्यावसत्सदा ।
तां योजनप्रमाणेन दिशासु चतसृष्वपि ।। ८२ ।।

अकरोत्परिघाकारहर्म्य प्राकारगोपुरम् ।
नानावर्णजैः पूर्णां कृत्वाश्चर्यकरीं पुरीम् ।। ८३ ।।

ततो देवाज्ञया मेरोर्निदधे निजलाञ्छितम् ।
तत्र काञ्चीपुरे कश्चित् रजकान्वयशेखरः ।। ८४ ।।

शिवतद्भक्तपादाब्जसेवनस्थिरमानसः ।
विचारभृत्यनाम्नाऽभूत् भक्तवस्त्राण्यनेकधा ।। ८५ ।।

निर्णेजकः सदा स्त्रीभिर्नेतरेषां कदाचन ।
स भक्तानां यदा देशवासिनां क्षालकः सदा ।। ८६ ।।

स्वाघमालिन्यसञ्जातं स तदा समपाकरोत् ।
परीक्षितुं समुद्युक्तो देव्या भावं तपःस्थितः ।। ८७ ।।

स शिवो देवभक्तस्य भावं वेदितुमागतः ।
कृशो मलिनकन्थाङ्कस्कन्धः स वृद्धतापसः ।। ८८ ।।

---

1. कामशिवे इत्यर्थः ।।   2. भक्तिमातनोत् ।।

तं तदा शिशिरे काले प्रपेदे प्रस्खलत्पदः ।
स दृष्ट्वा भस्मदिग्धाङ्गं तं प्रणम्य कृताञ्जलिः ।। ८९

कुशलोक्त्या प्रसाद्यैनं रजकः प्राह हर्षितः ।

रजकः उवाच -

नाथ कार्श्यं तव कथं कन्था चेयं मलीमसा ।। ९० ।।

देहीमां विमलां कुर्यामित्युक्तः स तदाब्रवीत् ।

भिक्षुः उवाच -

नान्या मेऽस्ति कुतः कथा यदहं त्वां समागतः ।। ९१ ।।

न ददामि त्वमद्यैव धौतां कृत्वा ददासि चेत् ।
यदि दास्यसि सद्यो मे दाता नो स्यात् तनुव्ययः ।। ९२

इति कन्थां विभुस्तस्मै तथेति ब्रुवते ददौ ।
रजको विमलां कर्तुं तदा कन्थां समुद्यतः ।। ९३ ।।

अन्यैर्मलैस्तां संयोज्य यत्नात्कुम्भ्यां स पाकतः ।
धौतं पाषाणमोलौ तां यावन्निक्षिपते तदा ।। ९४ ।।

तावच्छिवाज्ञयाऽमोघमेघाश्च ववृषुश्चिरम् ।
वृष्टिर्न विरमत्येषा शीतासारोरुवातिका ।। ९५ ।।

शीतार्तोऽथकथां[1] भिक्षुर्हाहा हन्त हतोऽरम्यहम् ।
व्यतीता प्रोक्तवेलापि धौतकन्था न शुष्यते ।। ९६ ।।

अन्यानि मम वासांसि न गृह्णात्येव भिक्षुकः ।
वस्त्राधातमहाग्राव्णि शिरःस्वं घातयाम्यहम् ।। ९७ ।।

---

1. शीतार्तो व्यथितो भिक्षुः - इति पाठः युक्तो भाति ।।

इति भक्तः शिरो ग्राव्णि यावता घातयत्यसौ ।
तावद्गरधरो ग्रीवां तस्य हस्तेन शीलयन् ।। ९८ ।।

अपालयत्कालनेत्रो रजकं भगवान् भवः ।
वृषारूढं तदा देव्या ववन्दे सोऽपि भक्तितः ।। ९९ ।।

सुखी भवेति देवेशो जगामैकाम्रमूलगः ।। १०१

सूतः (उवाच) -

जन्माऽऽहितं देवदयाविशेषैर्विचारभृत्योऽपि विधूर बन्धम् ।
स चैकदन्तायाद्यभिपूज्यमान एकाम्रधामेश्वरधाम भेजे ।।

विचारभक्तस्य विशिष्टभक्तै-
र्विचारयुक्तैरभिवन्द्यमानम् ।
विशिष्टमेतच्चरितं पवित्रं
पठन्ति ये यान्ति परं पदं ते ।। १०३ ।।

।। इति श्रीशिवरहस्ये नवमांशे द्विचत्वारिंशोऽध्यायः ।।

।। त्रिचत्वारिंशोऽध्यायः ।।

स्कन्द उवाच

कथयामि कथां पुण्यां वागीशस्य महात्मनः ।
कश्चिदत्यग्रवालेति विषयस्तिलको भुवः ।। १ ।।

विलासभवनं लक्ष्म्या महीमण्डलमण्डनम् ।
यस्मिञ्जनपदे सर्वे हारा एव विहारिणः ।। २ ।।

भस्मसम्पन्नफालास्ते महारुद्राक्षवक्षसः ।
यस्मिन् कुटुम्बिनां सौधे चरतीन्दौ विधुन्तुदः ।। ३ ।।

सन्दिग्धे ग्रसितुं प्रायो मध्ये सुभ्रूमुखावलि ।
वेणीपुष्पसमुत्क्षिप्तैः नानपुष्य(प)मणि व्रजैः ।। ४ ।।

विभूषा हालिकस्त्रीणां यस्मिन् कृषिकलाजुषाम् ।
यत्र कुल्यासु कादम्बमाध्वीपुण्ड्रेक्षुपर्वसु ।। ५ ।।

मुक्तासीतासुकल्हार सरःसु क्रमुका बहिः ।
यत्रेक्षुकाण्डखण्डोद्यद्रससारेण भूमयः ।। ६ ।।

नदीमातृकतां यान्ति रससस्यादिसेतवः ।
यत्र कान्तागलोल्लासि क्रमुकाक्रमितं फलम् ।। ७ ।।

गृहीत्वालिकुचद्वन्द्व कुचवत्कठिनं जहुः ।
महिष्यो यत्र वापीषु घनपङ्क्तिवदर्णवे ।। ८ ।।

निमज्जन्त्यो झषोल्लीढैर्दुग्धैरुकलयन्ति ताः ।
यत्रारामतरुस्तोमसीमासंस्थो विराजितः ।। ९ ।।

पुष्पवन्तौ महीशाखिभुजाग्रालिङ्गिताविव ।
सौरभीजुषि केदारे मेरुवद्व्रीहिशशयः ।। १० ।।

यत्र हालिकसौधेषु मिलन्ति शिखिनोऽम्बुदैः ।
यत्र सुन्दरवागीशौ अवतीर्णौ शिवाज्ञया ।। ११ ।।

जगद्धिताय हन्तास्य माहात्म्यं केन वर्ण्यते ।
तस्मिन्त्सत्यग्रपालीति विषये विश्रुताशये ।। १२ ।।

नानापुष्पेषु तेष्वेकं मामराख्यं[1] महत्पुरम् ।
यदीयपरिघाचक्रे पङ्कजानि चकासति ।। १३ ।।

कर्तुमभ्युद्यतानीव वप्रयुद्धं वधूमुखैः ।
यद्विशेषफणारत्नविशेषैः पाटलोत्पलैः ।। १४ ।।

परीते परिखाचक्रे दिवो बिम्बमिवोक्ष्यते ।
नराः स्त्रियः सुरस्त्रीभिर्यत्र सौधेषु सर्वदा ।। १५ ।।

दिव्यभौमपदार्थानां कुर्वते क्रयविक्रयौ ।
आमूराख्ये पुरे तस्मिन् चतुर्वर्णाश्रमाश्रये ।। १६ ।।

यत्र भुग्नवलग्नेन यौवतेन समन्विते ।
आपदामपदे शम्भुभक्तिसिद्धयेकवर्त्मनि ।। १७ ।।

चतुर्थजातिधौरेयो भक्तिधुर्योऽभवत् तदा ।
हलहल्लोहलोदञ्चत्सम्पदा मानितातिथिः ।। १८ ।।

---

1. मामुराख्यामिति अङ्करहितायां "इदं पुस्तकं तुलजारामस्य"-त्यङ्कितायां मातृकायां पाठान्तरं दृश्यते ।

कीर्तिमान् कीर्तिमान्नाम बन्धुमित्रप्रियोऽभवत् ।
गृहीणी मोदिनि नाम कौमुदीव कला ततः ।। १९ ।।

वारिधेर्वेलयेवासीत् सरला विरला तदा ।
सत्यां कीर्तिमतस्तस्यां कन्यासीत्कमलावती ।। २० ।।

शुभोदया सा ह्यभवत्कमलेवामलाशया ।
मातापित्रोर्मुखाब्जस्य विकासिरविसुप्रभा ।। २१ ।।

यथा मेनाहिमवतोरुमेवैनामपोषयत् ।
विद्या हृद्यतमेवाभूत् प्रियशिष्यगुरूदिता ।। २२ ।।

तमोनिवारको नाम्ना मोदिन्यां कोऽप्यभूत्सुतः ।
कीर्तिमान् सह मेदिन्या लब्धभव्यतनूभवः ।। २३ ।।

अमन्यतान्वयं स्वस्य स्पृहणीयमिवोन्नतम् ।
शुभाङ्गलक्षणः सोऽयं जातकर्मादिसंस्कृतः ।। २४ ।।

पितुर्हृत्पद्मबोधाय सुतो विद्यां समग्रहीत् ।
क्रमात्कलाविवृद्धोऽभूत् कलाधर इवोद्यतः ।। २५ ।।

गुरूणां विस्मयं कुर्वन् अपुष्यद्वृद्धिमिन्दुवत् ।
कन्यां तिलकवत्याख्यां दातुं द्वादशहायनाम् ।। २६ ।।

प्रवरायानुरूपाय वरायाचिन्तयत्पिता ।
शूद्रः कलिरिपुर्नाम मन्त्रिवर्यो महीपतेः ।। २७ ।।

पूर्वसम्बन्धशोभी च शिवपादस्थिराशयः ।
आत्मीयां कीर्तिमान् पुत्रीं वरीतुं प्राहिणोद्द्वितान् ।। २८ ।।

कीर्तिमन्तं च ते प्राप्य वव्रिरे कन्यकां च ताम् ।
सम्भाव्य कीर्तिमान् प्रीत्या बान्धवान् कलिवैरिणः ।। २९ ।।

तस्मै स्वतनयां मेनां दास्यामीत्यवदच्चतान् ।
कन्यापितृमतं श्रुत्वा प्रत्यागतसुहृन्मुखात् ।। ३० ।।

कलिशत्रुः प्रहृष्टोऽभूत्तद्दर्शनकुतूहली ।
तावन्नृपतिनादिष्टः कलिवैरी रणद्विषः ।। ३१ ।।

जेतुं स निर्ययौ धीरश्चतुरङ्गबलान्वितः ।
प्रत्येत्य द्विषतो युद्धे युध्यमाने च तैर्मुहुः ।। ३२ ।।

पराजित्य रणे योधानायुधैः स समागमत् ।
तस्यास्तिलकवत्याश्च जनकः कालमीयिवान् ।। ३३ ।।

मोदिनीचान्वगात्तत्र यतिलोकपरायणा ।
तयोः सा पुत्रकेणोर्ध्वदेहं चक्रे विधानतः ।। ३४ ।।

रिपुः कलिरिपुश्चोभौ सन्नद्धौ निहतौ युधि ।
तदा कमलिनी श्रुत्वा निहतं कलिवैरिणम् ।। ३५ ।।

शुभ्रवासान्विता साध्वी वैधव्यं चान्वभूत्तदा ।
देहस्यास्थिरतां ज्ञात्वा तद्भ्राता धर्मवानभूत् ।। ३६ ।।

अर्चयित्वा महेशानं अर्थिनोऽभ्यार्चयद्धनैः ।
प्रावर्तयदमोधश्रीरन्नशालामलानपि ।। ३७ ।।

कृतारामतटाकश्च शिवगोपुरबन्धनैः ।
*चातुर्वर्ण्यैस्तथा भक्तानन्नदानैरतोषयत् ।। ३८ ।।

---

* चतुर्वर्ण्यान् ।

तमोरिपुस्स्वच्छचित्तः पश्यन् सांसारिकीं रुजम् ।
अहिंसानिष्ठहृदयः श्रौतद्विट् चार्हतोऽभवत् ।। ३९ ।।

हित्वा बन्धांस्ततः सापि तदा तिलकवत्यपि ।
सह्यजातीरनिलयं वीरस्थानेश्वरं गता ।। ४० ।।

मठं तत्र विधायैव नीलकण्ठपदार्चका ।
प्रागेवार्कोदयात्पांसून्मार्जन्या परिधूय सा ।। ४१ ।।

धेनोश्चिरप्रसूताया गोमयेनोपलिप्य गाम् ।
स्वहस्तलूनैः कुसुमैःर्ग्रथित्वा च नवस्रजः ।। ४२ ।।

स्वयमभ्यर्चयल्लिङ्गे ददौ वीरेश्वराय सा ।
एवं सा शिवकैङ्कर्यनिष्ठा शिष्टतमा सती ।। ४३ ।।

निनाय वासरान्मासान्हायनान्नयनाश्रुभिः ।
श्रुत्वाऽनुजं जैनमार्गस्थितं दुःखाकुलाऽभवत् ।। ४४ ।।

तद्दुःखतप्ता सा नित्यं वीरस्थेशं व्यजिज्ञपत् ।

कुमारी (उवाच) -

वीरहट्टेश शम्भो मे यदि ते करुणा शिव ।। ४५ ।।

ममानुजो बलाद्देव स्थाप्यः शैवपथे स्थिरः ।
विज्ञप्तिमथ देवोऽपि तस्याः श्रुत्वा दिने दिने ।। ४६ ।।

तदा तदुदरे शूलं कालाग्न्युज्ज्वलदीपितम् ।
व्यवर्धयत्तदाऽसह्यं शूलं तदुदरे शिवः ।। ४७ ।।

विह्वलस्तेन शूलेन धर्महीनजिनालये ।
न्यपतत्तद्रुजः शान्त्यै कुत्सितैस्तैश्चिकित्सितः ।। ४८ ।।

मन्त्रसिद्धार्हता विद्या नालं शूलं व्यपोहितुम् ।
विजृम्भत्येव सहसा शूलो हालाहलोपमः ।। ४९ ।।

आपाद चूडमामृश्य पिञ्छाग्रैः पिञ्छधारिणः ।
मन्त्रसिद्धान्त्स्वसिद्धान्तान्त्सञ्जेपुर्जैनदेशिकाः ।। ५० ।।

तथापि वर्धमानोऽसौ धर्मसेनममोहयत् ।
धात्रेयीं काञ्चिदाभाष्य प्रैषयद्भगिनीं प्रति ।। ५१ ।।

सा धात्री तां च दृष्ट्वाऽऽर्तिं भ्रातुः शूलकृतां वदत् ।(?)
सा समागत्य ददृशे भ्रातरं शूलविह्वलम् ।। ५२ ।।

उवाच जैनान्त्संवीक्ष्य भ्रातरं शूलविह्वलम् ।

कुमारी (उवाच) -

सर्वरोगहरं चैतद्भस्मेदं शिवशासनम् ।। ५३ ।।

अनेन संस्पृशामीदंमस्यार्धोदरमञ्जसा ।
पञ्चाक्षरेण सञ्जप्य शूलहस्तं हृदि स्मरन्[1] ।। ५४ ।।

पस्पर्श भस्मना सापि पञ्चाक्षरमतन्द्रिता ।
तदा तदुदरे पार्श्वे तस्यार्धे शान्तिमानभूत्[2] ।। ५५ ।।

जैनो भक्तिक्रियां दृष्ट्वा तदावनतकन्धरः ।
सोऽप्ययाचत तद्भस्म पञ्चाक्षरविमन्त्रितम् ।। ५६ ।।

---

1. स्मरन्ती हृदि शूलिनम् । 2. शान्तिमातनोत् ।

भ्राता (उवाच) -

भवामि भस्मफालोऽहं जैनांस्त्यक्त्वा सुखी भवे ।
शपे शिवस्य पादाब्जं नैतत्सन्देहकारणम् ।। ५७ ।।(?)

इत्यार्तेन तदा पृष्टा भस्मना शान्तिमातनोत् ।
सोऽपि भस्मत्रिपुण्ड्राङ्को रुद्राक्षस्त्रग्भिरुज्ज्वलः ।। ५८ ।।

बभूव शिवधर्मज्ञस्त्यक्त्वा जैनमतं तदा ।
अनुजाया मते तिष्ठन्गिरिजापतिपूजकः ।। ५९ ।।

स्तुत्वेशं स्तुतिभिर्नित्यं जगाम किल कालतः ।
कलधौतमहाशैलं शिवप्रेमास्पदं तदा ।
सा चापि गिरिजापादपद्ममूलं जगाम च ।। ६० ।।

एवं भस्मप्रभावोज्झितवरगदहृच्छूलहस्तानुकूलं
ज्वालाक्षातुल पादपद्मविलसद्भक्त्यैव भुक्त्वा सुखम् ।
मुक्तिं चापि जगाम शम्भुकृपया शूडोरुजाप्यार्जितां
वाचां चापि पतिर्बभूव स तया युक्तो हराङ्गंविशत् ।।

।। इति श्रीशिवरहस्ये नवमांशे भस्ममहिमा नाम त्रिचत्वारिंशोऽध्ययः ।।

।। चतुश्चत्वारिंशोऽध्यायः ।।

स्कन्द उवाच -

कुलपक्षस्य चरितं सर्वपापप्रणाशनम् ।
भाग्यजन्मपदे देशे पाण्ड्यभूपालपालिते ।। १ ।।

सौरभोत्तरकुड्याख्यं क्रमुकाक्रामितं पुरम् ।
तत्रासीत्कुलपक्षाख्यो निर्मलः शूलभृत्परः ।। २ ।।

हरभक्तार्चको नित्यं हारिताघोऽखिलात्मनाम् ।
शम्भुदास्यं तत्प्रभुत्वात्पाण्ड्यस्यैवाकरोत्तदा ।। ३ ।।

जातस्य त्रिषु वर्णेषु नीचो वा को महेश्वरे ।
भक्तिं बिभर्ति तत्पादे धत्ते मूर्ध्नि सदैव सः ।। ४ ।।

यो वा को वापि तद्भक्तो ह्यायाति परमार्थवित् ।
स तं नत्वा सोपचारैरन्नादिभिरतोषयत् ।। ५ ।।

भस्मरुद्राक्षसम्पन्नं दृष्ट्वैव प्रणमेत सः ।
पञ्चाक्षरीमनुर्वक्त्रे तत्पादं प्रणनाम सः ।। ६ ।।

एवं शिवार्चको नित्यं कुलपक्षः सुधार्मिकः ।
परौघजेता पाण्ड्यस्य मन्त्रिणामग्रगोऽभवत् ।। ७ ।।

तेनैव बोधिता साध्वी महिला पाण्ड्यभूपतेः ।
शैवाङ्घ्रिपूजनरता राजानं पाण्ड्यभूपतिम् ।। ८ ।।

जैनपक्षस्थितं साध्वी मन्त्रितेन प्रसादिता ।
तदा तेन प्रबुद्धोऽसौ पाण्ड्यभूपोऽतिसत्तमः ।। ९ ।।

उन्मत्तजैनानाहूय स्वगात्रस्थं तदा ज्वरम् ।
नाशक्नुवंस्ते त्वरितं रोगज्वरनिवारणे ।। १० ।।

वागीशमाहूय तदा शिवभक्तं तदा सदा ।
तेन ज्वरं नृपस्याङ्गे नाशयामास सा तदा ।। ११ ।।

जैनाञ्छूलस्थितांश्चक्रे शूलपाणिपराङ्मुखान् ।
भस्मरुद्राक्षसम्पन्नं पाण्ड्यभूपतिमातनोत् ।। १२ ।।

मिथिलायां द्विजः कश्चिच्छूलशर्मेति नामतः ।
पूगपुन्नागपनसनारिकेलाम्रशोभिता ।। १३ ।।

श्रीभूतिधरतेजोभिर्दीप्तभूतिषु वीथिषु ।
गृहस्थधर्मनिरतैराश्रिता श्रीविराजिता ।। १४ ।।

मिथिला द्विजशूराऽभूत्तत्रात्मज्ञः शिवाङ्घ्रिभाक् ।
निलिम्पसम्पन्मुग्धेन्दुमौलिशङ्करकिङ्करः ।। १५ ।।

मिथिलाद्विजशूरोऽयं भक्तानां भावितात्मनाम् ।
अनुक्तमपि कैङ्कर्यं भक्तानां स तदाऽतनोत् ।। १६ ।।

स्वयं प्रह्वोऽभवन्नित्यं भक्तानामर्चने रतः ।
यथेष्टं षड्रसैर्युक्तं शिवभक्तानभोजयत् ।। १७ ।।

भूयः सन्तर्प्य तान् भोज्यैः प्राज्यैराज्यादिभिः सदा ।
भृङ्गाङ्गकबरीगौरी नाथाङ्घ्रिनलिनाशयः ।। १८ ।।

शिवदास्यमसीमान्तं स्वीचक्रे विधिना सुधीः ।
वक्तुं भक्तेषु माहात्म्यं भूतेशकरुणानिधेः ।। १९ ।।

सोऽभूत्सुन्दरनाथस्य पदस्मृतिपरायणः ।
सौम्यसोमार्धचूडस्य पादपङ्कजसेविनाम् ।। २० ।।

पार्वतीशस्य पादाब्जभक्तिं मुक्तिममंस्त सः ।
एवं स्थितस्य तस्यैवं भवो भावं परीक्षितुम् ।। २१ ।।

गोधिनेत्रो गाधिपुरमाजगामातिकुत्सितः ।
नीचवेषेण कलशं धारयन्मद्यसम्भवम्[1] ।। २२ ।।

तन्मध्यगृहमास्थाय पार्वणे समुपस्थितः ।
स्नाता द्विजास्तथा शान्ता उपवीष्टचरासने ।। २३ ।।

एवं स्थिते तदा शूरो धैर्यशूरश्च भक्तिमान् ।
भस्मफालं तदा दृष्ट्वा भक्तमभ्युज्जहार च ।। २४ ।।

चण्डालाय ददौ पूर्वं पैतृकार्थं कृतं हविः ।
तं दृष्ट्वा चुक्रुधुर्विप्रा धिक्त्वामिति विनिर्ययुः ।। २५ ।।

विनिन्दितो बन्धुमिश्च स्तब्धस्तस्थौ प्रहृष्टधीः ।
अष्टमूर्तिमवन्दिष्ट भक्तिहृष्टतनूरुहः ।। २६ ।।

चण्डालोऽप्यथ तद्दत्तं बुभुजे परमं हविः ।
हृष्टोऽथ निर्जगामैव मौलिमान्दोलयंस्तदा ।। २७ ।।

निक्षिप्योच्छिष्टपात्रं तदङ्गणे फणिकङ्कणः ।
विनिर्गतेऽचण्डाले तत्पत्नी कोपविह्वला ।। २८ ।।

---

1. सम्भृतं - पूरितमिति वार्थे । पार्वण The ceremony of offering oblations to all the manes at a Parvan.

पात्रमुच्चालयामास शूद्‌ग्रा तद्‌भुक्तमेव सा ।
शूद्‌ग्रा तत्पात्रमध्येन दण्डेनोत्कीर्य पातितम् ।। २९ ।।

ग्रामाद्‌बहिस्तन्निक्षिप्य स्नात्वा शूद्री समागता ।
पुनरन्यत्तथापात्रं स्थितमेव तदङ्‌गणे ।। ३० ।।

एवं पुनः पुनर्नीत्वा त्यक्त्वा भ्रान्तिं परां गता ।
शूरोऽपि भार्यां सान्त्व्याथ पुनः पाकमथारभत् ।। ३१ ।।

पूर्वं निमन्त्रितान् विप्रान् सान्त्वयञ्छ्राद्धभोजेने ।
तं चुक्रुधुः पुनस्तेऽपि धिक्त्वां चण्डालभोजकम् ।। ३२ ।।

बहिष्यार्होऽसि विप्रैस्त्वं ग्रामादस्मात्परा व्रज ।
इत्युक्तो दुःखितो विप्रः श्राद्धघातं समीक्ष्य च ।। ३३ ।।

शिवं हृदि तदा ध्यायन्नुवासासायमेव हि ।
तद्‌भक्तिं विप्रसङ्‌घानां प्रदर्शयितुमागतः ।। ३४ ।।

वृषारूढो महादेव्या चञ्चच्चन्द्रविभूषणः ।
नदत्सु देवतूर्येषु नृत्यन्तीष्वप्सरःसु च ।। ३५ ।।

तमाह विप्रमाहूय पश्य ते पैतृकं गणम् ।
सन्तृप्तं नितरामन्नैर्विमाने नाकरोचिषा ।। ३६ ।।

गच्छन्तं शक्रसदनं पश्येत्याह महेश्वरः ।
तदानीं स च शूरोऽसौ देवदेवं प्रणम्य च ।। ३७ ।।

कृताञ्जलिपुटस्तस्थौ स्तुवञ्जय जयेति च ।
विप्रसङ्‌घैः पितृगणं स्वकीयं विस्मयं गतः ।। ३८ ।।

गन्धालङ्कारवासोभिर्भूषितं यानमास्थितम् ।
तं तदा पितरः प्राहुर्भक्तं शूरं शिवार्चकम् ।। ३९ ।।

पितरः ऊचुः -

अस्माकं परमा तृप्तिर्भवतो भाग्यगौरवात् ।
सञ्जाता शम्भुभुक्तेन भक्तिसिक्तेन सर्वदा ।। ४० ।।

देशपात्रक्षेत्रदत्तैः तृप्तिर्नः शतवार्षिकी ।
भवभुक्तान्नशेषेण आनन्त्या तृप्तिरेव नः ।। ४१ ।।

यतस्त्वं शिवभक्तानां श्रेष्ठो मान्यो विशेषतः ।
त्वया यद्दत्तमस्माकं शिवभक्तमुखे हुतम् ।। ४२ ।।

आनन्त्याय भवेदन्नं किं पुनः शिववक्त्रगम् ।। ४३ ।।

यो भस्मरुद्राक्षयुताङ्गकः सदा
श्राद्धं ददद्भोजनकृत्सदैव ।
अस्मारकमेवेष्टतमा हि तृप्तिः
स्यात्तर्पणेनान्यदत्तो विशिष्टम् ।। ४४ ।।

यो भस्मरुद्राक्षविहीनफालः
तेनाफलं श्राद्धमहो सुदत्तम् ।
स्याद्देशकालोचितपात्रदत्तं
भवेत्सदानिष्फलकं सदैव ।। ४५ ।।

धन्या वयं शैव पिता पितामह-
मातामहा बान्धवा येषु सर्वे ।
पुनासि नः पुत्रभूतो महेश-
भक्तोऽसि मान्योऽसि विशिष्ट एव ।। ४६ ।।

पुन्नाम्नो नरकात्सुतारक इति ज्ञेयः सुतः शाम्भवो
भूयात्तप्ततपस्यया फलमिदं ज्ञेयं पितुर्वै सुत ।
नो चेत्पातयतेऽसिपत्रकुहरे भस्माक्षभृद्दूषकः
पुत्रः कुत्सित एव भक्तिविधुरस्तस्मादपुत्रो वरः ।।

इत्युक्त्वा तं प्रणम्येशं पितरस्तस्य सुव्रत ।
आशीर्भिरभिनन्द्यैनं शतं जीवेति संययुः ।। ४८ ।।

शूरं तं भूसुरा दृष्ट्वा क्षयद्वीरपदार्चकम् ।
ऊचुः संहृष्टमनसो धन्योऽसीति मुहुर्मुहुः ।। ४९ ।।

दृष्ट्वैव स्व पितॄन् सर्वान् महादेवं दृशा तदा ।
तुष्टाव शिपिविष्टं तं शूरो मूर्ध्नि कृताञ्जलिः ।। ५० ।।

शूरः उवाच -

पायं पायं नेत्रपात्रैस्त्रिणेत्रं
नामं नामं शश्वदुन्नम्य हर्षात् ।
हायं हायं दुःखजातं समग्रं
त्वत्पादाब्जालोकनेनैव शम्भो ।। ५१ ।।

यामि कैलासमूलं ते भार्ययाहं महेश्वर ।
कनीनिकाविहीनस्य नेत्रस्येवास्ति मे स्थितिः ।। ५२ ।।

तवानुयामि तिष्ठामि शम्भो रक्ष कृपां कुरु ।
इत्युक्तं शूरवचनं श्रुत्वा तच्चेन्दुभूषणः ।। ५३ ।।

दत्त्वा योगं समायाहि इत्यवोचद्द्विजं प्रति ।
इत्येवं द्विजशूरोऽपि समाधिमगमत्तदा ।। ५४ ।।

नाडीं सुषुम्नां मरुताऽभिपूर्य
द्रुतां सुधां चान्द्रमसीं विधूय ।
हित्वा स तद्ब्रह्मकपालरन्ध्रं
कलासनाथस्य पदं प्रपेदे ।। ५५ ।।

मिथिलाद्विजशूरवृत्तमेतत्
प्रथितं भक्तिपरायणं परार्घ्यम् ।
दृढभक्तियुतो मडाब्जपादे
न हि गाढं तम आविशेत्स धन्यः ।। ५६ ।।

।। इति श्रीशिवरहस्ये नवमांशे चतुश्चत्वारिंशोऽध्ययः ।।

।। पञ्चचत्वारिंशोऽध्यायः ।।

स्कन्द उवाच

श्रीमतो बोधसम्बन्धनाथस्य कथये कथाम् ।
अस्ति ब्रह्मपुरी नाम पुरारातेः प्रसादकृत् ।। १ ।।

कावेरीशुक्तिमुक्ताः प्रकारात्रय(यत्र) कल्पिताः ।
परिघावलयो यत्र पातालाकाशलङ्घने ।। २ ।।

विघ्नं पथि वितन्वन्ति प्राकाराश्चन्द्रसूर्ययोः ।
यत्र प्राकारवीथीषु दिवापि घनवाहनाः ।। ३ ।।

विद्युद्भ्रान्तिं वितन्वन्त्यः सञ्चरन्त्यभिसारिकाः ।
यस्यां हरिन्मणीवेदीकान्तिशैवालमोचकाः ।। ४ ।।

रत्नाकरप्रभापूरं वहन्ते वीथिकापगाः ।
यत्राध्वरहविर्धूमैरकालेऽप्युत्थिता घनाः ।। ५ ।।

मुञ्चन्ति पयसो धारा यत्र चन्द्रोपलाम्भसः[1] ।
केलीसरःसु पूर्णेषु चन्द्रं पीडयते करैः ।। ६ ।।

यत्सौधचन्द्रकान्ताम्बुप्रवाहैर्विपणीमहो ।
आकृष्य पूरिताम्भोधिः धत्ते रत्नाकराभिधाम् ।। ७ ।।

---

1. मातृकान्तरे अधिकः पाठः एवं यत्र सोमरसोत्तराः ।
यत्र क्रीडामयूराणां लास्यं बाला दिदृक्षवः ।
हस्तैरातन्वते सौधैः पयोदपटहारवम् ।
सदृशश्चन्द्रशालासु यत्र चन्द्रोपलाम्भसः . . . . . ।।

पताकाघटनाद्यस्यां पतितैरुडुभिर्यतः ।
अगृह्य ते रतिर्यस्य छिन्नमुक्तावधूजनः ।। ८ ।।(?)

सुमनः सुमनामोद भ्रमत्षट्पदराजयः ।
आनन्दवारिधेः पूरे जलक्रीडां वितन्वते ।। ९ ।।

यत्र क्रीडाकुङ्गीभिः केलीपर्वतमूर्धनि ।
हरिन्मणिप्रभा दूर्वाश्चरन्ति[1] विमलाशयाः ।। १० ।।

कवेराटोपकूटानां पटीयसि दियावने ।
भाविताध्वरधूमाभ्यां यस्यां तेजस्तमोजुषि ।। ११ ।।

अर्धनारीश्वरैः सूक्तैर्नक्तन्दिवभिदामुदा ।
प्रलयोत्कलपाथोधिशुक्तामुक्तालिवेष्टिता ।। १२ ।।

याऽशेषमूर्तिभिः शम्भोरालयोद्भासिशोभनैः ।
नारिकेलावलीरम्भा क्रमुकाराममध्यगा ।। १३ ।।

असंवर्तेऽपि या भाति वेल्लितेव पयोधिना ।
केदारे यत्र माकन्दरक्ताम्बुजदले मधु ।। १४ ।।

मुञ्चन्तो ज्वलना रीतिं भूसुराणां वितन्वते ।
वधूमुखजितैर्यत्र सारसैस्तप्यते तपः ।। १५ ।।

कुशेशयत्वमेतेषां कथङ्कारं न चेद्भवेत् ।
कस्तूरीगन्धकर्पूरैः कुङ्कुमक्षोदराशिभिः ।। १६ ।।

स्फारैरवकरैर्यस्यां भरित्रैर्मणिमेदुरैः ।
चञ्चत्केलीदराधारगलितैर्मणिमेदुरैः ।। १७ ।।

---

1. दूर्वाश्चर्यन्ते विमलाशयम् ।। (Adv)

क्षिप्तैरर्ककरा यस्य मेरुभ्रान्तिं वितन्वते ।
पुष्पवन्तौ यदारामे चरन्तौ विटपान्तरे ।। १८ ।।

वितन्वाते जपामल्लीगुञ्छसच्छायितौ तदा ।
उल्लोलाचान्तलोकेषु सप्तकल्लोलमालिषु ।। १९ ।।

द्रोणीमारोपयच्छम्भुर्भक्तान्कल्पान्तिमे हरः ।
तस्यामासीद् द्विजाधीशो द्विजराजधटार्चकः ।। २० ।।

आम्नायागमषट्छास्त्रपरादृश्वा शिवव्रतः ।
शिवाङ्घ्रिचित्तः सद्वृत्तः षट्कर्माचरणोद्यतः ।। २१ ।।

विवर्त इव धर्मस्य सर्वस्येव समुद्गतः ।
शान्तेरिव परीपाको दान्तेरिव परिग्रहः ।। २२ ।।

उल्लास इव बोधस्य मोक्षस्येव महापथः ।
परोरजोभिश्चरितैः पवित्रितजगत्त्रयः ।। २३ ।।

तपस्तुष्टाम्बिकाजानेः प्रसाद इव मूर्तिमान् ।
विनयाभरणा काचित्करुणैव शरीरिणी ।। २४ ।।

आसीद्भगवती नाम्ना तस्य धर्मकुटुम्बिनी ।
धर्मानुष्ठाननिष्ठा सा वसिष्ठगृहिणीसमा ।। २५

प्रतिष्ठाऽतिथिसत्कारे गरिष्ठा शाठ्य वर्जिता ।
महता सापि कालेन तनयं विनयान्वितम् ।। २६

अप्राप्य सा तदा खेदात्ततश्चिन्तामगाहत ।
तदा भगवती सापि सुतमप्राप्य दुर्मनाः ।। २७

किमप्यन्तश्चिन्तयन्ती ह्यनुसृत्य शिवव्रतम् ।
व्यरीरचत्सोमवारे निशि तत्र शिवार्चनम् ।। २८

सा प्राह शिवधर्माख्यं ब्राह्मणं ब्राह्मणी तदा ।
आर्यापुत्रवतां नास्ति लोकोऽयं वा परोऽपि वा ।। २९ ।।

मम किं जन्मना वापि चिरस्थित्यायुषापि किम् ।
पुत्रवत्ता हि लोकानां सफलं संसृतेः फलम् ।। ३० ।।

प्ररोहो धर्मसालस्य महत्वस्यास्य वैभवम् ।
धर्मपत्न्यनपत्यापि भुवो भाराय केवलम् ।। ३१ ।।

येन केन प्रकारेण साम्बमाराध्य शङ्करम् ।
तनयं प्राप्नुहि प्रौढं शिलाद इव नन्दिनम् ।। ३२ ।।

इति तस्या वचः श्रुत्वा शिवपादरतो द्विजः ।
शम्भोराराधनाऽलभ्यं किञ्चिन्नास्तीत्यमन्व(य)त ।। ३३ ।।

विप्र उवाच -

भद्रे सम्यक्त्वयाऽभाणि ह्यर्चयावो महेश्वरम् ।
अभ्यर्च्य तनयं प्रौढं प्राप्स्याव इति सोऽब्रवीत् ।। ३४ ।।

स जायया समं प्रौढं दृढं मृडपदार्चनम् ।
अमंस्त द्रोणिकेशं तं समर्चयितुमञ्जसा ।। ३५ ।।

पावने शम्भुसरसि प्रातर्विहितगाहनः ।
अर्चयामास रक्ताब्जैर्यथाविधि दिवाकरम् ।। ३६ ।।

आरुणोत्थैर्मन्त्रवर्यैस्तरुणारुणनायकम् ।
नमस्यन् शरणं यातश्चरणाम्बुरुहं रवेः ।। ३७ ।।

शिवं शिवायुतं विप्रो भस्मरुद्राक्षभूषणः ।
रुद्रपञ्चाक्षरावृत्त्या बिल्वपत्रैरपूजयत् ।। ३८ ।।

प्रदक्षिणप्रणामादिस्तुतिधूपनिवेदनैः ।
शिवागमोक्तविधिना द्रव्यैः सौभाग्यदायिभिः ।। ३९ ।।

प्रकल्पितोपचारं च कन्दमूलफलादिभिः ।
तदा भगवती सापि स्वात्मनाथेन मोदिता ।। ४० ।।

मनो यत्र तपः कर्तुं तर्तुं संसारवारिधिम् ।
भरितानन्दहृत्पद्मा *स्वान्तः शान्ता महेश्वरे ।। ४१ ।।

यथा कुमारजनने पार्वती पर्वताग्रगा ।
शर्वमाराधयामास तथेयं पुत्रवाञ्छया ।। ४२ ।।

स्नात्वा तदा सा धम्मिल्लमन्दारप्रसवोचितम् ।
जटाभरत्वं तपसे गमयामास सुव्रता ।। ४३ ।।

हंस कूलीदुकूलं सा हित्वा वल्कलधारिणी ।
अपि प्रसूनापचये निःसहाङ्गुलिपल्लवा ।। ४४ ।।

पवित्रं सा कुशाग्राणां पवित्रत्वेन बिभ्रती ।
चन्दनासारमात्रं सा परिधूयाङ्गरागकम् ।। ४५ ।।

भस्मधूसरिताङ्गं सा चक्रे सिन्दूरलाञ्छिते ।
फाले त्रिपुण्ड्ररचनां माला रुद्राक्षकल्पिताः ।। ४६ ।।

---

* शान्त स्वान्ता

अनल्परत्नाभरणा स्वीचक्रे तरुणी तदा ।
अङ्गुष्ठाग्रेण तिष्ठन्ती कर्मे सा वर्मणावृता ।। ४७ ।।

वर्षारात्रिषु धाराभिर्वारिदोत्थासु सा बभौ ।
सौदामिनीव भूलोके कामिनीयामिनीषु सा ।। ४८ ।।

तिमिरस्तिमिते काले तद्गर्भप्रभया दिशः ।
भासिताः कुन्दसन्दोहकोरका इव तद्ध्रदे ।। ४९ ।।

तस्यारुणाधराबिम्बतिरस्कारिचमत्कृतिः ।
पाणिपादेन पद्मानि मुखेनेन्दुकलामपि ।। ५० ।।

नेत्रैण नीलपद्मं सा धम्मिल्लजितसद्घना ।
कुचाभ्यां जितमातङ्गगुम्भाभ्यां चारुहासिनी ।। ५१ ।।

प्रादर्शयदनायासा निन्ये सा हैमिनी निशाः ।
नीहारहारिपद्मश्रीरप्यस्या मुखपङ्कजम् ।। ५२ ।।

मनोहारि सदैवास्या हरहृत्पद्मसद्मगम् ।
तपस्यन्त्यां तदा वन्ये ददौ कोऽपि जटाधरः ।। ५३ ।।

भस्म तन्मुखगात्रेषु तेन सा दौहृदं दधौ ।
उदेष्यच्चण्डमार्ताण्डपुरुहूतदिशेव सा ।। ५४ ।।

तथापि मध्ये नैतस्या महत्ता समभूयत ।
फाले विरचितां रक्षां रेखां कुक्षिजुषः शिशोः ।। ५५ ।।

साऽभक्षयद्ध्रुवं मृत्स्नां भस्मनोद्धूलनेच्छया ।
कुक्षिस्थस्य कुमारस्य विभूत्येव वपुःश्रिया ।। ५६ ।।

पाण्डिमानं वहन्त्यासीत् सत्वाधिष्ठानदेवता ।
सुधया पूरितौ तस्याः कुचौ मेचकचूचुकौ ।। ५७ ।।

संवीक्ष्य तां प्रमोदेन प्रमदां मुदिताशयः ।
इन्दुशेखरभावेन भासुरो भूसुरस्तदा ।। ५८ ।।

यथाविभवमातानीत् क्रियाः पुंसवनादिकाः ।
सीमन्तोन्नयनेनासौ स्फुरितातिशया बभौ ।। ५९ ।।

तदा मणिशलाकेव शाणोल्लीढप्रभावती ।
अथ वै जनने मासि ग्रहेषूच्चेषु पञ्चसु ।। ६० ।।

मुहूर्ते शोभने सूनं* प्रसूता भाययन्दिशः ।
सूतिका भासयामास मणिदीपतिरस्क्रियाम् ।। ६१ ।।

कुर्वतानन्तभानूनां लीलायितमुदञ्चितम् ।
देवाश्च सुमुखाः सर्वे तदा मखमुखेऽग्नयः ।। ६२ ।।

प्रदक्षिणाकारतया जवलुः पवना ववुः ।
ववृषुः कुसुमाऽसारं देवगन्धर्वजाप्सराः ।। ६३ ।।

जगुः कलं ता ननृतुः मेनकाद्याः सुराङ्गनाः ।
अनाहता दुन्दुभयो नेदुः जलदगौरवम् ।। ६४ ।।

अथ शय्यासमारूढो वभौ भगवतीसुतः ।
उदयाद्रिमीवारूढश्चण्डभानुः प्रचण्डभाः ।। ६५ ।।

---

* सा शुभमूहूर्ते दशापि दिशः भासमन्तं सूनिं प्रासूत स च शिशुः भजिदवि इव सूतिकां (मातरं च) भासयामास इत्यर्थे पद्यमिदम् ।।

पुत्रजन्मामृतं श्रुत्वा तत्पिता हर्षवर्षणैः ।
तर्षितो बहुकालेन ब्राह्मणेभ्यो ददौ वसु ।। ६६ ।।

महान्तमुत्सवं कुर्वन् बन्धुवर्गसमन्वितः
अपूपुषत्कुमारं स्वं पूषेव गगनस्थितम् ।। ६७ ।।

दिने दिने परां वृद्धिमवाप्यात्यन्त हर्षितः ।
अयासीदतुलां पुष्टिंमिष्टां पित्रोरधाच्छिशुः ।। ६८ ।।

मूर्धन्युन्नमिते तेन वेदैरुन्नमितं शिरः ।
अङ्गणे किङ्किणी रत्नैर्हंसकस्वनमञ्जुलः ।। ६९ ।।

जननीकरमालम्ब्य पञ्च पाणिपदानि सः ।
वक्षःस्थहेमसूत्राढ्यं पुण्डरीकनखाङ्कितः ।। ७० ।।(?)

भुवं गत इव स्कन्दः कौतुकं पितुरातनोत् ।
अव्यक्ताक्षरवाङ्माध्वीमुखरीकृतदिङ्मुखः ।। ७१ ।।

अव्याजहसितोल्लासिसुदन्तकमुखश्रिया ।
फालत्रिपुण्ड्ररचनारोचनाक्त सुरेखया ।। ७२ ।।

विलोलकर्णपाशान्तरत्नरुद्राक्षकुण्डलः ।
भसितालक्तकासक्तपादारक्तितभूतलः ।। ७३ ।।

व्यालोलकुन्तलानीलकालत्ततिलकामुखः ।
पूर्णेन्दुमध्यविलसन्यङ्कुशङ्काविशोभिना ।। ७४ ।।

फालेन भाति बालोऽसौ पर्यङ्कोत्तानशाय्यपि ।
सा जगौ लालने गीतिं नान्यां पञ्चाक्षरीमनोः ।। ७५ ।।

अङ्के कनकपर्यङ्के मुक्ताश्रृङ्खलयान्विते ।
मातोपलालयामास मधुरैर्गीतिगुम्फनैः ।। ७६ ।।

बालोऽपि भस्मविधृतामलरुद्रनेत्र-
स्त्रग्भिर्विकीर्य कुसुमानि च पांसुलिङ्गे ।
नैवेद्यमिष्टमददाच्छिपिविष्टलिङ्गे
सम्पूजयन् शिव शिवेति स बालवर्गैः ।। ७७ ।।

।। इति श्रीशिवरहस्ये नवमांशे ज्ञानसबन्धोत्पत्तौ नाम
पञ्चचत्वारिंशोऽध्ययः ।।

।। षट्चत्वारिंशोऽध्यायः ।।

स्कन्द उवाच

एवं तस्मिन् शिशुक्रीडापरिपाटीं वितन्वति ।
पित्रोर्नकेवलं चैव त्रैलोक्यं सुखभागभूत् ।। १ ।।

तदा कदाचिदुत्थाय मूहूर्ते ब्राह्मसंज्ञिते ।
शिवतीर्थाम्भसि स्नातुं तत्पिता प्रस्थितो द्विजः ।। २ ।।

स दण्डशिखरे धौतं वेष्टयित्वा शिशोः सह ।
सदर्भमुष्टिरुद्वेल्लद्गात्रोमित्रजनो द्विजः ।। ३ ।।(?)

तेनान्वितो ययौ बालः सरस्तटमुदारधीः ।
पादाभ्यां पल्लवाभाभ्यां सिकतासु पदं दधत् ।। ४ ।।

स्थापयित्वा शिशुं शम्भुतीर्थतीरे स भूसुरः ।
कृतोचितसमाचारः स्नातुं तीर्थमगाहत ।। ५ ।।

बालकोऽपि तमालोक्य धूलिक्रीडापरायणः ।
सरस्तटे परं न्यस्तं पितुरालोक्य सो वटुः ।। ६ ।।(?)

अदृष्ट्वा स्वं च पितरं अघमर्षणकारिणम् ।
रुरोद गोपुरं शम्भोः पश्यन् द्रोणीपुरेशितुः ।। ७ ।।

ताताम्बेति च सोत्फुल्लहल्लकारक्त पाणिना ।
कज्जलालेपलोलेन लोचनेनाश्रुकारिणा ।। ८ ।।

पाहिमामिति देवेशं स बलाद्बालकोऽरुदत् ।
तदाकर्ण्य महादेवो महादेव्या तदाऽऽगतः ।। ९ ।।

दयमानमना द्रोणीनाथोऽसौ मन्मथान्तकः ।
आरुह्य वृषभं दिव्यं शरद्धनसमप्रभम् ।। १० ।।

गणयोगीन्द्रगीर्वाणवाणीशहरिसेवितः ।
धारालबाष्पनयनं रुदन्तं तं स्तनन्धयम् ।। ११ ।।

देवोऽदर्श(ऽपश्य)द्दयासारस्रोतःशीतलया दृशा ।
त्र्यक्षो वीक्ष्य दृशा बालमबालसमविक्रमम् ।। १२ ।।

त्रैलोक्यजननीं प्राह दयमानमनास्तदा ।

ईश्वरः उवाच -

स्तन्यं हेरम्बषड्वक्त्रपीतशेषं गिरीन्द्रजे ।। १३ ।।

शिशवेऽस्मै स्तनं देहि वात्सल्यात्त्वं सुवत्सले ।
श्रुत्वा सा चषके गौरी काञ्चने चषके पयः ।। १४ ।।

पयोधराभ्यां निःस्रुत्य बालायास्मै ददौ शिवा ।
आदाय चषकं बालः पाणिभ्यां मुदिताशयः ।। १५ ।।

पपौ पयः शिवज्ञानचतुर्वेदसमुद्भवम् ।
विमृज्य लोचने देव्या दत्तमास्वाद्य तत्पयः ।। १६ ।।

उन्मीलत्संविदुल्लासं सस्मार स्मरशासनम् ।
प्रबोधलहरीं प्राप्य पशुपाशविमुक्तये ।। १७ ।।

तत्सत्यं तत्ततस्तस्मै प्राध्यापीत् सकलाः कलाः ।
अशेषजगतां मातुरास्वाद्य स्तन्यमक्लमः ।। १८ ।।

ख्यातोऽम्बिकासुत इति ज्ञानसंबन्ध इत्यपि ।
सोऽपि विप्रो ददर्शैवं मग्नोऽम्भसि महेश्वरम् ।।१९

त्र्यमुक्षाधिरूढं च वीक्ष्य देव्या समन्वितम् ।
जजाप शतरुद्रैश्च स्तुवन्नभ्युत्थितोऽभवत् ।। २० ।।

वहन्तं चषकं हैमं करेऽद्राक्षीन्निजार्भकम् ।
तारामित्र पयः सिन्धुतरङ्गितहृदम्बुजम् ।। २१ ।।

लेलिह्यमानं भक्त्यैव वीक्षमाणं नभोऽन्तरम् ।
आनन्दाश्रुपरीवाह सेकशीतलिताङ्गकम् ।। २२ ।।

कदम्बमुकुलोल्लासि पुलकोद्दामभूषणम् ।
नृत्यन्तं किञ्चिदाकुञ्च्य चरणाम्बुरुहाञ्चलम् ।। २३ ।।

वीक्ष्य वीक्ष्य निजं बालं विस्मेरहृदयोऽभवत् ।
विक्रीडमानं तं बालमुवाच स तदा पिता ।। २४ ।।

पिता उवाच -

त्वयि (अयि) बालक केनेदं तुभ्यं दत्तं पयोऽधुना ।
कस्योच्छिष्टमिदं हन्त चषकं तत्करस्थितम् ।। २५ ।।

शुद्धिं ते पावनैर्मन्त्रैः करिष्येऽहं द्रुतं वद ।
एतदुच्छिष्टदातापि कुत्र वा वर्ततेऽधुना ।। २६ ।।

दर्शयेति तदा पित्रा स चोक्तो बालकस्तदा ।
गोपुराग्रं तदद्राक्षीत्[1] स्वेनाङ्गुष्ठेन वर्त्मना ।। २७ ।।

---

1. अदर्शयद्गोपुराग्रं

तदास्तौषीत्कुमारोऽपि देवं द्रोणीपुरेश्वरम् ।। २८ ।।

बालः (उवाच) -

शम्भुः सान्द्ररयः पयोधिमतुलं पातुं ददौ यः पुरा
सम्पृष्टः शिपिविष्ट एव नितरां वैयाघ्रपादाय तु ।
तनैवार्पितमद्रिजाकुचगिरिस्रोतोऽम्बुधारा पयो
ज्ञानानन्दसुधासमुद्रलहरीसंहारिपापव्रजम् ।। २९ ।।

एवं वदन् तदा बालो जहर्ष च ननर्त च ।
प्रसूनवृष्टिमातेनुर्भ्रमद्भ्रमरिकां सुराः ।। ३० ।।

दिवि दुन्दुभयो नेदुर्ननृतुश्चाप्सरोगणाः ।
तत्पितापि सुखाम्भोधौ ममज्ज नितरां तदा ।। ३१ ।।

नभोनिबिडितामर्त्यकिरीटगलितान्मणीन् ।
पूर्णपेषं पिनष्टीव जनता तत्र सङ्गता ।। ३२ ।।

दिविदेवैरसङ्ख्यातैः क्षितौ बहुविधैर्नरैः ।
समूह्य बालं स्कन्धेन ययौ द्रोणीपुरेश्वरम् ।। ३३ ।।

शङ्खदुन्दुभिनिर्घोषं वीणाध्वननमञ्जुलम् ।
अवरुह्य ततो बालः पितुरंसतलात्ततः ।। ३४ ।।

प्रणम्य स तदालोक्य गोपुरद्वारमाययौ ।
प्रदक्षिणीकृत्य तदा शिवधाम द्विजार्भकः ।। ३५ ।।

प्र(स)मुदञ्चितरोमाञ्चकञ्चुकाश्रुमुखो ययौ ।
नत्वा साष्टाङ्गमीशानं श्रीमद्द्रोणीपुरेश्वरम् ।। ३६ ।।

अस्तौषीदथ देवेशं मन्मथारातिमीश्वरम् ।। ३७ ।।

बालः उवाच -

शम्भोभर्गभवान्तकाव्यय विभो पाह्यम्बुजातेक्षणा-[1]
लोक्यामौलिसुमूल फालविलसन्नेत्रप्रभाभासित ।
आलोलद्युति सोमसुन्दर जटाजूटात्तगङ्गोत्तम
व्यालानद्धशरीरकान्त गरजिच्छीरञ्जिताङ्ग प्रभो ।। ३८ ।।

इत्थं संस्तुत्य देवं पुनरपि स तदा शम्भुधामानि नन्तुं
मान्यैः स द्विजशाम्भवैर्धृतमहाभस्मत्रिपुण्ड्राङ्कितः ।
पाण्ड्यस्यानुमते जिगाय स तदा जैनान् जितारिः सदा
सिद्धान्तोत्थितवेदवादजनितैर्वाक्यश्च तर्कान्वितैः ।। ३९ ।।

स्थाप्य ज्ञानमहोदधिं शिवजनश्रेयस्करं शाम्भवं
धर्मं भस्मवराक्षधारणविधिं यो निश्चिकायादरात् ।
सोऽन्ते धाम ययौ गिरीश्वरभवाजानेर्जनुर्नीशितुः
श्रेयांस्याश्रयितुं महेशकृपया नैश्रेयसीं तांश्रियम् ।। ४० ।।

।। इति श्रीशिवरहस्ये नवमांशे ज्ञानसम्बन्धचरितं नाम
षट्चत्वारिंशोऽध्ययः ।।

---

1. शम्भोभर्गभवान्तकाव्यय विभो पाह्यब्जजाब्जेक्षणा-
नीक्ष्योत्तुङ्गशिरःसु फालविलसन्नेत्रप्रभाभासित ।
आलोलद्युति सोमसुन्दर जटाजूटात्तगङ्गोत्तम
व्यालानद्धशरीरकान्त गरजिच्छीरञ्जिताङ्ग प्रभो ।।

।। सप्तचत्वारिंशोऽध्यायः ।।

स्कन्द उवाच -

मिथिला द्विजमानस्य वक्ष्ये पूतवतीकथाम् ।
शाङ्र्गेरिव न नामास्ति पुरी भूचक्रभूषणम् ।। १ ।।

यया चोलमहीकान्तावदने तिलकायितम् ।
सदा धनदकोटीभिरुपासित महेशया ।। २ ।।

वितायते यया सार्धं सार्धावश्यैकसारया ।
यद्गोपुरैर्निजशिरोलसच्चन्द्रार्कमण्डलैः ।। ३ ।।

विडम्ब्यते मुहुः शम्भोस्तनुरर्धेन्दुशेखरा ।
यत्र सौधा नवसुधाधवला भूरिभूतयः ।। ४ ।।

भजन्ति शिवसारूप्यं विलसत्सर्वमङ्गलाः ।
धनदं वसुसम्पूर्णं जनता हसति स्फुटम् ।। ५ ।।

अष्टाभिरेव वसुभिः सहिताममरावतीम् ।
सन्ध्यानट जटासिन्धु पृषितासितमूर्तिभिः ।। ६ ।।

श्रूयते यत्र निखिलैर्जनैर्भुवन पावनैः ।
तत्रासीन्नगरे कश्चिद्धनदत्ताभिधो वणिक् ।। ७ ।।

धत्तेऽलकापतिर्यस्य सम्पदे स्पृहयालुताम् ।
तस्मात्पूतवती नाम जज्ञे काचन कन्यका ।। ८ ।।

कला चान्द्रमसी कान्ता कालेनाम्भोनिधेरिव ।
या लावण्यपयोधिश्रीर्जगल्लोचनचन्द्रिका ।। ९ ।।

कला चान्द्रमसी कान्ता कालेनाम्भोनिधेरिव ।
या लावण्यपयोधिश्रीर्जगल्लोचन चन्द्रिका ।। ९ ।।

कमलासनहस्ताब्जकला कैलासपङ्क्तिका ।
विवर्धमानां कालेन विद्यामिव सुमेधसः ।। १० ।।

प्राप्तां शैशवतारुण्यदशयोर्मध्यवर्तिनीम् ।
वक्रिमोल्लासिवाग्रेखां भावोर्मिलदृगञ्चलाम् ।। ११ ।।

किञ्चिदुन्मील्यरोमालिं व्यक्ताव्यक्तपयोधराम् ।
नागाख्यनगरीशस्य विशो निधिपतेः सुतः ।। १२ ।।

वरः परमदत्तस्तामुपयेमे सुमध्यमाम् ।
धनदो ह्यथवात्सल्यादनुनीय सुतापतिम् ।। १३ ।।

स्वपुरे वासयामास प्रदाय विविधं धनम् ।
तेन पूतवती साकं मारेणेवरतिः सदा ।। १४ ।।

अभुङ्क्त बहुलान् भोगान् सम्पत्सौभाग्यदेवता ।
वसन् परमदत्तोऽत्र भार्ययात्मसमानया ।। १५ ।।

शिवैकतानस्तद्भक्तानिष्टदानैरतूतुषत् ।
सापि शङ्करकैङ्कर्यसततोत्सुकमानसा ।। १६ ।।

सततं पूजयामास माहेश्वरधुरन्धरान् ।
पत्या समं महादेवमर्चयन्ती पतिव्रता ।। १७ ।।

स्नात्वा स्नात्वा च तीर्थेषु शम्भुभक्तानपूजयत् ।
तदा परमदत्ताय कश्चित्प्रीतिमुपावहन् ।। १८ ।।

सुवृत्तिसहकारस्य फलद्वन्द्वमुपावहत् ।
सुधारसचमत्कारी(रि) कल्पद्रुफलसोदरम् ।। १९ ।।

तं द्वन्द्वफल (तत्फलद्वन्द्व)मादाय भार्यायै सत्यमार्पयत् ।
पत्या दत्ते सुगुप्तेऽथ पूतवत्यै फलद्वये ।। २० ।।

आगमक्षुधितः कोऽपि शिवयोगी तदालयम् ।
विलोक्य सा गृहं प्राप्तं शिवभक्तं क्षुधाकुलम् ।। २१ ।।

प्रणम्य सलिलैस्तस्य पादौ प्राक्षालयन्मुदा ।
बुभुक्षुं तं मुनिं वीक्ष्य कालक्षेपासहा सती ।। २२ ।।

घनावर्तितदुःखेन सममन्नमदान्मुदा ।
शिवावेशितचित्ता सा यथेच्छं व्यञ्जनैः सह ।। २३ ।।

एतत्तपोधने तृप्ते सा पक्वान्नं चतुर्विधम् ।
ददती विधिना पत्ये शिष्टं तच्च ददौ फलम् ।। २४ ।।

आस्वादयत्तदाऽदृष्टसुधाकरसहोदरम् ।
माध्वीझरीपरीपाक वर्त्मकारि पचेलिमम् ।। २५ ।।

स तत्सुस्वरमास्वाद्य तस्थौ मुखमवेक्षत ।
सा द्वितीयफलाकाङ्क्षां तस्य ज्ञात्वाऽऽकुलाऽभवत् ।। २६

अपारपयन्ती तद्दत्तं वक्तुमेत्य महानसम् ।
कम्पमाना करस्थं सा किञ्चित्फलवैक्षत ।। २७ ।।

अहो तव गिरीशोऽभूदाश्रयो जगतां पतिः ।
पुनरीदृक्फलं देहीत्याह तां स हसन्निव ।। २८ ।।

ध्यायन्त्या गिरिशं तस्याः फलं सद्यः करेस्थितम् ।
त्यागे ह्यकीर्तितो लोके गृही पातकमाप्नुयाम् ।। २९ ।।

विलोक्य सदृशं भीतो विस्मितश्च व्यचिन्तयत् ।
महतीं देवतामेनां अजानन्नहमल्पधीः ।। ३० ।।

अवजाने स्म जायेति कि(क)मत्र करवै विधिम् ।
अतो द्वीपान्तरव्रज्यामपदिश्य त्यजाम्यहम् ।। ३१ ।।

इति निश्चित्य सोऽप्यर्थानारोप्य तरणौ वणिक् ।
पण्यानि तत्र विक्रीय क्रीत्वा तत्र भवानि च ।। ३२ ।।

तरणेरवतीर्याथ पाण्ड्येशनगरेऽविशत् ।
सुतामुद्वाह्य निवसन् कन्यां काञ्चिदजीजनत् ।। ३३ ।।

स पूतवत्यवज्ञानभवमेनो व्यपोहितुम् ।
स्वसुतां पूतवत्याख्यां कृत्वा तत्रावसत्सुखी ।। ३४ ।।

इतस्ततः प्रचारिभ्यः पथिकेभ्यस्तथा विधम् ।
तदा तस्याश्रृणोद्वाक्यं धनदत्तः सुहृज्जनः ।। ३५ ।।

सम्यग्विचार्य तद्वार्तां धनदत्ताय बान्धवाः ।
प्राहुर्यत्र पतिस्तत्र त्वत्सुता प्राप्यतामिति ।। ३६ ।।

धनदत्तः सखीयुक्तां स्वसुतां बन्धुपालिताम् ।
आरोप्य रत्नशिबिकां अथ प्रास्थापयत्पुरम् ।। ३७ ।।

तन्महापुरमासाद्य धनदत्तस्य बान्धवाः ।
तस्मै परमदत्ताय तत्प्रियां प्राहुरागताम् ।। ३८ ।।

श्रुत्वा तामगतां भीतो गृहिणीतनयायुतः ।
पार्श्वं स पूतवत्यास्तु प्राप्य तां प्रणनाम च ।। ३९ ।।

पत्नीं कन्यां च तत्पादे पातयित्वा वचोऽब्रवीत् ।
कल्याणि तव कारुण्याद्वयं वर्तामहे सुखम् ।। ४० ।।

त्वन्नामधारिणीह्येषा कन्यकेतिवचोऽब्रवीत् ।
दृष्ट्वा पुनीतवत्येषा लज्जयाऽभून्नताननना ।। ४१ ।।

नमसि त्वं कथं पत्नीं कस्ते भावपरिप्लवः ।
इति तद्बन्धुभिः पृष्टः स तानाह वणिग्वरः ।। ४२ ।।

न मानुषी देवतेयं इत्युद्वाह्यापरां वधूम् ।
अतोऽहमेतां प्रणतो धन्या पुण्यान्तराप्यसौ ।। ४३ ।।

तच्छ्रुत्वा बन्धुषु स्तब्धेष्वाह संस्मृत्य सा शिवम् ।। ४४ ।।

स्वामिन्निश्चय एषोऽस्य पत्युरर्थे भयोच्यते ।
व्यपोह्य मांसभारं मे पैशाचं कुरुतामिति ।। ४५ ।।

देवेशोऽपि दयां तस्यामकरोद्भक्तवत्सलः ।
स मांसभारं सहसा सर्वगात्रेषु चाधुनोत् ।। ४६ ।।

विधूताशेषमांसत्वादस्थिशेषवपुश्च सा ।
मर्त्यैस्तुत्यममर्त्यैश्च रूपं पैशाचमास्थिता ।। ४७ ।।

पुष्पाणि ववृषुर्देवा नेदुर्दुन्दुभयो दिवि ।
ननृतुश्चाप्सरसः सङ्घा जगुर्विद्याधरादयः ।। ४८ ।।

तां त्यक्त्वा बान्धवाः सर्वे भीता याता यथागतम् ।
बान्धवाश्च द्रुवन्त्येते पिशाचीति विचिन्त्य ताम् ।। ४९ ।।

भूतनाथः स भूतार्थं मद्रूपं वेत्ति किन्नरैः ।
इति कैलासशैलेशं द्रष्टुं तत्प्रेरिताशया ।। ५० ।।

सा चोदीचीं दिशं प्राप्य लङ्घिताद्रिवरापगा ।
क्षुत्पिपासाश्रमैर्हीना वहन्ती स्वान्ततः शिवम् ।। ५१ ।।

कैलासोपत्यकां प्राप्य दिनैर्बहुभिरैव सा ।
शङ्कराचरितः शैलः पद्भ्यां स्प्रष्टुं न युज्यते ।। ५२ ।।

इति मूर्ध्ना तमारुक्षत् सा ह्यवाङ्मुखवैभवा ।
आरोहन्तीं वरारोहां दुरारोहमिमं गिरिम् ।। ५३ ।।

तां ददर्शाचलापाङ्गा शिववामाङ्गदेवता ।
शिरसाऽऽरोहति गिरिं काचिदस्थिमयाकृतिः ।। ५४ ।।

वीक्ष्यतामिति साश्चर्यं हरो गौरीमुदाहरत् ।
इमामुमे समायान्तीं मद्भक्तां विद्धि मद्गिरा ।। ५५ ।।

परं रूपमिदं प्राप्तं भक्तिवैभवसम्भृतम् ।
शिरसा सेयमायाति मामभ्येत्त्याम्बिकापतिम् ।। ५६ ।।

उक्ता शिवेन साऽभ्येत्य प्राणंसीत्तमुमासखम् ।
अम्ब किं करवाण्यद्य तथेत्युक्त्वागजेन(अगशेन)सा ।। ५७

तावन्नृत्तं तव द्रष्टुमिच्छामि नयनामृतम् ।
किञ्च जायेयमाहूय उत जायेय तत्तदा ।। ५८ ।।

*भुजिष्या ते भविष्यामि इत्यवादीदनिन्दिता ।
तस्या भक्तिपरिवाहसौरभीमेदुरं वचः ।। ५९ ।।

आकर्ण्य सस्मितं प्राह तथास्त्विवति महानटः ।
गच्छ भद्रे वटारण्यं नृत्तं मे द्रक्ष्यसि स्फुटम् ।। ६० ।।

मत्पार्श्वे च वसेत्युक्ता सा तेन प्राप तद्वनम् ।
दर्शयामास तादृक्षं सच्चिदानन्दविग्रहम् ।। ६१ ।।

चञ्चज्जटापतच्चन्द्रझलज्झलसुरध्वनि ।
उष्णीषयन् भुजादण्डं भ्राम्यद्ब्रह्माण्डमण्डलः ।। ६२ ।।

नटो डमरुकोल्लासिकरस्थामरपावकः ।
किञ्चित्कुञ्चितसव्याङ्घ्रिर्नाट्योल्लासमदर्शयत् ।। ६३ ।।

सा तत्र देवदेवश्य पश्यन्ती ताण्डवं मुहुः ।
वसत्यद्यापि तत्प्राश्र्वे परमानन्दमन्थरा ।। ६४ ।।

---

* भुजिष्या - a maiden slave.

अहो सर्वस्य जगतः स्वयं जनयितापि वा ।
अम्बेत्यादिभवस्तस्य महिमा केन वर्ण्यते ।। ६५ ।।

तदा प्रभृति देवस्य तत्राधिवसतो वने (?) ।
अम्बातातेश इत्याख्या विख्याता धरणीतले ।। ६६ ।।

सा शैलकन्येव सदैव शम्भोः (शम्भुं)
आनन्दयन्ती प्रविलोकयन्ती ।
प्रमोदभूम प्रथमानचेता-
श्चकास्ति मुक्तेरधिदेवतेव ।। ६७ ।।

ये पूतवत्याश्चरितं पठन्ति
श्रृण्वन्ति वा शाम्भवमूर्तिभक्तेः ।
ते भुक्तिमानन्दभृतां समेत्य
प्रयान्ति शम्भोः पदमन्त्यकाले ।। ६८ ।।

।। इति श्रीशिवरहस्ये नवमांशे पूतवतीचरितं नाम
सप्तचत्वारिंशोऽध्ययः ।।

।। अष्टचत्वारिंशोऽध्यायः ।।

स्कन्द उवाच -

तद्भूतिनाम्नो भक्तस्य भूतिभूषस्य सत्तम ।
चरित्रं ते पवित्रं च त्रिणेत्रप्रेमपात्रिणः ।। १ ।।

वक्ष्यामि पापनाशाय पावनाय च भूतये ।
शशाङ्कपुरवास्यासीच्चोले कश्चित् द्विजाग्रणीः ।। २ ।।

तद्भूतिरिति विख्यातः सदा शङ्करकिङ्करः ।
स श्रुत्वा वाक्पतेर्वृत्तं तस्य नाम्नाङ्कितप्रपाः ।। ३ ।।

अतानीत् तत्प्रपाधर्मं स द्विजो वाक्पतेः सदा ।
कदाचिद्वाक्पतिस्तत्र शिवधामानि पर्यटन् ।। ४ ।।

तत्प्रपां वीक्ष्य हृष्टात्मा मन्नाम्ना केन कारिता ।
इत्यप्राक्षीत्समीपस्थांस्ते च वाक्पतिमब्रुवन् ।। ५ ।।

परिचराः (ऊचुः) -

अयि तापसमूर्धन्यगणप श्रूयतामिदम् ।
तद्भूतिनाम्ना विप्रेण शशाङ्कपुरवासिना ।। ६ ।।

वागीशप्रेमभक्तेन नामेदं लिखितं विभो ।
वापीकूप तटाकानि क्षेत्रारामगृहाणि च ।। ७ ।।

प्रपेयं धर्मशालाश्च सर्वं वागीशनामतः ।
इति श्रुत्वा वचस्तेषां तानपृच्छत्स वाक्पतिः ।। ८ ।।

वाक्पतिः उवाच -

त्वं च प्रपाकरो नित्यमूषरे क्षारसंयुते ।
स्वयं समार्तः कस्येदं नाम सालिख्यते वद ।। १५ ।।

इति ब्रुवाणं वागीशं प्राह भूतिविभूषितः ।
कृताञ्जलिपुटो भूत्वा प्राह संहर्षिताननः ।। १६ ।।

विप्रः उवाच -

अहं न साधुस्त्वत्प्रोक्तं यच्छ्रुत्वा व्याकुलोऽस्म्यहम् ।
दृढं मृडाब्जपादोत्थमरन्दानन्दमेदुरः ।। १७ ।।

जैनानाजौ विनिर्जित्य कृत्वा भस्मप्रकाशनम् ।
तस्य वाणीपतेस्तुल्यप्रभावस्यैव वाक्पतेः ।। १८ ।।

आलिख्याप्यहमेवाद्य नाम लेखेषु विस्मये ।
भक्तस्य वा महेशस्य नाम्नोर्नास्ति सदान्तरम् ।। १९ ।।

क्वाहं महेशः किं वाद्य शम्भुभक्तपदाश्रयः ।
भक्तभृत्योऽस्म्यहं शम्भोर्नास्ति मेऽन्यच्च तापस ।। २० ।।

इत्थं तद्भूतिवचसा तुष्ट एवाह वाक्पतिः ।

वागीशः उवाच -

धन्यस्त्वं सर्वमान्योऽसि भासुरो भूसुरो यतः ।। २१ ।।

त्वत्प्रेमभावं भावेषु द्रष्टुमुत्कण्ठितं मनः ।
समागतोऽगजाजानिं प्रणम्य शिवधामसु।। २२ ।।

वाक्पतिश्चाहमेवास्मि इत्युक्तोऽपि च भूसुरः ।
जहृषे नितरां दृष्ट्वा प्राणंसीद्विस्मयान्वितः ।। २३ ।।

प्राह प्रेमभरद्वाक्यमविश्रान्ताश्रुलोचनः ।। २४ ।।

द्विजः उवाच -

धन्योऽस्मि नितरां तात मातस्त्वं शाम्भवोत्तमः ।
यन्मे गृहं समायातस्तृप्ता मे प्रपितामहाः ।। २५ ।।

यत्र शाम्भवपादाब्जरजोलेशः पतिष्यति ।
यत्र तिष्ठति योगीन्द्रः शाम्भवः शिवभावनः ।। २६ ।।

तत्रैव शम्भोः क्षेत्राणामुत्तमं पापतापहम् ।
यस्मिन् गृहे शाङ्गलिङ्गं शाम्भवो वाधितिष्ठति ।। २७ ।।

तत्र तिष्ठति गौरीशः शिपिविष्टोऽतिहर्षितः ।
धन्यस्त्वत्पूतपादाब्जरेणोरणुतरोऽप्यणुः ।। २८ ।।

नाणीयसा मे तपसा मनसापि विचिन्तितः ।
स तं प्रवेश्य सदने उपवेश्य तदा द्विजः ।। २९ ।।

प्रक्षाल्य विधिवत्पादौ पावनैर्जीवनैस्तदा ।
तत्पादोदकमाचम्य मूर्ध्नि सम्प्रोक्ष्य चासकृत् ।। ३० ।।

गन्धाक्षताद्यैः सम्पूज्य भोजनाय न्यमन्त्रयत् ।
अत्रैव भोज्यं भोक्तासि प्राज्याज्याद्यन्नमुत्तमम् ।। ३१ ।।

इत्यभ्यर्थनया तस्य तद्भूतेर्भक्तिपूतया ।
वशीकृतात्मा वागीशस्तत्तथेत्यभ्यमन्यत ।। ३२ ।।

ततोऽन्तर्गृहमासाद्य स्वप्रियां प्राह भूसुरः ।

द्विजः उवाच -

अस्मद्भाग्यवशात्प्राप्तः शाम्भवः शम्भुभावनः ।। ३३ ।।

भुवने च सदा मान्यो नान्यस्तुल्योऽस्य कश्चन ।
देवेशदययाऽऽयातो वागीशो मे गृहं यतः ।। ३४ ।।

पाकादिषु क्रियाशक्तिं कुरुष्वेति तदावदत् ।
पक्वं चान्नादिकं भक्ष्यं ससुतं साभ्यभाषत ।। ३५ ।।

माता उवाच -

उद्यानमेत्यानय त्वं विशालं कदलीदलम् ।
भोक्तुं सक्तून्यथादातुमत्तुमन्नादिकं बहु ।। ३६ ।।

इति मात्रा नियुक्तः सन्पित्रा चोद्यानमेत्य सः ।
करं प्रसारयामास कदलीदलकृन्तने ।। ३७ ।।

तं महानदशत्सर्पो दर्पोत्थितफणस्तदा ।
बिलेशयमहाभोगवेष्टितं स्वशयं(स्वकरं) तदा ।। ३८ ।।

विधूय स विषार्तोऽपि रभसा कदलीदलम् ।
समानीय ददौ मात्रे धरित्र्यां मूर्छितोऽपतत् ।। ३९ ।।

विषविह्वलमालोक्य पितरौ विह्वलं(लौ) सुतम् ।
विषालीढं व्यजानीतां वीतशोणितविग्रहम् ।। ४० ।।

मृते विनीततनये धैर्यमालाम्ब्य दम्पती ।
वाक्पतेर्भोजने युक्तौ सोत्साहौ तौ बभूवतुः ।। ४१ ।।

अविकारौ तदा भोक्तुं तं समाह्वयतां मुदा ।
सोऽपि चोत्थाय धौताङ्घ्रिर्भोजनासनमेत्य सः ।। ४२ ।।

धृत्वा भस्म स्वयं ताभ्यां धारितुं भस्म तद्ददौ ।
प्रियपुत्राय वां भस्म ददतं सर्वभाग्यदम् ।। ४३ ।।

इतीरितावुभावेतौ असौ नास्तीत्यवोचताम् ।
तच्छ्रुत्वा विक्रियां ताभ्यां ज्ञात्वा ध्यानेन तत्स्थितिम् ।।

मृते विनीततनये धैर्यमालम्ब्य दम्पती ।
वाक्पतेर्भोजने युक्तौ सोत्साहौ तौ बभूवतुः ।। ४५ ।।

अविकारौ तदा भोक्तुं तं समाह्वयतां मुदा ।
सोऽपि चोत्थाय धौताङ्घ्रिर्भोजनासनमेत्य सः ।। ४६ ।।

धृत्वा भस्म स्वयं ताभ्यां धारितुं भस्म तद्ददौ ।
प्रियपुत्राय वां भस्म ददतं सर्वभाग्यदम् ।। ४७ ।।

इतीरितावुभावेतौ असौ नास्तीत्यवोचताम् ।
तच्छ्रुत्वा विक्रियां ताभ्यां ज्ञात्वा ध्यानेन तत्स्थितिम् ।।

यथार्थं वदतं युष्मत्प्रियकर्तास्मि साम्प्रतम् ।
इत्युक्तं तद्वचः श्रुत्वा उद्विग्नं प्राहतुस्तदा ।। ४९ ।।

दम्पती ऊचतुः -

यथार्थकथने चाद्य भुक्तिविघ्नो भवेत्तव ।
न चेन्महेश्वरवचोल्लङ्घनं दोषकारणम् ।। ५० ।।

किं कुर्वो गिरिशो वेत्तित्यन्तश्चिन्ताभरान्तरौ ।

दम्पती -

स दन्दशूकसंदष्टो वने दिष्टिवशाद्धि नौ ।। ५१ ।।

किं वा मे तनयेनाद्य विलम्बं तव नोत्सहे ।
भोजने भाजनं शुद्धं व्यजनेनाद्य वीजये ।। ५२ ।।

इति तत्प्रीतितः प्रोक्तं सदयो मदवर्जितः ।
कर्मैर्बहिष्कृतं(?)केनेत्युदस्थाद्भक्तवत्सलः ।। ५३ ।।

सञ्जीवयितुमाकाङ्क्षन् स शिवं विप्रनन्दनम् ।
एवं ध्यात्वा जगौ वाग्मी सोऽभूत्सुप्त इवोत्थितः ।। ५४ ।।

वागीशः -

किं कालकूटगरलादपि घोरमेत-
च्छम्भो गरं गरगलस्य तवानुमेयम् ।
बालोऽप्ययं भुजगवक्त्ररदोरुदष्टो
दृष्ट्या तैवष लभतां खलु जीवितं हि ।। ५५ ।।

पापघ्नं सकलास्यगं किल विभो ज्ञानप्रभावेऽसमं
शब्दप्रोच्चरणेन शीघ्रमगजाकान्तप्रभाबोधकम् ।
संसारार्णवतारणे सुखतरिं शम्भो शिवेत्यादरा-
दारान्मद्धृदि सन्निधत्स्व भगवन् नाम्नैव रूपं दृशे ।।

मन्यामहे चारु शिवस्य नाम
पापौघभित्केवलशब्दमात्रात् ।
त्वन्नामसम्मन्त्रितभस्मसङ्गा-
दुज्जीवतामेष सुतो द्विजस्य ।। ५७ ।।

इत्युक्त्वा तं स भस्माङ्के कृत्वा फालं गलं तथा ।
हृदि सर्वाङ्गपादान्तं संस्पृश्य शवबालकम् ।। ५८ ।।

शिवनामानुषङ्गाङ्कभस्मनाऽजीवयत्सुम् ।
स सुप्त इव चोत्तस्थौ तदा भस्मप्रभावतः ।। ५९ ।।

अथ माहात्म्यतः शम्भोस्तं दृष्ट्वा जातविस्मयाः ।
जना नृपश्च तत्रत्या सपुत्रस्तत्पिता वशी ।। ६० ।।

वाचामधीशपदयोः पातयित्वा सुतं तदा ।
ववृषुः कुसुमासारं देवा दिवि मुदं व्यधुः ।। ५१ ।।

तेन वाक्पतिना विप्रः पुत्रेण बुभुजे वशी ।
संस्तुतस्तेन विप्रेण'ययौ नन्तुं सभापतिम् ।।
वामालालितवामाङ्गः सभानटपदं ययौ ।। ६२ ।।

यच्छृण्वतां वाञ्छितकामधेनुः
श्रृणोति तद्भूतिचरित्रमेतत् ।
छित्वाऽखिलान् संसृतिपाशबन्धान्
प्रयाति शैवं परमं पदं सः ।।

।। इति श्रीशिवरहस्ये नवमांशे अष्टचत्वारिंशोऽध्ययः ।।

।। एकोनपञ्चाशोऽध्यायः ।।

स्कन्द उवाच -

अस्त्यशेषमहीकान्तालङ्कारश्चोलमण्डले ।
शास्त्रमङ्गलनामश्रीनगरं सह्यजातटे ।। १ ।।

तत्रासीन्नीललग्नाख्यः कश्चिद्भूसुरशेखरः ।
शिवपादाम्बुजध्यानविनिर्धूतान्यबन्धनः ।। २ ।।

अधीतवेदवेदाङ्गतदुपाङ्गप्रविस्तरः ।
अष्टाविंशति कोटीनामागमानां च देशिकः ।। ३ ।।

ज्ञानयोगक्रियाचर्यापादेषु कृतसंस्तवः ।
दीक्षितो दीक्षयत्यन्यान्दयया शरणागतान् ।। ४ ।।

त्रिपदार्थविवेकाम्भः प्रक्षालितमलत्रयः ।
वाजपेयादिभिर्यज्ञैराराधितमहेश्वरः ।। ५ ।।

कदाचित् त्र्यक्षनक्षत्रे भार्यया सह स द्विजः ।
भयहर्तृपतिं शम्भुमाराध्य पुरतः स्थितः ।। ६ ।।

जपन् पञ्चाक्षरं मन्त्रं शिवैकाहितलोचनः ।
पत्नी च साञ्जलिस्तस्य सिषेवे तं महेश्वरम् ।। ७ ।।

तदा [1]पत्नी महेशस्य [2]लूता काचन मूर्धनि ।
सा बभ्राम शिवस्याङ्गे तन्तुजालविधायिनी ।। ८ ।।

शिवे निपतितां लूतां सा दृष्ट्वा सहसाकुला ।
तां विमृज्यैव लिलिहे जिह्वया सृतलालया ।। ९ ।।

---

1. पत्नी - अपतत् इति वर्नितव्यम् ।
2. लूता - a spider.

लिहतीं जिह्वया तां वै वीक्ष्यमाणो मृगीदृशम् ।
चुकोप नीललग्नोऽसौ दूयमानेन चेतसा ।। १० ।।

तादृशीं स द्विजः पत्नीं सपापे शिवदूषणम् ।
कथं कृतं त्वयेत्युक्त्वा सहसा पिदधे दृशौ ।। ११ ।।

स शिवद्रोहिणीं मत्वा त्यक्त्वा तां स्वगृहं ययौ ।
सापि तत्रैव देवेशं ध्यायन्ती न्यवसन्निशि ।। १२ ।।

नीललग्नः स्वके गेहे विहाय गृहिणीं स्वयम् ।
अस्वाप्सीदन्तरीशानमनुसन्धाय(न) निर्भरः ।। १३ ।।

ततः स्वप्ने महादेवमद्राक्षीत्करुणानिधिम् ।
भुजङ्गपुङ्गवोन्नद्धं तटित्सम्भारसन्निभम् ।। १४ ।।

गङ्गातरङ्गसङ्घदृझणत्कारमहाध्वनिम् ।
बिभ्राणमुन्नतैकाग्रसशिखण्डं जटाधरम् ।। १५ ।।

अङ्कूरिजगन्मूलकन्दोऽयमिति भावितम् ।
ज्वलल्ललाटनेत्राग्निद्रव्यच्चन्द्रसुधारसम् ।। १६ ।।

श्वसत्पद्मजनुःकोटिकरोटिघटितस्रजम् ।
दयामृतपरीवाहमनोहरदृगञ्चलम् ।। १७ ।।

समुन्नतनसं भावस्वत्पन्नगाधिपकुण्डलम् ।
मन्दस्मितरुचिज्योत्स्नास्नापिताधरपल्लवम् ।। १८ ।।

गौरीवदनलावण्यादर्शगण्डतलद्वयम् ।
लाक्षामुद्रितसार्वज्ञद्रविणग्रन्थि विभ्रमम् ।। १९ ।।

बिभ्रतं भृतकाकोल कालिमानमहागलम् ।
सुमेरुपीवरस्कन्धबन्धुबन्धुर कन्धरम् ।। २० ।।

भुजगेन्द्रबृहद्भोगपरिणाहमहाभुजम् ।
अशेषभुवनत्राणप्रतिभाव्यकरैः करैः ।। २१ ।।

परश्वथमृगाभीतिवरोद्भासिभिरञ्चितम् ।
गौरीघनकुचाभोगदृढ विस्तार वक्षसम् ।। २२ ।।

नाभिं क्षीरार्णवावर्तसनाभिं प्रतिबिभ्रतम् ।
मत्तैरावतहस्तोरुसुवृत्तयुगभास्वरम् ।। २३ ।।

सारङ्गधरभूतेज्यनिषादितसजङ्घिकम् ।
अशेषलोकत्तमसामवसानपदे पदे ।। २४ ।।

सुरकोटीररत्नांशु पुञ्जकिञ्जल्कचारिणी ।
सुमनः सुमनोद्यानसुमनः स्तबकोच्चम् ।। २५ ।।

दयितं सहजामोदैरधिवासितदिक्तटम् ।
किरीटहारकेयूर*परिबर्हविराजितम् ।। २६ ।।

महार्हमणिमञ्जीरसमञ्जितपदाम्बुजम् ।
आसेचनकलावण्यमशेषदिविषद्व्रजम् ।। २७ ।।

पुण्डरीकाजिनवसं पुण्डरीकनिभद्युतिम् ।
पुरस्तादृग्यजुः सामाथर्ववेदैः सविग्रहैः ।। २८ ।।

आगमैश्चाञ्जलिकरैः स्तूयमानस्वबैभवम् ।
यक्षकिन्नरगन्धर्वसिद्धविद्याधरैरपि ।। २९ ।।

---

* परिबर्ह – Royal wealth, ornaments.

चतुर्विधमहावाद्यघनारवसमारवैः ।
सोमधामसमच्छत्रवालव्यजनदर्पणैः (णम्) ।। ३० ।।

बिभ्रद्भिर्गणपश्रेष्ठैः शारदाभ्रोपमैः सदा ।
भवपाशनिबद्धानां पशूनां पापमोचनम् ।। ३१ ।।

स्वप्नेऽपश्यत् तदाशम्भुरवदत्तं दयानिधिः ।

ईश्वरः उवाच -

त्वं मूर्ख न विजानीषे तत्वं मद्भक्ति संश्रयम् ।। ३२ ।।

दधानां मयि वात्सल्यमधिकं स्वस्तनन्धयात् ।
यल्लिलेह ममाङ्गं सा सन्तप्तकनकोज्ज्वलम् ।। ३३ ।।

तव निर्भर्त्सनाभीता यन्न लीढवती सती ।
तदेतद्व्रणसङ्क्लृप्ते ह्यन्वभूवं महाव्यथाम् ।। ३४ ।।

इति स्वप्नात्प्रबुध्यैष भयविह्वलमानसः ।
भयहर्त्रीश्वरं नत्वा पत्नीं स्वामप्यसान्त्वयत् ।। ३५ ।।

विज्ञानामोदसम्बद्धमागतं स्वं निकेतनम् ।
प्रत्युद्गम्य सपर्याभिरार्यं तं पर्यतोषयत् ।। ३६ ।।

सभार्यं नीलकण्ठाख्यं गायन्तं च समागतम् ।
सम्पूज्य वासयामास नितरां सुखितं निशि ।। ३७ ।।

प्रातर्विज्ञानसम्बद्धो भयपङ्क्तीश्वरस्तवम् ।
विदधे नीलकण्ठस्य शम्भोर्नामपदाङ्कितम् ।। ३८ ।।

ज्ञानसम्बद्ध उवाच -

ज्यासूत्रीकृतभोगकर्षणभरायासात्फणिग्रामणी-
निःश्वासानिलमुक्तहारगरलज्वालावलीलीलया ।
निर्दग्धे त्रितये पुरां परिपतद्भूरीजटावासना-
व्यापारैकफलो बभूव तरलो यद्बाणजन्माऽनलः ।। ३९ ।।

मौर्वी भूषणकुण्डली धनुरहो धामस्वकीयं शरो
लक्ष्मीशो गरुडासनोऽम्बुजभवो यन्ता सरोजप्रियः ।
चक्रेचेन्दुरवी रसा रथवरः श्वासास्तुरङ्गास्तथा
शेषान्यष्टतनुर्भवान् शिवभव त्वद्भागधेयं जगत् ।। ४० ।।

स्तुत्वा विज्ञानसम्बन्धे प्रयाते निजवेश्मनि ।
उवास सुचिरं ध्यायन्नुमालङ्कृतविग्रहम् ।। ४१ ।।

ततो विज्ञानसम्बन्ध विवाहोत्सवदर्शिभिः ।
सह सर्वैश्च सायुज्यमगमत्सहसा द्विजः ।। ४२ ।।

सम्प्राप्य सायुज्यमशेषकर्ता
विधूय दूरेऽखिल पञ्चपाशान् ।
आनन्दसाम्राज्यपदाधिरूढः
सम्प्राप साम्यं परमं शिवेन ।। ४३ ।।

ये नीललग्नस्य चरित्रमेत-
च्छृणवन्ति वा सर्वजगत्पवित्रम् ।
ते भुक्तिलक्ष्मीमनुभूय भूमौ
महेश्वरस्याङ्घ्रियुगं प्रयान्ति ।। ४४ ।।

।। इति श्रीशिवरहस्ये नवमांशे एकोनपञ्चशोऽध्ययः ।।

।। पञ्चाशोऽध्यायः ।।

स्कन्द उवाच -

प्रणम्य नीललग्नस्य शिवसायुज्यमीयुषः ।
बहुधा चरणौ पीड्य नमिन्वन्ति कथां शुभाम् ।। १ ।।

यदाज्ञां सर्वभूपाला वहन्तो निजमूर्धभिः ।
नीराजयन्ति कोटीररत्नदीपैः पदाम्बुजम् ।। २ ।।

नटन् मृडपदाङ्गुण्ठनखाग्रकृतरन्ध्रतः ।
यः प्रतापानलज्वालाजालैरुत्सर्पिभिर्मुहुः ।। ३ ।।

ब्रह्माण्डमुञ्जनिक्षिप्तनवपल्लव संहतैः ।
सुवर्णपूर्णकुम्भस्य विभ्रमं बहति स्फुटम् ।। ४ ।।

मनुमान्धातृनहुषनलराममुखान्नृपान् ।
अन्येऽशेरयते चित्रैश्चरितैर्विक्रमोर्जितैः ।। ५ ।।

तादृशैः सूर्यवंश्यानां कूटस्थैर्बाहुजोत्तमैः ।
रक्षिते चोलभूपालैः कवेरतनयातटे ।। ६ ।।

हेमलभपुरे कश्चिन्नमिन्नद्याख्यया श्रुतः ।
यस्त्रेताग्नौ रवौलिङ्गे चित्ते चानर्च शङ्करम् ।। ७ ।।

शिवैकतानः सततं शिवभक्ताभि पूजकः ।
जितारिवर्गः सुमना यश्चचार त्रयीपथि(पथे) ।। ८ ।।

स तत्र निवसन् विप्रः साक्षादग्निरिपापरः ।
शिवमेव परं देवं प्रापद्यः शरणं विभुम् ।। ९ ।।

त्रिविधैः करणैरेनमारराधगतस्पृहः ।
कमलालयमभ्येत्य कदाचिज्जगदीश्वरम् ।। १० ।।

प्रणम्य निशि देवस्य दीपारोपणमुद्दिशन् ।
घृतं याचितुमेकस्य जिनस्य सदनं गतः ।। ११ ।।

जगदे तेन तत्रैष सोपालम्भमिदं वचः ।
विप्रमूढ प्रदीपैः किं तद्देवस्य यतोह्ययम् ।। १२ ।।

सोमसूर्याग्निनयनः स्वयं चैष तवात्मकः ।
तन्मूर्तिर्वह्निजलयोर्नास्तीत्यात्यन्तकी तदा ।। १३ ।।

अतो जलैर्भवान् दीपं प्रभूतं परिणामय ।
इति श्रुत्वा वचस्तस्य द्विजो व्यथितमानसः ।। १४ ।।

वल्मीकपतिभभ्येत्य ववन्दे शिसा विभुम् ।
तत्र वाचऽशरीरिण्या कुरु दीपान् जलैरिति ।। १५ ।।

उक्तः प्रमुदितश्चक्रे तथैवैतान् सहस्रशः ।
तेन विस्मापिताशेषजनताविहितस्तवः ।। १७ ।।

पुनः पुनरुपागम्य पूजयामास शङ्करम् ।
स तत्तोत्तरफल्गुन्यां जातु यात्रोत्सवे दिने ।। १८ ।।

मणिलस्थलमायान्तं त्यागाधीश्वरमीश्वरम् ।
कमलालयवास्तव्यं समस्तजनसुस्थिरम् ।। १९ ।।

अनुव्रज्य पुनः सायमियाय निजमन्दिरम् ।
शयानः स बहिर्वेद्यां पूजाभोजनकर्मणे ।। २० ।।

बोधयन्तीं निजां पत्नीं प्रबुद्धां गिरमभ्यधात् ।
अस्पृश्यैर्बहुभिः स्पृष्टः तत्र यात्रोत्सवे विभोः ।। २१ ।।

स्नास्याम्याहरवारीति तां प्रेष्य स पुनः स्वपन् ।
कमलालयजान् सर्वान् शर्वाञ्जानीहि शाङ्करान् ।। २२ ।।

इति वाचं विभोः श्रुत्वा बुबुधे धृतविस्मयः ।
तं पत्न्यै स्वप्नवृत्तान्तं निवेद्य समगाद्द्विजः ।। २३ ।।

कमलालयमभ्येत्य ददर्श निखिलाञ्जनान् ।
परश्वथमृगाभीतिवरहस्तांस्त्रिलोचनान् ।। २४ ।।

चन्द्रखण्डधरानुद्यत्तपनायुततेजसः ।
सविस्मयस्तानखिलानभिवन्द्य ततो हरम् ।। २५ ।।

प्रणिपत्याञ्जलिधरः प्राह भक्त्या(क्ता)नुकम्पिनम् ।
प्रसीद पार्वतीनाथ प्रसीद परमेश्वर ।। २६ ।।

प्रसीद सच्चिदान्द प्रसीद करुणानिधे ।
नमस्ते सर्वजगतां नाथ कारण शंकर[1] ।।

पालकाय नमस्तुभ्यं संहर्त्रे च नमो नमः ।
सत्वं रजस्तमश्चेति त्रिभिर्मायागुणैर्वृतः ।। २८ ।।

त्रिधा स्थितस्त्वमखिलं सृजस्यवसि हंसि च ।
कार्याद्यैर्नवभिर्लिङ्गैस्तथैवाष्टतनुं विभुम् ।। २९ ।।

---

1. सर्वजगतां नाथ, सर्वजगतां कारणभूत, सर्वजगतां सुखनिदानभूतेति नाथादिषु त्रिषु प्रत्येकमन्वेति सर्वजगताम् इति ।

सर्वज्ञं सर्वकर्तारमाहुस्त्वां मानवेदिनः ।
जीवादिभिन्नमेकं त्वां जीवं केचित्प्रचक्षते ।। ३० ।।

भिन्नाऽभिन्नं परकेऽपि भेदाभेदविवर्जितम् ।
चिन्मयख्यापिनं नित्यं शान्तमेकं सदाशिवम् ।। ३१ ।।

सर्वानुग्राहकं शम्भुं त्वां वदन्ति त्वदागमाः ।
निगमाश्च वदन्ति त्वां महेशं पुरुषोत्तमम् ।। ४० ।।

सर्वज्ञं[1] सौगताः सिद्धाः परमेष्ठिनमार्हताः ।
हा हन्त कारवोऽप्याहुर्विश्वकर्मेति शङ्करम् ।। ३३ ।।

विलोक्य कापिलाश्चापि लोकेसिद्धेश्वरं विदुः ।
त्वत्कृपामृतनिष्यन्दिनयनान्तविलोकितैः ।। ३४ ।।

भूयते मुक्तितरुणी पाणिग्रहपरैर्नरैः ।
द्रष्टुमीष्टे शिरो यस्य न वेधाश्चरणं हरिः ।। ३५ ।।

तस्य ते महिमानं कः क्षमो वर्णयितुं विभोः ।
अस्तातिशयसाम्यस्त्वं विश्वाधिक इति श्रुतौ ।। ३६ ।।

गीयसे त्वां विदित्वैव मुक्तिर्नान्येन हेतुना ।
अपराधसहस्राणां भाजनं मामनुक्षणम् ।। ३७ ।।

कृपया केवलं नाथ कृतार्थमकृथाः स्वयम् ।
इति स्तुत्वा जगन्नाथं ननामाष्टाङ्गचङ्क्रमैः ।। ३८ ।।

तदा प्रभृति तत्रैव चकार वसतिं पुरे ।
ततः कदाचिद्वागीशः कमलालयमागतः ।। ३९ ।।

---

1. बुद्धम् । "सर्वज्ञः सुगतो बुद्ध" इत्यमरवचनात् ।

तस्य नामाङ्कितैः सूक्तैरस्तावीज्जगतां पतिम् ।। ४० ।।

तदनु तदनुभावं भावयन्भावितात्मा
भवचरणसरोजध्याननिर्धूतपाशः ।
अभजत यजमानो यज्ञदानैरलभ्यं
मुदमपदमघानां ईशभूयाह्वयं सः ।। ४१ ।।

यस्येशस्य विभूतिभिस्त्रिजगतीनिर्माणरक्षालय
व्यापारः क्रियते तदिन्द्रपदवीसम्प्रापणे नैपुणीम् ।
यल्लीलायितमुन्नतोन्नतपदावाप्तिस्तिरश्चामपि
स्तोतुं कः करुणामिमां प्रभवति श्रीचन्द्रचूडामणेः ।।

नमिनन्तिकथामिमां पठेद-
पिवा यः श्रृणुयात्स मानवः ।
भुवि भोगमवाप्य निस्तुलं
नियतं धाम तदेति शाम्भवम् ।। ४३ ।।

।। इति श्रीशिवरहस्ये नवमांशे पञ्चशोऽध्ययः ।।

।। एकपञ्चाशोऽध्यायः ।।

स्कन्द उवाच -

ज्ञानसम्बन्धनाथस्य चरणं शरणं सताम् ।
किल कालजितो वक्ष्ये किलकामस्य वैभवम् ।। १ ।।

प्रकाशे चोळदेशेऽस्ति कावेरीतिरगोचरम् ।
चिरं सुरुचिरप्रख्यं श्रीमहामङ्गलाह्वयम् ।। २ ।।

आयता वीथयो यस्य सौधा उत्सेधशालिनः ।
गिरिप्रकाराः प्राकारा आरामा नन्दनोपमाः ।। ३ ।।

किलकामाह्वयः कश्चिद्देवगोपकुलोद्भवः ।
अभवद्विभवोदारे तत्पुरे शूद्रसत्तमः ।। ४ ।।

सेनापतिश्चोलपतेरुमापतिलसन्मतिः ।
वाङ्मनः कर्मभिः सर्वैः शर्वभक्तैकपूजकः ।। ५ ।।

श्रीकरञ्जपुरेशश्रीकार्यमेव विधाय सः ।
शिवभक्ताङ्घ्रियुगलममंस्त निधिमात्मनः ।। ६ ।।

सौम्येशेन महेशोऽभूत्प्रेषितो योषितं प्रति ।
इति श्रुत्वा प्रचुक्रोध किलकामः समाकुलः ।। ७ ।।

दूत्ये नियुक्तं केनापि मानिनीं प्रतिकामिना ।
वीथ्यां निशीथे मन्नाथो यातायातगतं व्यधात् ।। ८ ।।

स्तुत्यः सुरैः शिवो दूत्ये भृत्यप्रीत्यर्थमेत्यसौ ।
अदीर्घदर्शितो(दर्शनात्) मूर्खो हा महेशं समादिशत् ।। ९

तं द्रक्ष्यामि कदा निन्द्यं किं वा दृष्टेन तेन मे ।
इत्युक्त्वा किलकामोऽभूत्सरोषकलुषाशयः ।। १० ।।

किलकामोदितं क्रौर्यं सौम्यः श्रुत्वाऽथ शूलिने ।
व्यपोह्योमेऽपराधोऽयं इति प्रह्वो व्यजिज्ञपत् ।। ११ ।।

शिवो घटयितुं भावं सौम्येशकिलकामयोः ।
कलिकामेऽक्षिपच्छूलं स चाभूत्तेन पीडितः ।। १२ ।।

किलकामः शूलपाणिमस्तौषीच्छूलपीडितः ।
तं भक्तं तत्स्तुति प्रीतः स्वप्ने प्राह च शङ्करः ।। १३ ।।

वर्य मद्भक्तवर्यस्य तवैतां शूलवेदनाम् ।
सौम्यं विना शमयितुं नापरः शक्नुयादिति ।। १४ ।।

अथाह कलिकामस्तं सप्तजन्माद्यनुग्रहात् ।
वयं त्वत्किङ्करा नाथ त्वदृते नोऽस्ति नार्तिहा ।। १५ ।।

सौम्याद्धि शूलशमनाद्वरं तद्वेदना मम ।।
तस्य त्वत्प्रियभृत्यस्य त्वयाशा पूर्यतामिति ।। १६ ।।

तदा शिवस्तिरोभूतः सौम्यमेत्याब्रवीद्वचः ।
किलकामस्य शूलार्तिं शमयाद्याचिरादिति ।। १७ ।।

शूलं शमयितुं सौम्य आयातीति निशम्य सः ।
किलकामो भृशं शूलव्यसनादपि विन्यथे ।। १८ ।।

स तच्छूलं शमयितुं निवासान्निर्ययौ निजात् ।
स च सौम्यागतिं श्रुत्वा किलकामो व्यचिन्तयत् ।। १९ ।।

स यावदेति सौम्यो मे शूलं शमयितुं स्वयम् ।
दारयाम्युदरं तावदिति कुक्षिं व्यदारयत् ।। २० ।।

गतासोः किलकामस्य भार्यानुमरणोद्यता ।
निशम्य सौम्यागनं क्षणं तस्थौ अरोदना ।। २१ ।।

प्रच्छाद्य स पतिं सद्यः कृत्वा गृहमलङ्कृतम् ।
आगतं सौम्यमानीय विव्यथोपाचरत् स्वयम् ।। २२ ।।

किलकामोदररुजः शमनायाहमागतः ।
इति वादिनमाहुस्तं तस्याः पार्श्वगता जनाः ।। २३ ।।

शान्ता च दैवात्तस्यार्तिस्त्वदागमनवैभवात् ।
सौम्य गत्वा स्वपिति हि सुखेनान्तर्गृहान्तरे ।। २४ ।।

इत्युक्तः स पुनः प्राह द्रष्टुमिच्छामि तं त्विति ।
अदर्शयंश्च ते तस्मै मृतं तं निर्गतान्त्रकम् ।। २५ ।।

तं दृष्ट्वा हन्त हन्तेति सौम्यो व्यथितमानसः ।
प्राणान् स्वयं परित्यक्तुमग्रहीदसिधेनुकाम्* ।। २६ ।।

दयया देवदेवस्य किलकामः समुत्थितः ।
हा हतोऽस्मीत्यतिस्नेहादग्रहीत्तत्करायुधम् ।। २७ ।।

---

* असि धेनुका - knife.

अन्योन्यमतिमान्यौ तौ नेमतुः स्निग्धमानसौ ।
तत्कर्म दृष्ट्वा देवाश्च ववृषुः पुष्पमेतयोः ।। २८ ।।

तौ स्निग्धसुहृदौ भूत्वा करञ्जपुरशङ्करम् ।
प्रणेमतुः स तं सौम्यः श्रीगानैः शङ्करं जगौ ।। २९ ।।

किलकामयतः सौम्यः समेत्य कमलालयम् ।
देवं पुष्पालयावासं नत्वा तत्रावसच्चिरम् ।। ३० ।।

तत्रोषित्वा चिरं कालं सुन्दरेशेन मानितः ।
किलकामो निजं धाम जगाम तदनुज्ञया ।। ३१ ।।

दास्येन चिरमीशानं सन्तोष्याव्यभिचारिणा ।
सुरथः किलकामोऽसौ शैवं धाम जगाम तत् ।। ३२ ।।

प्रथितस्य पवित्रकीर्तनं
किलकामस्य चरित्रमुत्तमम् ।
पठति स्थिरधीः श्रृणोति यः
परमाप्नोति पदं महेशितुः ।। ३३ ।।

।। इति श्रीशिवरहस्ये नवमांशे एकपञ्चाशोऽध्ययः ।।

।। द्विपञ्चाशोऽध्यायः ।।

स्कन्द उवाच -

श्रीमूलदेवनाम्नोऽस्य भक्तस्य प्रथितां कथाम् ।
शिवभक्तिकरीं दिव्यां वक्ष्यामि श्रद्धया श्रृणु ।।
अस्ति सर्वेश्वरैश्वर्यरक्षैकाध्यक्षतां गतः ।। १ ।।

कैलास इति विख्यातो महादेवस्य वासभूः ।
तस्मिन् सन्ति महात्मानः शिवसामीप्यवर्तिनः ।। २ ।।

भस्मरुद्राक्षसम्पन्नाः शिवलिङ्गार्चनोद्यताः ।। ३ ।।

तस्मिन् कैलासशैले शशिधरधवले लिङ्गसङ्घैकमौलौ
सानूद्यन्मणिगोपुरोत्तमलसत्कुम्भप्रभाभिस्तते ।
नानासालरसालताललिकुचश्रीवृक्षसङ्घावृते
श्रीखण्डद्रुमदेवदारुतगरामोदैकदिङ्मण्डले ।। ४ ।।

मन्दारसुन्दरवनप्रभवाभिराम-
सोमप्रभोत्तमसुमप्रबलोरुगन्धे(न्ध)-
बन्धद्विरेफपदचङ्क्रमणप्रकान्ते[1] ।। ५ ।।

सरस्तीरप्रान्तद्रुमगलितपुष्पव्रजरजो
मरन्दासारोत्थकरटिकटसुस्राविसलिले ।
समीरणरणद्द्रवप्रबलवेणुझङ्कारकृ-
त्सुपक्षिविस्तावृते परमकोकिलालापिते ।। ६ ।।

---

1. पादत्रयात्मकं पद्यमिदम् ।।

मातङ्कबृन्दचमरसृमराभिराम-
खङ्गोद्यतोरुसुविषाणविघट्टभूमौ ।
वेतण्डह्मितरवोद्यतपक्षकाण्ड-
प्रोद्यच्छिखण्डिनटने मुदिरभ्रमेण ।। ७ ।।

गणगणवरघोषपूर्यमाण-
स्वरनिःसारणवेणुपूर्णकोणे ।
हयवैरिगणारणं नगेन्द्रे
सुरसङ्घृष्टमहीतलोत्थरेणौ ।। ८ ।।

तस्मिन् गणवरश्रेष्ठो मूलदेव इति श्रुतः ।
स तु शर्वाज्ञया शम्भोः स्थानान्यन्वीक्षितुं क्रमात् ।। ९ ।।

उरगेन्द्रमहाहारं दृष्ट्वा स निरगाद्गिरे ।
स तु सन्तीर्य सर्वासु गङ्गादिषु नदीषु च ।। १० ।।

श्रीशैल श्रीकालहस्तिन्यग्रोधारण्यनामसु ।
स्थानेषु नत्वा देवेशं प्राप्तः काञ्चीपुरीं मुनिः ।। ११ ।।

एकाम्रनाथमानम्य तत्रोषित्वा चिरं मुनिः ।
नत्वाधिकापुरेशं च पुण्डरीकपुरं ययौ ।। १२ ।।

नत्वा नटेशं हृष्टाङ्गो दृष्ट्वास्यानन्दताण्डवम् ।
ततो निर्गत्य धामानि मान्यान्यन्यानि चानमत् ।। १३ ।।

नत्वा गोवट्टुतीर्थेशं सङ्गच्छन् सह्यजातटे ।
अपश्यद्गोकुलं दीनं परिभ्राम्यदितस्ततः ।। १४ ।।

गोकुलव्याकुलत्वस्य हेतुदर्शनलालसः ।
कवेरकन्यातीरे च चचार स मुनीश्वरः ।। १५ ।।

शास्त्रग्रामजगोपालं परासुं मूल संज्ञकम् ।
घ्रात्वा घ्रात्वा तदङ्गं च क्रोशद्भिर्गोकुलैर्वृतम् ।। १६ ।।

दयालुः स मुनिर्दृष्ट्वा गोकुलं च तदाकुलम् ।
उज्जीव्य गोपालमिमं विनेष्ये गोकुलव्यथाम् ।। १७ ।।

इति निश्चित्य सहसा न्यस्य क्वापि निजां तनुम् ।
प्राणैः स्वैर्गोपदेहान्तः प्राविशित् पवनाध्वना ।। १८ ।।

मूलदेवः समुत्तस्थौ तत्प्राणावेशनक्षणे ।
गावस्तमुत्थितं ह्रष्टा घ्रात्वा लिलिहुरेव ताः ।। १९ ।।

ततस्तन्मूलदेवस्तद्गोकुलं तृणशालिषु ।
स्थानेषु चारयन्स्फीतकुक्षि पीतोदकं व्यधात् ।। २० ।।

दिनान्ते गोकुले तस्मिन्प्रविष्टेस्वान् गृहान् स तु ।
मूलदेवो निजावासमपश्यंस्तिमितः स्थितः ।। २१ ।।

मूलदेवस्य गृहिणी मद्भर्त्रा किं विलम्बितम् ।
इति व्याकुलचित्तासा तत्रागाद्यत्र स स्थितः ।। २२ ।।

विलम्बिने ममैतस्य देहः संस्पर्शनोत्सुकाम् ।
मा स्प्राक्षीस्तेन सम्बन्धो न मेस्तीत्यभिधाय सः ।। २३ ।।

नवं मठं विवेशायं सा च शोकभयाकुला ।
वृत्तान्तं तादृशं भर्तुर्ग्रामीणेभ्यो न्यवेदयत् ।। २४ ।।

ग्रामीणास्ते च बहुधा भेदतोऽपि स्थिराशयम् ।
विषयेभ्यो विरक्तं तं स्पष्टं दृष्ट्वा वचोऽब्रुवन् ।। २५ ।।

उन्मादभूतावेशादिरेतस्मिन्नास्ति विक्रिया ।
भावना भूयसी प्रायः शिवयोगस्य निर्मला ।। २६ ।।

इत्युक्त्वा ते ग्रामजना मूलदेवस्य गेहिनीम् ।
शोकाक्रान्तां समाश्वास्य बान्धवेषु न्यवेशयन् ।। २७ ।।

मूलदेवोऽपि स प्रातस्तदनुव्रज्य गोकुलम् ।
न्यस्तं देहं निजं तत्र न पश्यंश्च व्यचिन्तयत् ।। २८ ।।

भाषया मे प्रथयितुं प्रोक्तं मूलागमं स्वकम् ।
तिरश्चकार मत्कायं प्रायेण परमेश्वरः ।। २९ ।।

एवं विचिन्त्य स्वान् बन्धूननुनीय स्वकं पदम् ।
यापयित्वा च बुद्धेशं सोऽगाद्गोवटतीर्थकम् ।। ३० ।।

परं तत्वं शिवं नत्वा मूलदेवः शिवालये ।
पश्चाद्भागेऽश्वत्थमूलमध्यास्त स्वस्थमानसः ।। ३१ ।।

शिवयोगासनारूढः शिववेदान्तसंहितः ।
हृदयाम्बुरुहस्थं तं महान्तं मनसा स्मरन् ।। ३२ ।।

मांसदेहाभिसम्बद्धं विषं विद्राव्य दारुणम् ।
संसारसागरान्तस्थ जनोत्तारण कारणम् ।। ३३ ।।

अपश्यन्नर्थमुद्रेयं संज्ञानादिचतुष्टयम् ।
प्रतिवत्सरमेकैकवृत्तेनानुभवात्मना ।। ३४ ।।

श्रीमन्त्रमालिकां कृत्वा वरदां भवं देवताम् ।
वराहदंष्ट्रालङ्कारमेकं एवेत्यनुक्रमात् ।। ३५ ।।

त्रिसहस्त्रं च वृत्तानां (वर्षाणां) अनैषीद्भुवितत्त्ववित् ।। ३६

स मूलदेवो वपुषामुनैव
देवाधिदेवस्य दयाविशेषैः ।
विराजमानो रजतार्द्रिराजे
पदं प्रपेदे तदविप्रयोगम् ।। ३७ ।।

जगत्पवित्रं जगदेक चित्रं
ये मूलदेवस्य चरित्रमेतत् ।
पठन्ति श्रृण्वन्ति च भक्ति युक्ता
प्रयान्ति शैवं परमं पदं ते ।। ३८ ।।

।। इति श्रीशिवरहस्ये नवमांशे द्विपञ्चाशोऽध्ययः ।।

।। त्रिपञ्चाशोऽध्यायः ।।

स्कन्द उवाच -

उद्दण्डदण्डभक्तस्य चरित्रं कथयामि ते ।
दण्डभक्त इति ख्यातः कोऽप्यासीत्कमलालये ।। १ ।।

सोऽन्धोऽपि शिवभक्तानां[1] दास्यान्मम दृशोः फलम् ।
कमलालय देवेशं नत्वा स्तुत्वा च नित्यशः ।। २ ।।

शिवभक्तिं स्थिरां चक्रे मनुं पञ्चाक्षरं जपन् ।
कर्मणा मनसा वाचा शिवधर्मपरायणः ।। ३ ।।

शिवभक्तार्चको नित्यं भस्मरुद्राक्षभूषणः ।
अन्यहस्तावलम्बोऽथ चक्रे शाम्भोः प्रदक्षिणाम् ।। ४ ।।

प्रणामानथ चाकार्षीदमर्षादिविवर्जितः ।
स कदाचिद्दण्डभक्तो ज्ञानदृक् शिवमानतः ।। ५ ।।

देवस्य पश्चिमे भागे धाम्नः प्रापजलाशयम् ।
स विशालावकाशं तत् कर्तुं च खननोद्यतः ।। ६ ।।

खननाख्यानसेवित्वं वेणुपात्रे स मृत्खनैः ।
निबद्धरज्जुमालाभिर्दण्डैः कृत्वा गतागतम् ।
मृदं खनित्वा तद्भारैर्वहन् सेतुमचीकरत् ।। ७ ।।

श्रान्तः खट्वाङ्गमीशानं ध्यात्वा पञ्चाक्षरं जपन् ।
भक्त्या प्रतिदिनं दण्डी विशालमखनत्सरः ।। ८ ।।

विरमोत्सेध[2]जननात्खननात्प्राणिहिंसनात् ।
इतीरितः स तानाह हे जना मूढबुद्धयः ।। ९ ।।

---

1. प्राप्नुयामिति निश्चित्येति वाक्यशेषः ।। 2. उत्सेध - killing.

शिवधर्मैकधर्माणां सारं न ज्ञायते जनैः ।
इतीरितास्ते तं प्राहुर्नश्रृणोष्यस्मदीरितम् ।। १० ।।

दृष्टी न केवलं नष्टे किं वा ते श्रवणे अपि ।
इतीरितः स तानाह पश्यन्तोऽप्यदृशो हि ते ।। ११ ।।

ये ज्ञानबधिरास्ते हि न श्रृण्वन्ति हितं वचः ।
न किञ्चिद्भुवि संवीक्षं त्र्यक्षपादाम्बुजं विना ।। १२ ।।

सर्वतश्चक्षुषी वीक्षे वीक्षया किं फलं मम ।
इत्युक्तास्ते जनाः प्राहुः किमन्धेनेति ते तदा ।। १३ ।।

त्वमस्तद्वीक्षया पश्य इति तत्करतो जनाः ।
खनित्रमुत्क्षिपन्तश्च रज्जुं चिच्छिदुरायताम् ।। १४ ।।

दण्डी सुदुःखितः शम्भुं रक्षेत्युच्चैर्जगाद सः ।
अविश्रान्तं मृत्खननात् विश्रान्तः श्रान्तिमागतः ।। १५ ।।

निशि सुष्वाप भूमौ स स्मरन् स्मरहरं तदा ।
देवो दयानिधिः स्वप्ने प्राह तं भक्तवत्सलः ।। १६ ।।

ईश्वरः उवाच -

दुःखं त्यज सुखालोक विलोके ते भविष्यतः ।
जनाश्चान्धा भविष्यन्ति त्वदधिक्षेपकारिणः ।। १७ ।।

तथा प्रातः स चोद्बुद्धो नेत्राभ्यां लोकयन्दिशः ।
प्रत्याययौ सरस्तीरं तं दृष्ट्वा विस्मिता जनाः ।। १८ ।।

जना ऊचुः -

अहो बतेदमाश्चर्यमन्धो वीक्षासमन्वितः ।
जनाश्च तदधिक्षेपकारिणो वीक्षयोज्झिताः ।। १९ ।।

राजा च रेजे तच्छ्रुत्वा विरजस्कस्य चेतसि ।
दण्डभक्तेन तत्कर्म सहसा रुरुधुर्हताः ।। २० ।।

राज्ञे विज्ञापयामास स्वस्याज्ञां प्राणदायिनीम् ।

ईश्वर उवाच -

दुःखितोऽयं दण्डिभक्तस्तद्‌दुःखं खण्डयाधुना ।। २१ ।।

आखण्डलाधिकां भुङ्क्ष्व श्रियमुर्वीपतेऽधुना ।
इति स्वप्ने शिवेनोक्तो राजा विस्मयमागतः ।। २२ ।।

प्रबुद्धः पार्थिवः प्राह सरः प्राप्याथ दण्डिनम् ।

राजा उवाच -

किं वा ते चरितं दण्डिन् मण्डनं त्वं भुवो ह्यसि ।। २३ ।।

विस्मापकं चरित्रं ते नेत्रदानं शिवेन हि ।
इत्युक्तोऽसौ नृपेणाह स्वप्नवृत्तं तदद्‌भुतम् ।। २४ ।।

दण्डी उवाच -

राजन् जैनशिला रुद्ध्वा तटाकखननं मम ।
करात्खनित्रमाच्छिद्य छित्वा मृद्वाहरज्जुकाम् ।। २५ ।।

ममान्धस्य न धीरस्तीत्याक्षिपन् परुषाक्षरम् ।
शिवाज्ञालब्धदृक्स्याच्चेत्किं कुर्याद्वेति चाब्रुवन् ।। २६ ।।

तेचाब्रुवंस्त्वमीशानकृपालब्धेक्षणोऽसि चेत् ।
स्थानादस्माभिरेतस्मात्प्रस्थानं क्रियतेऽधुना ।। २७ ।।

उक्तं मया यथावृत्तं मम स्यादीप्सितं नृप ।
राजन् कुरु तथेत्युक्तो नृपेणातिष्ठदन्तिके ।। २८ ।।

अथाहूयार्हतान् राजा युष्माभिर्यत्पुरोदितम् ।
क्रियते तत्किमित्येतत्तथेति प्राहुरुत्तरम् ।। २९ ।।

त्रिणेत्रकृपया मेऽत्रसिन्धुरत्र प्रकाशते ।
तथेति ते दण्डिभक्तं नृपं प्राहुर्यतोऽर्हताः ।। ३० ।।

हतेक्षणा दण्डिभक्तपदे ते न्यपतन् तदा ।
प्राहुस्तदार्हताः सर्वे नृपं तं दण्डिभक्तकम् ।। ३१ ।।

जैना ऊचुः -

पाहि नोऽक्षिविहीनांश्च हीनाङ्गान्विकलांस्तथा ।
जैनाः सरित्पतेस्तीरे निरस्ता यद् वयं नृपः ।। ३२ ।।

अन्धास्ते चार्हताः सर्वे हताः स्वेनैव पाप्मना ।
वेत्रप्राहरखिन्नाश्च दुद्रुवुः कमलालयात् ।। ३३ ।।

अन्धत्वादृष्टमार्गास्ते केचिद्गर्तेष्वथापतन् ।
स्खलन्तो गुल्मरुद्धाश्च भ्राम्यन्तश्च पदे पदे ।। ३४ ।।

स्थाणुपाषाणनिर्भिन्नमूर्धानो न्यपतन् क्षितौ ।
अदृष्टदुष्टास्ते सर्वे तस्मात्स्थानात् विनिर्ययुः ।। ३५ ।।

आमूलादुद्धृतैः सर्वैर्जिनालयशिलाभरैः ।
कारयामास नृपतिस्तटाकतटबन्धनम् ।। ३६ ।।

ललाटनेत्रकरुणालब्धनेत्रस्य दण्डिनः ।
पादौ प्रहर्षयुक्तोऽथ प्रणनाम स भूपतिः ।। ३७ ।।

मूर्खकाख्यस्य भक्तस्य चरित्रं कथये शुभम् ।
तुण्डीरमण्डले ख्याते महीमण्डलमण्डने ।। ३८ ।।

शक्त्यारण्य पुरं नाम *धामास्तोकमुमापतेः ।
तस्मिन् क्षीरसरित्तीरे सन्ति भक्ता मेहशितुः ।। ३९ ।।

भस्मरुद्राक्षसम्पन्नाश्चतुर्वर्णेषु सङ्घशः ।
तेषां कुलोद्भवः कश्चिद्भक्तार्चक इति श्रुतः ।। ४० ।।

स भस्मफालो नियतं भवभक्तार्चने रतः ।
अन्नैः षड्रससम्पन्नैः,व्यञ्जनैश्चित्ररञ्जनैः ।। ४१ ।।

भक्तानतोषयन्नित्यं विशेषेणाम्बिकापतेः ।
यद्यत्तेषां वस्तु हृद्यं तत्सर्वमददात्सदा ।। ४२ ।।

कालां स निन्ये नियतमेवं भक्तजनार्चनैः ।
क्षेत्रारामगृहादीनि क्रमाद्विक्रीय तैर्धनैः ।। ४३ ।।

स बालभावादज्ञानाद्द्यूतेन धनमार्जयत् ।
तदा निर्गत्य दैर्गत्यात्कुम्भधोणमुपागमत् ।। ४४ ।।

तस्मिंस्थाने स्थितो नित्यं धूतचैत्यमुपेत्त्य सः ।
ये द्यूतवेदिनो जित्वा तद्धनैः पणबन्धनैः ।। ४५ ।।

क्रीत्वान्नादि स्वयं शम्भोर्भक्तैर्भुञ्जन् स्वयं स्थितः ।
तोषयञ्जातसन्तोषो निनाय दिवसान्बहून् ।। ४५ ।।

द्यूतवादविदित्येष ख्यातो मूर्खक इत्यपि ।
ततो द्यूतविदः सर्वे वञ्चयित्वाशु तं तदा ।। ४७ ।।

तस्मिन्दिने जितं यच्च वसु तच्चाहरन् बलात् ।
ग्रामशालालयं नीत्वा तं बद्ध्वा चिक्षिपुर्गृहे ।। ४८ ।।

---

* धाम+आस्त+ओकं

स रात्रौ भक्तपूजादिनिरासासहनस्तदा ।
निद्रावशं न चैषीत्स तद्गृहे शङ्करः स्थितः ।। ४९ ।।

भिक्षां देहीति चोवाच तं भक्तं क्षुधितो भृशम् ।
तं तदा स्वागतेनाह न भिक्षास्ति ममान्तिके ।। ५० ।।

किञ्चित्त्वदीयं रुधिरं पातुमिच्छामि दीयताम् ।
इत्युक्तः क्षुरिकाहस्तः कण्ठमुत्कर्तयंस्थितः ।। ५१ ।।

तदा तद्धस्तमालम्ब्य संस्थितो वृषवाहनः ।
धन्योऽसीति बभाणेशः सारूप्यमददात्प्रभुः ।। ५२ ।।

तीर्थान्यटित्वा चिरमीश्वराप्त-
नेत्राम्बुजोऽभूत्स तदा हि दण्डी ।
भुक्त्वा च भोगान् भुवि पूर्णकामान्
पदं प्रपेदे परमेश्वरस्य ।। ५३ ।।

कमलालयधाम्नि दण्डिनाम्नः
शिवभक्तस्य हराप्तचक्षुषोऽस्य ।
मनसा वचसैव कर्मणा वा
चरितं वा पठते स धन्य एव ।। ५४ ।।

स मूर्खभक्तोऽप्यथद्यूतवृत्तिः
श्रीकुम्भघोणे कलिताघकोणे ।
भिक्षाटनध्वस्तसमस्तपापः
पदं प्रपेदे स सुरैर्दुरापम् ।।

।। इति श्रीशिवरहस्ये नवमांशे त्रिपञ्चाशोऽध्ययः ।।

।। चतुःपञ्चाशोऽध्यायः ।।

स्कन्द उवाच -

नत्वा श्रीमुर्खकद्यूतजाता(लब्धा)र्थार्चितशङ्करम् ।
श्रीसोमयाजिमारस्य कथयामि कथां शुभाम् ।। १ ।।

आरामै रामकभ्रान्तैर्ग्रामे वृक्षैः समावृते । (?)
कश्चिदासीत्सोमयाजीमाराख्यो यज्वनः कुले ।। २ ।।

श्रीभृत्यांस्तोषयन्नित्यमन्नैः सम्पन्नषड्रसैः ।
द्रव्यत्यागयुतैर्यातैररसैः शिवमतोषयत् ।। ३ ।।

स श्रौतकर्मभिः शम्भुं सप्तलोकाभिनन्दितैः ।
तोषयन्निव भक्तोऽयं श्रेयानित्यभ्यनन्द्यत ।। ४ ।।

यैः कैश्चिदपि वा वृत्तैर्युक्तास्ते तु शिवार्चकाः ।
तथैवास्मत्कुलाधीशा इति तानभ्यनन्दत ।। ५ ।।

सत्स्वप्यनेकमन्त्रेषु मनः शुद्धिप्रदायिषु ।
जपन्पञ्चाक्षरं मन्त्रमेकः स गतिमानभूत् ।। ६ ।।

वल्मीकनाथनिलयं कमलालयमागतः ।
स सुन्दरेशन्यस्तात्मा सोमयाजी मुदं ययौ ।। ७ ।।

इन्दुमौलेः पदद्वन्द्वं जगद्वन्द्यं प्रणम्य सः ।
प्रत्युहं प्रीणयन्भक्तानुवास कमलालये ।। ८ ।।

शिवभक्तार्चनासिद्धमनः शुद्धेर्महात्मनः ।
श्रीसोमयाजीमारस्य प्रणम्य पदयोर्युगम् ।। ९ ।।

श्रीमतः शक्यनाथस्य चरित्रं प्रवदामि वः ।
पुरे श्रीसङ्गमङ्गाख्ये कश्चित्पादजवंशजः ।। १० ।।

दयालुः सर्वभूतेषु विकलार्थ विशेषवित् ।
स विशेषविधिर्नाम्ना बहुदेशान् परिभ्रमन् ।। ११ ।।

प्राप्य काञ्चीपुरं शाक्यधर्मं ज्ञातुमगाहत ।
स शक्यतन्त्रमालोड्य समयानितरानपि ।। १२ ।।

नैतानि तत्वनीत्येष शैवतत्वमगाहत ।
कर्म कर्ता फलं दातेत्येषा नीतिश्चतुर्विधा ।। १३ ।।

नान्यत्र शैवे सिद्धान्ते ह्युपास्योऽतः शिवो महान् ।
इति ज्ञात्वा स्थितः शैवे तत्वे शुद्धमनाश्च सः ।। १४ ।।

स्मरारिस्मृतिरेवेदं परं तत्वमिति स्मरन् ।
अमुञ्चत्तं निजं वेषं शिवाङ्घ्र्यर्पितधीरभूत् ।। १५ ।।

अदृश्यताग्रे यज्ज्योतीरूपं ब्रह्माम्बुजाक्षयोः ।
दैवतं मे तदेवेति शिवलिङ्गार्चकोऽभवत् ।। १६ ।।

वीक्ष्यैवानुदिनं लिङ्गं भोक्ष्येऽहमिति निश्चितः ।
दर्शनं शिवलिङ्गस्य कृत्वान्वमभुङ्क्त सः ।। १७ ।।

अग्रेऽनावृतमालोक्य शिवलिङ्गं स जातुचित् ।
शिलां तस्मिन् प्रचिक्षेप भक्तिर्हर्षप्रकर्षतः ।। १८ ।।

शिशोः प्रहारेण पिता यथा प्रीतिं प्रपद्यते ।
शिलाघातात्ततः तस्य शिवः प्रीतिमवाप सः ।। १९ ।।

अपरेद्युरपि प्राप्ते पाषाणक्षेपणे क्षणे ।
पाषाणक्षेपणे बुद्धिर्दत्ता मे शम्भुनेत्यसौ ।। २० ।।

इदमेव परं देवसमर्चनमिति स्मरन् ।
पाषाणक्षेपणं चक्रे शिवलिङ्गे मुदान्वहम् ।। २१ ।।

सर्वे वेषाः शिवस्येति शाक्यवेषं दधत्सदा ।
शिलाघातार्चनं शम्भोः स चक्रे प्रतिवासरम् ।। २२ ।।

स विस्मृत्य शिलाक्षेपं कदाचिद्भोक्तुमुद्ययौ ।
विस्मृतो हाशिलाक्षेप इति स्मृत्वा धृतोदनः ।। २३ ।।

स भक्तिप्रेरितो देवसमीपमगमद् द्रुतम् ।
आदाय कञ्चिदश्मानं भावयन्भक्तितः शिवम् ।। २४ ।।

साक्ष्याल्लक्ष्यं समीक्ष्यैनं चिक्षेपस्तिमितेक्षणः ।
आगतोऽयमभुक्त्वेति तद्भक्त्या प्रीतिमाप सः ।। २५ ।।

ददृशे दयया युक्तस्त्र्यम्बकोह्यम्बिकायुतः ।। २६ ।।

विलोक्य शाक्यो वृषवाहनं तं
प्रणम्य भक्त्या(क्ति) प्रवणो ननाम ।
देवो दयासिन्धुरथानपायं
निनाय जैनं निजमास्पदं तत् ।। २७ ।।

भरितं शिवभक्तिभावनै-
श्चरितं शक्यपतेः श्रृणोति यः ।
दुरितैरखिलैर्युतोऽप्यसौ
त्वरितं लोकमुपैति शाम्भवम् ।। २८ ।।

षड्डूर्मिजेता विजिताखिलेन्द्रियः
प्रसाद्य भक्तप्रवरान्स सम्पदा ।
वरेण्यसौम्येशकटाक्षवैभवात्
स सोमयाजी शिवलोकमभ्यगात् ।। २९ ।।

प्रख्यातमेतद्भुवि सोमयाजि-
मारस्य पुण्यं महनीयकीर्तेः ।
चरित्रमौदार्यगुणोपपन्नं
श्रृणोति यः शैवपदं स याति ।। ३० ।।

।। इति श्रीशिवरहस्ये नवमांशे चतुःपञ्चाशोऽध्ययः ।।

।। पञ्चपञ्चाशोऽध्यायः ।।

स्कन्द उवाच

अनन्त भक्तेः श्रीभक्तदभ्रस्य प्रोच्यते कथा ।
चोलभूमौ भूरिभूम्नि कावीरीतीरगोचरे ।। १ ।।

अरुणारण्यनामास्ति धाम चन्द्रशिखामणेः ।
तत्र केचिन्महाभक्ता अरुणारण्यधामनि ।। २ ।।

सन्ति शम्भुस्मृतिकृतः शिवदास्यैकसम्पदः ।
श्रीभस्मालङ्कृतीनां च प्राणरक्षणकारिणः ।। ३ ।।

तेषां कुले कश्चिदासित्परञ्ज्योतिरिति श्रुतः ।
आयुर्वेदायुधाद्यासु विद्यासु सकलास्वपि ।। ४ ।।

गजवाजिसमारोहेऽप्यतिकौशलमाप सः ।
परमेश्वरपादाब्जं परं तत्वमिति स्मरन् ।। ५ ।।

शिवभक्तिरसस्रोतोनिम्नभूमिरभूच्च सः ।
समर्थं सर्वकार्येषु मन्त्रतन्त्रादिषु स्वयम् ।। ६ ।।

महाप्रधानमेवैनं अकरोच्चोलभूपतिः ।
चतुरङ्गबलोपेतश्चतुरः समरेषु सः ।। ७ ।।

दिग्भागांश्चतुरो जित्वा चोलमूलमपालयत् ।
ततः स वातापिपुरीं सुरासुरदुरासदाम् ।। ८ ।।

निरुद्ध्य निजसैन्यैस्तदान्ध्राञ्जित्वा भटोद्भटैः ।
स गृहीत्वाऽथ जीवन्तं भूपतिं तत्पुरेश्वरम् ।। ९ ।।

तुरङ्गतुङ्गमातङ्ग शताङ्गादीन्यनेकशः ।
तस्य राज्ञः कोशगतं दासीदासधनादिकम् ।। १० ।।

स्वचोलभूमिपालाय समस्तानि समार्पयत् ।
अभ्यनन्दच्च राजैनं जयिनं धनदायिनम् ।। ११ ।।

अनेन हि कृतं कर्म दुष्करं विक्रमादिति ।
राजा स्वसैन्य बाहुल्यान्नाजयन्नन्वसौ रिपून् ।। १२ ।।

महेशभक्तिमाहात्म्यादिति ज्ञात्वा तमब्रुवन् ।
माहात्म्यं मन्त्रिणस्तस्य शिवभक्तिसमुद्भवम् ।। १३ ।।

श्रुत्वा चोलमहीपालो भक्तिभाजं तमब्रवीत् ।
अजानन् तव माहात्म्यं दारुणे रणकर्मणि ।। १४ ।।

न्ययोजयं हतास्तेन अपराधं क्षमस्व मे ।
इति प्रणम्य भूरालो दत्वा ग्रामान्धनानि च ।। १५ ।।

सुखेन भुक्त्वा स्वग्राममुवसासायमर्चयन् ।
देवदेवमुमाकान्तं कृतान्तभयवर्जितः ।। १६ ।।

स्वसम्पद्रक्षणार्थाय त्र्यक्षमीक्षन् स्वभक्तितः ।
आस्वेत्युदीर्य तं राजा ग्रामं प्रास्थापयन्निजम् ।। १७ ।।

प्रसाद्य पार्थिवं रम्यैर्वचोभिरनुगैः सह ।
स्ववासमरुणारण्यं सम्प्राप्य न्यवसत्सुखी ।। १८ ।।

छायेव तस्य भार्यासीन्मूर्तेवार्यार्चने रता ।
शिवभक्तान् भोजयित्वा पश्चाद्भुङ्क्ते ह्यतन्द्रिता ।। १९ ।।

स कृत्वा संविधां नित्यमविवादमनास्तदा ।
अन्नैर्व्यञ्जनसम्पन्नैः षड्रसाद्यैश्चतुर्विधैः ।। २० ।।

मधुरैः प्रश्रितैर्वाक्यैः शिवभक्तानपूजयत् ।
अदभ्रविनयोदग्रोऽदभ्रनाथार्चने रतः ।। २१ ।।

इत्यसौ तेन नामासीद्दभ्रभक्त इति श्रुतः ।
ततो महात्मनः पत्न्यां शिवभक्त्यम्बुधेरिव ।। २२ ।।

श्रीलाल इति नाम्नासीत्तनयो विनयान्वितः ।
जातस्यास्य कुमारस्य जातकर्मादिकं कृतम् ।। २३ ।।

निरवद्यैरवयवैः कान्त्या क्रान्तदिगन्तरैः ।
आनन्देन समं पित्रोर्ववृधे स कुमारकः ।। २४ ।।

आपादमौलिपर्यन्तं सुस्वर्णाकल्पभूषितः ।
चचार चरणं न्यस्य स्वस्तिकाब्जपदक्रमैः ।। २५ ।।

बालं काले वृत्तचौलं सवयोभिर्द्विजार्भकैः ।
वेद्यामक्षरशिक्षायै तत्कृतायां न्यधात्पिता ।। २६ ।।

स जन्मान्तरसंस्कारात् यस्य कस्योपदेशतः ।
जग्राह वाङ्मयं सर्वं संस्मरन्निव विस्मृतम् ।। २७ ।।

शस्त्रशास्त्रेषु निष्णातो विशिष्टः सोमवत्क्षितौ ।
तं दृष्ट्वा हर्षतर्षेण जहृषे केवलं पिता ।। २८ ।।

तदा तद्भक्तिजिज्ञासुरीश्वरस्तद्गृहं गतः ।
बभार भैरवं वेषं भीरूणां भयवर्धनम् ।। २९ ।।

तदा तस्य जटाजूटे बभ्रुभिश्चालकोच्चयैः ।
रेजुस्तन्न्यस्तपुष्पाणि तिमिरे तारका इव ।। ३० ।।

तृतीयं नयनं तस्य फालपुण्ड्रान्तरे स्थितम् ।
सन्ध्यारुणे तदङ्गे तद्व्योम्नीव तिमिरं घनम् ।। ३१ ।।

कालकण्ठं व्यालमालं दीप्तशूलवरायुधम् ।
सन्ध्यारक्तारुणे नेत्रे विवृतापाङ्गके तदा ।। ३२ ।।

विवृत्तदंष्ट्राघोणं च ज्वलज्ज्वालायुताननम् ।
सितभस्माङ्गरागं च सर्वाङ्गसितपुण्ड्रकम् ।। ३३ ।।

चतुर्भुजं भुजङ्गोरु कङ्कणं किङ्किणीकटिम् ।
वराटिकालसन्मालामेदुरोत्तुङ्गवक्षसम् ।। ३४ ।।

पादुकाविलसत्पादं मत्तमातङ्गगामिनम् ।
त्रियामारमणोत्तुङ्गशेखरावलिताङ्गकम् ।। ३५ ।।

अस्थिहारलसत्कण्ठं भ्राजत्स्फटिककुण्डलम् ।
कञ्चुलीकञ्चुकं बिभ्रत्कपालकलिताशयम् ।। ३६ ।।

दक्षशिक्षितहस्तस्थडमरूद्दामघोषवान् ।
मञ्जुशिञ्जितमञ्जीर परिशोभिपदाम्बुजः ।। ३७ ।।

दिव्योपनिषदस्तस्य पादनूपुरतां ययुः ।
तद्ध्वनिः पादलग्नानां तासां स्तुतिरिवाबभौ ।। ३८ ।।

एवं तद्दभ्रभक्तस्य द्वारमागत्य भैरवः ।
कुर्वन् स भैरवं नादं दभ्रभक्तः क्व तिष्ठति ।। ३९ ।।

इत्यपृच्छत्तदा घोररावनादिततदिङ्मुखः ।

भैरव उवाच -

अविमुक्तादहं प्राप्तो दभ्रभक्तस्य वै गृहम् ।। ४० ।।

इति शुश्राव तद्वाक्यं तदा तद्गृहिणी हि सा ।
समाहिता द्वारदेशं अगात् प्राञ्जलिरब्रवीत् ।। ४१ ।।

सती उवाच-

धन्यां त्वदागमनतो मान्यां मन्ये जगत्रये ।
भक्तान् विशिष्टानन्वेष्टुम् गतवान् गृहवानिति ।। ४२ ।।

अदृष्टपूर्वं त्वां दृष्ट्वा प्रहृष्टश्च भविष्यति ।
अदभ्रहर्षवर्षेण मद्भर्ता दभ्रभक्तकः ।। ४३ ।।

इत्युक्तस्तां हरः प्राह गिरा संहर्षयन्निव ।

भैरवः उवाच -

प्रवेष्टुं न भवेद्युक्तं गृहिणा रहितं गृहम् ।। ४४ ।।

इत्युक्त्वा स तदा धात्रीवृक्षमूलमुपागतः ।
दभ्रभक्तोऽपि भवनं प्राप्य प्राह च गेहिनीम् ।। ४५ ।।

श्रमेण महतान्विष्टा भोक्तुं भक्ता महेशितुः ।
किं करोमि न भोक्ष्येऽहं दुरदृष्टं ममेदृशम् ।। ४६ ।।

भर्तारं व्यथया दीनमेवं प्राहाथ गेहिनी ।

गृहिणी उवाच -

अदृष्टपूर्वो भक्तोऽत्र धात्रीमूलमुपागतः ।। ४७ ।।

अद्यायाति गृही चेति याचितोऽभ्यर्णमागतः ।
इतीरितो दभ्रक्तः कृतार्थोऽस्मीति हर्षितः ।। ४८

भक्तः उवाच -

त्वयाहं गृहवानस्मि स कुत्रास्ते वदस्व मे ।
सा तदा प्राह भर्तारं हृष्टं हृष्टतरा सती ।। ४९ ।।

गृहिणी उवाच -

अध्यास्ते धात्रिकामूलं शिवभक्तो महामुनिः ।
इत्युक्तस्त्वरया युक्तः प्राप्य तं प्रणतःस्थितः ।। ५० ।।

भक्त्या नम्रतयाऽऽलोक्य सस्मितेन मुखेन सः ।
हर्षनिर्भरया वाचा तमुवाचाभ्रभक्तकम् ।। ५१ ।।

भैरवः उवाच -

महांस्त्वं दभ्रभक्तस्त्वं विश्रुतो मे श्रुतौ पुरा ।
दर्शिताऽकृत्रिमा भक्तिः वचोभिश्चातिहर्षितः ।। ५२ ।।

गमिष्यामि यथाजोषं प्रीत्या परमया युतः ।
इत्युक्तवन्तं तं प्राप्य प्रणम्य पदमीशितुः ।। ५३ ।।

देव देवदयाश्लिष्टो दभ्रभक्तोऽभ्यभाषत ।

दभ्रभक्तः उवाच -

न कश्चिद त्रदृष्टोऽद्य भक्तो भोक्तुं ममालये ।। ५४ ।।

मद्भागधेयाद्भगवन् आगतो भोक्तुमर्हसि ।
तेन धन्योऽस्मिलोकेषु मान्योस्मि नितरां विभो ।। ५५ ।।

भैरवः आह -

अस्मद्यथेप्सिताहारस्त्वया दातुं न शक्यते ।
त्वदालोकनतो हृष्टः गच्छ भक्त यथासुखम् ।। ५६ ।।

इत्युक्तोऽथ प्रणम्यासौ प्राह प्रीतेन चेतसा ।

फक्तः उवाच -

आहारस्य क्रमं ब्रूहि सोऽहं ते कर्तुमुत्सहे ।। ५७ ।।

भवानीपति भक्तेषु सम्प्राप्तेषु महात्मसु ।
अप्राप्यं च भवेत्प्राप्यं न किमप्यत्र दुष्करम् ।। ५८ ।।

इति तां गिरमाकर्ण्य भक्तं प्रत्याह भैरवः ।

भैरव उवाच -

ओदनं भुज्यतेऽस्माभिर्नरमांसोदनं सदा ।। ५९ ।।

अतस्त्वया न शक्येत नरमांसोपपादनम् ।
इति तद्भैरववचो भीषणं शुश्रुवे तदा ।। ६० ।।

सम्पादयिष्यन्ति विभो तवाहारं यथेप्सितम् ।
तेनेरितोऽथ वै प्राह भोज्यो नरपशुर्यदि ।। ६१ ।।

स पञ्चवर्षदेशीयः सर्वेष्वङ्गेष्वनिन्दितः ।
त्वत्पुत्रो लक्षणोपेतो यदि भोज्यो भवेन्मम ।। ६२ ।।

बालस्ते पञ्चवर्षीय एकपुत्रः सुलक्षणः ।
भोजने यदि मे लब्धः तदा भोक्तास्मि ते गृहे ।। ६३

मातापितृभ्यां हर्षेण दास्यते नितरां सुतः ।
इत्थं तेनेरितो भक्तः पुलकाङ्कुरभूषणः ।। ६४

तथा करिष्य इत्युक्त्वा निर्जगामाथ गेहिनीम् ।
दभ्रभक्तः स तां प्राह भद्रे देहि महाधनम् ।। ६५

तं तादृशं नरपशुं क्रेतुं यामि पुरीमिति ।
विचिन्त्य सा विहस्येह स्वारामे व्यञ्जने स्थिते ।। ६६ ।।

किमापणेषु गच्छन्ति कथं नामोपपद्यते ।
विक्रीयापि सुतं किं वा पिरतरौ खण्डयिष्यतः ।। ६७ ।।

अथवा धनलोभेन सुतं चेत्खण्डयिष्यतः ।
कथं प्रमुदितात्मानौ स्यातां तत्पितरौ भुवि ।। ६८ ।।

इदं चाघटनं मन्ये यत्कुलाङ्कुरविक्रयः ।
तस्माच्छ्रीलालनामानं प्रियपुत्रं समानय ।। ६९ ।।

तमेवावां विशस्यथ हर्षाद्भैरव पारणाम् ।
साफल्यं पुत्रवत्तायाः सहसा प्राप्यतामिति ।। ७० ।।

आदायाक्षरशालातो बालं बालशशिप्रभम् ।
नीलालकं भूषणाढ्यं स ददौ हरिणी दृशे ।। ७१ ।।

अनङ्गमिव लब्धाङ्गं जयन्तमिव भूगतम् ।
सा च हर्षस्रुतकुचा तमादाय महानसे ।। ७२

तैलेनाभ्यज्य गन्धाद्यैः स्नापयित्वाऽम्बुभिः सुतम् ।
भोजयित्वा तूलिकायां स्वापयामास तं शनैः ।। ७३ ।।

तं निद्रितं विलोक्याथ दभ्रभक्तेन सा तदा ।
उद्धृतं क्रकचं दध्रे भर्त्रासा हर्षितान्तरा ।। ७४ ।।

अङ्के निक्षिप्य जननी पाणिपादे व्यदारयत् ।
चखण्ड कण्ठमेतस्य चकर्त चरणौ तदा ।। ७५ ।।

अभेत्सीत्करमच्छेत्सीत्सर्वाण्यङ्गान्यनुक्रमात् ।
विशस्याङ्गानि तन्मुण्डं निरस्य बहिरादृतः ।। ७६ ।।

गृहीत्वा शोणितं पात्रे पक्तुं पत्नीकरे ददौ ।
अपाक्षीत्सापि जीरैलामरीच्यादि सुसंस्कृतम् ।। ७७ ।।

तस्याङ्गमाज्यधाराभिर्निष्यन्दिकमथातनोत् ।
अत्याक्षीच्चतुरा तस्य [1]शिलालस्य शिरो बहिः ।। ७८ ।।

गृहिणी प्राह भर्तारं शीघ्रमाहूयतां [2]हविः ।
भैरवाभिमतं पक्तं(क्वं) मांसं तव सुतस्य हि ।। ७९ ।।

---

1. शिलाल, शिराल - Sinwy (சதைப்பற்றுள்ள)
2. हविः - Masculine gender - fire, The word is mentioning the guest.(Bhairava). The word is ironically used for guest.

तच्छ्रुत्वा दभ्रभक्तोऽपि प्रणम्याहूय भैरवम् ।

दभ्रः उवाच -

सम्पन्नमन्नं स्वमतं स्थितोऽसि क्षुधितश्चिरम्[1] ।। ८०

वेला सेयमतिक्रान्ता भुङ्क्ष्व शीघ्रं दयानिधे ।
त्वं सम्प्राप्तोऽसि मद्भाग्यात्स्वामिनाऽऽगम्यतामिति ।। ८१

प्रक्षाल्य पाणी पदपङ्कजे तदा
स भैरवस्याथ स दभ्रभक्तः ।
प्रणम्य भक्तिप्रवणः स्वगेहे
प्रवेशयामास च भैरवं तम् ।। ८२ ।।

।। इति श्रीशिवरहस्ये नवमांशे पञ्चपञ्चाशोऽध्ययः ।।

---

1. सम्पन्नमन्नं स्वमतं स्थितोऽसि क्षुधितोभृशम् ।

।। षट्पञ्चाशोऽध्यायः ।।

गृहं गोमयलेपादिस्त्रग्विधा(ता)नादिशोभितम् ।
रङ्गवल्लीविता(था) नाद्यैः पूर्णकुम्भाम्रपल्लवैः ।। १ ।।

कदलीस्तम्भसम्बद्धगृहस्तम्भैरलङ्कृतम् ।
प्रविष्टे भैरवे हृष्टा गृहिणी सा तमानमत् ।। २ ।।

निधाय खट्वामास्तीर्णां विस्तीर्णां सोत्तरच्छदाम् ।
पुष्पासनं पूर्णमना देवेशाय दिदेश सा ।। ३ ।।

तस्मिन्नासन आसीने तत्पादक्षालनाय सा ।
दधौ [1]करकमीशस्य पादौ प्रक्षालयत् पतिः ।। ४ ।।

तत्पादक्षालनजलप्रोक्षितस्वशिरास्तदा ।
सुगन्ध(न्धि)धूपदीपाद्यैः स्त्रग्भिरानर्च भैरवम् ।। ५ ।।

प्रक्षाल्य काञ्चनं पात्रं विनीता विमलैर्जलैः ।
सा न्यस्य काञ्चने पात्रे तत्र शाल्योदनं न्यधात् ।। ६ ।।

तानि तानि व्यञ्जनानि तत्प्रान्तेषु निथाय(न्यधाच्च) सा ।
नतां स्मितमुखीं वीक्ष्य व्याजहार स भैरवः ।। ७ ।।

भैरव उवाच -

मदुक्तं पशुमालभ्य तैस्तैरङ्गैः समाहिता ।
कृतवत्यसि किं सम्यगुपदंशं शुभं मम ।। ८ ।।

अङ्गेषूत्तममित्युक्तमुत्तमाङ्गमिति स्मृतम् ।
तदानयेति तेनोक्ता गहीणी व्याकुलाऽभवत् ।

---

1. करक - water pot

गृहिणी -

निषिद्धं तच्छिरोमांसं तत्त्यक्तं बहिरङ्गणे ।। ९ ।।

सर्वं सम्पन्नमेवेह मांसं बालस्य मेऽधुना ।

भैरवः उवाच -

निशिद्धमपि मत्प्रीत्यै शिरोमांसं भविष्यति ।। १० ।।

अन्यथा तव गेहेऽहं न करिष्येऽत्र पारणाम् ।
अथ तस्य शिरो गृह्य मुसलोल्लूखलेन वै ।। ११ ।।

खण्डयित्वाऽथ मस्तिष्कं पक्त्वा पात्रे ददौ विभोः ।
आनन्दादर्पयामास मांसं भैरवभोजने ।। १२ ।।

भुङ्क्ष्वेत्यभिहितो देवो दभ्रभक्तमुवाच सः ।
गृहिणा रहितं भोज्यं मन्येऽस्माकं विगर्हितम् ।। १३ ।।

त्यक्त्वाऽतिथिं गृही भुक्त्वा नरकं याति सान्वयः ।
एको न भोक्ष्ये त्वां त्यक्त्वा तस्मात्पङ्क्तावुपाविश ।। १४

भैरवे वादिनि तथा दभ्रभक्तो भ्रमाकुलः ।
पात्रेऽन्ये तेन स तदा पुत्रमांसपरिष्कृते ।। १५ ।।

स्थितं दृष्ट्वा पुनः प्राह भैरवो भीषणा कृतिः ।

भैरव उवाच -

निन्द्यं च कथ्यते लोके अपुत्रान्नमसंस्कृतम् ।। १६ ।।

तस्मादन्नं न भोक्ष्येऽहं पुत्रहीनस्य ते गृहे ।
इति तद्गिरमाकर्ण्य भीतिसाध्वसलोचनः ।। १७ ।।

कथमाहार विघ्नोऽस्य सञ्जातो दैवकारितः ।
इतस्ततोऽभिवीक्ष्यैव सङ्क्लिष्टो भिक्षुभाषितैः ।। १८ ।।

तदा तौ दम्पती भिक्षोराज्ञया दुर्विलङ्घया (ध्यया) ।
दीर्घमुष्णं च निःश्वस्य तौ विलोक्य परस्परम् ।। १९ ।।

ऊचतुस्तावसम्भ्रान्तौ दम्पती हर्षितान्तरौ ।
पारणा भैरवस्यास्तु निर्विघ्नेनेति तौ तदा ।। २० ।।

भैरव उवाच

न कदा चिदपुत्रस्य पुंसोऽभोजि गृहे मया ।
आहूयतां बहिर्गत्वा भोक्तुं सह मयार्भकः ।। २१ ।।

इत्युक्तो भैरवस्योक्तिं विलोक्य गृहिणीमुखम् ।
चिन्तयामास भगवान् चित्रार्पित इवा भवत् ।। २२ ।।

पुनः पुनः क्रुधा प्राह भैरवो भीषणाकृतिः ।
किं विलम्बेन भक्ताद्य क्षुधा कुक्षौ प्रवर्धते ।। २३ ।।

अत्रेदं चिन्त्यम् - यत् - प्रथमं भैरवः नरमांसभोदने ततश्च परञ्ज्योतिं भक्तस्य पञ्चवर्षीय - एकमात्र पुत्रमांसभोजने स्वस्य अधिकं उत्कण्ठां आविष्करोति । तदनुसारेण दभ्रभक्तः तत्पत्नी च आलोच्य स्वपुत्रं विद्यालयात् आनीय मङ्गलस्नानादिकं निर्वर्त्य विशस्य तन्मांसेन पक्वान्नं सम्पादितमिति निवेद्य भोजनाय भैरवं निमिन्त्रितवन्तौ । तदा "एकपुत्रस्य दभ्रभक्तस्य पुत्रो विशस्तः" इति ज्ञात्वैव भैरवः तन्मृत पुत्राह्वानाय प्रेरणां करोति इति । शेक्किळार् प्रणीतग्रन्थरीत्या तु प्रथमं भैरवः नरपशुमांसभोजन एव स्वेच्छां प्रकटयति । न तु भक्तपुत्रमांसभोजने । अतश्च उत्तरत्र सह भोजनाय पुत्रमाह्वयेत्युक्ते "स इदानीं अनुपयुक्त" इति भक्तवचनं इदानीमेव स पुत्र आहूयतामिति भैरवस्य तत्पुत्राह्वाननैर्भयं च सङ्गच्छते ।।

आहूयतां द्रुतं बालो नयनानन्द चन्द्रमाः ।
हन्त बालं विसृज्यैव भोक्तुं ते यतते मनः ।। २४ ।।

एषापि निर्धृणा पुत्रे तव भक्त कुटुम्बिनी ।
न चिन्तयति सा बालं भोजने सा रताऽभवत् ।। २५ ।।

युवयोरिव मे चेतो नैव वात्सल्यवर्जितम् ।
शीघ्रमाहूयतां गत्वा सह भोक्तुं स्तनन्धयः ।। २६ ।।

इति सूक्तिमतीं वाचो युक्तिमाकर्ण्य भैरवीम् ।
दभ्रभक्तः समं वध्वा निर्गत्य बहिरङ्गणे ।। २७ ।।

आह्वयेतां बहिर्गत्वा साश्रुधाराविलोचनौ ।
आगच्छागच्छ श्रीलाल भोक्तुमाह्वयतेऽतिथिः ।। २८ ।।

अथायान्तं ददृशतुर्बालमक्षरवेदितः ।
काकपक्षधरं तत्र विशालाक्षं च धूलितम् ।। २९ ।।

रत्नग्रैवेय कटक कुण्डलादिविभूषितम् ।
कटिमेखलिकाराजत्किङ्किणीपादनूपुरम् ।। ३० ।।

ताताम्बेति च भाषन्तं तावुभावप्यपश्यताम् ।
विस्मयोत्फुल्लनेत्राब्जैर्विलोक्यैनमुभावपि ।। ३१ ।।

आनन्दाब्धौ निमज्जन्तौ परामृश्य निजैः करैः ।
आदाय तनयं भिक्षोः पारणा संभवत्विति ।। ३२ ।।

पुत्रलब्ध्यापि तौ मोदं प्रापतुर्भिक्षुपारणे ।
भैरवाहारगेहं तं द्रुतमाजग्मतुर्मुदा ।। ३३ ।।

तौ तद्गृहं प्रविश्यान्तरपश्यन्तौ सबालकौ ।
भैरवं खेदसंवीतौ चिन्तयामासतुश्चिरम् ।। ३४ ।।

किमावाभ्यां पुराकारि शिवपूजाव्यतिक्रमः ।
किं शाम्भवद्रोहपरौ भस्मरुद्राक्षवर्जितौ ।। ३५ ।।

किं शिवालयविच्छेदं शिवारामोच्छितिं पुरा ।
अभञ्जि शिवभक्ताज्ञेत्येवमाकुलचेतसौ ।। ३६ ।।

इतस्ततौ विचिन्वन्तौ पश्यन्तौ तौ दिशो दश ।
आलोकमानावाकाशं वृषभं तावपश्यताम् ।। ३७ ।।

तदारूढौ गुहोपेतौ तौ विलोक्यादिदम्पती ।। ३८ ।।

सोमं सोमललामगाङ्गसुजटाचूडं मृडं शङ्करं
सोमार्कानललोचनं गरगलं वैयाघ्रचर्माम्बरम् ।
मन्दस्मेरमुखाम्बुजं च सुमहाबाहुं प्रभाभासुरं
शूलोद्यन्मृगटङ्ककं पदनतामर्त्यावृतं शङ्करम् ।। ३९

नत्वा स्तुत्वैवमीशानं सपुत्रौ तौ मुदान्वितौ ।
आनन्दभरितापारमानसौ तौ बभूवतुः ।। ४० ।।

शम्भो पाहि महेश सोमशकलालङ्कारमौले हर
स्मवामिन् देव दयानिधे करुणया मां पाहि सर्वेश्वर।

त्वं विश्वाधिक वेदवेद्य भगवन् कारुण्यवारांनिधे
धन्योऽस्मीश भवत्पादाम्बुजरसास्वादैकसन्मानसः ।।

तदा महेशोऽप्यथ दभ्रभक्तं-
रक्त्या विलोक्याथ मुदा दयालुः ।
प्रोवाच धन्योऽस्मि ममैकमान्यो
भवाधुना त्वं ससुतः सदारः ।। ४२ ।।

कालान्तरे चारुशशाङ्कमौलेः
समेहि मे राजतपर्वताग्रम् ।
कैलासशैलं स निनाय दभ्र-
भक्तं सदारं ससुतं महेशः ।। ४३ ।।

श्रीदभ्रभक्तस्य चरित्रमेत
च्छृणोति यः साहसिकोत्तमस्य ।
न केवलं भूतिरमुष्य हस्त-
स्थिता परानन्दमयी च मुक्तिः ।। ४४ ।।

।। इति श्रीशिवरहस्ये नवमांशे षट्पञ्चाशोऽध्ययः ।।

।। सप्तपञ्चाशोऽध्यायः ।।

स्कन्द उवाच

भणामि भक्तिभरितं चरितं चोलभूपतेः ।
प्रविश्य प्राणिनामन्तर्दुष्टानां शासितुः स्वयम् ।। १ ।।

केरळो नाम विषयश्चोलभूपालपालितः ।
अपदं विपदामस्ति सर्वासां सम्पदां पदम् ।। २ ।।

अस्ति प्रकाशं(प्रशस्त)देशेऽस्मिन् अवकाशान्तरं श्रियः ।
महोदयपुरं नाम धाम चेरमहीपतेः ।। ३ ।।

श्रीवाञ्छमिति नाम्नास्ति यत्रान्तर्धाम शाम्भवम् ।
प्रियं महोक्षवाहस्य प्रपन्नजनभद्रदम् ।। ४ ।।

वेदघोषैर्वाद्यघोषैरारामभ्रमरावैः ।
गजवाजिरवैर्यत्र पयोधिरभिभूयते ।। ५ ।।

वर्णानुष्ठानधर्मोऽयं श्रुत्व्याश्रमपथा जनैः ।
तिष्ठात्यनुष्ठानपरैर्निष्ठावद्भिः कृपालुभिः ।। ६ ।।

शिवयोगिपतीन्द्राणां मठैर्वेदान्तघोषितैः ।
भस्मरुद्राक्षसम्पन्नैः शिवलिङ्गार्चनप्रियैः ।। ७ ।।

पुष्पारामाभिरामान्ते पुरे तस्मिन् महोदयः ।
महागोद इति ख्यातः कोऽप्यासीच्चोलभूपतिः ।। ८ ।।

स शुद्धभावसन्त्यक्तलोकनीतिर्नृपप्रियः ।
शिवपादाब्जभावेन विभासितजगत्त्रयः ।। ९ ।।

श्रीवाञ्छीपुरनाथस्य कैङ्कर्यनिरतोऽभवत् ।
प्राकारगोपुरोत्तुङ्गमण्टपादि विधाय सः ।। १० ।।

बिल्वप्रियालसरलकरवीरवनानि च ।
मन्दारकर्णिकाराद्यसहकाराण्यकारयत् ।। ११ ।।

पुष्पारामानथो कर्तुं चकार मतिमान्नृपः ।
रथं च वाहनादीनि कुर्वंस्तत्रोत्सवं विभो ।। १२ ।।

शम्भुभक्तार्चनैरेव निनाय दिवसान् बहून् ।
प्रातः प्रातः समुत्थाय शिवं सञ्चिन्त्य वै हृदि ।। १३ ।।

स्नात्वा तीर्थे महेशस्य पावनेन च भस्मना ।
कुसुमैः कोमलैर्मालां चन्द्रमौलेरकल्पयत् ।। १४ ।।

श्रीमज्जनाम्बु चानीय चक्रे सम्मार्जन क्रियाः ।
गोमयैर्भक्तिभरित उपलिप्य शिवालयम् ।। १५ ।।

दीपानारोपयन्भक्त्या विद्योतयति शङ्करम् ।
अर्चयन् शिवमेकान्ते सदा तौर्यत्रिकार्पणैः ।। १६ ।।

सदा शङ्करनामानि गायन्नास्ते शिवालये ।
महागोदो महीपालो मन्त्रिभिर्यन्त्रितः सदा ।। १७ ।।

महार्णवौघपरिघे(खे) शैलावहपरीवृते ।
लक्ष्मीविलासकलिते महोदयपुरेऽवसत् ।। १९ ।।

आज्ञाचक्रसमृद्धश्रीः क्षमावानिति विश्रुतः ।
पालयित्वा चिरं पृथ्वीं तपः कर्तुं वनं ययौ ।। १९ ।।

क्षमां त्यक्त्वा क्षमायुक्ते क्षमावति वनं गते ।
कोऽस्माद्राज्यार्ह इत्येतन्मन्त्रिणोऽपि व्यचिन्तयन् ।। २० ।।

इति निश्चित्य[1] (?) ते जग्मुस्तत्रासौ यत्र तिष्ठति ।
भक्त्यैव सुतरां शम्भुं ध्यायन्नेवं शिवं स्थितः ।। २१ ।।

महागोदं प्रणम्यैव स्वकार्यं समुदैरयन् ।
त्वयि शासति राजेन्द्र सर्वे शाम्भवसत्तमाः ।। २२ ।।

क्षमापतिः क्षमायुक्तः क्षपानाथधृगर्चकः ।
[2]रूपान्वयोद्भवः प्राज्यं राज्यं शासितुमर्हसि ।। २३ ।।

मन्त्रिणां तन्महागोदो वचः श्रुत्वा व्यचिन्तयत् ।
विघ्नः स्याच्छिवदासस्य प्राज्यराज्यस्य पालनम् ।। २४ ।।

शिवस्याभिमतं राजन् तव राज्यस्य पालनम् ।
एवं निश्चित्य देवस्य पुरतोऽहं भवन्मतम् ।। २५ ।।

करोमि किन्नवेत्येवं पश्चान्निश्चित्य कथ्यते ।
इत्युक्ता मन्त्रिणस्तेन तथास्त्वित्येव तेऽब्रुवन् ।।
सोऽपि तद्वचनं श्रुत्वा गत्वा देवं महेश्वरम् ।। २६ ।।

---

1. एवं विचिन्त्येति सङ्गतः पाठः ।
2. रूप=अनुरूप, उत्तम ।

पुरस्ताच्चन्द्रचूडस्य विज्ञप्तिमकरोदिमाम् ।

महोगोदः उवाच -

स्वामिन् मया पालनीयं किं राज्यपरिपालनम्[1] ।। २७ ।।

प्राज्यराज्ये मनो यस्य त्वत्पादं दूरगं भवेत् ।

शिवः (उवाच)

तवेदमपि मे वत्स कैङ्कर्यमवबुध्यथाः ।। २८ ।।

न हि द्रोही महेशस्य महापूजाकरो भवेत् ।
यदि राज्यं समृद्धं स्याद्धनधान्ययुतं मुने ।। २९ ।।

मम धामसु सर्वाणि वप्रप्राकारगोपुरम् ।
मण्टपं तीरबन्धांश्च शिवतीर्थेषु कारय ।। ३० ।।

महोत्सवविधिं चापि महापूजाप्रवर्तनम् ।
इत्याकर्ण्य गिरं गोदः प्राहेशं यदि ते मतम् ।। ३१ ।।

तर्हि मे दीयतां स्वामिन् त्वयि भक्तिमचञ्चलाम् ।
सर्वजीवरुतज्ञत्वमिङ्गितज्ञत्वमीश्वर ।। ३२ ।।

समस्तभाषाज्ञातृत्वं सम्यग्वितरणं यशः ।
देहि श्रियमिति प्रोचे तथा स्त्विति नभो गिरा ।। ३३ ।।

तदाकर्ण्य विभोराज्ञां शिरसा स समुद्वहन् ।
अमात्यैः सह मत्तेभवाहः प्राप महोदयम् ।। ३४ ।।

---

1. "किं राज्यं सपरिच्छदमि"ति "मम विस्तृतमि"ति वा समञ्जसं भवेदिति भाति ।

वीथ्यां महोदयस्याथ पूषाकलितविग्रहम् ।
रजकं वीक्ष्य तं मत्वा भस्मोद्धूलितविग्रहम् ।। ३५ ।।

प्राणमत्स तदा राजा रजकं सोऽपि भीतितः ।
प्राह राजानमव्यग्रो रजकोऽहं न तापसः ।। ३६ ।।

तं प्राह राजा रजकं त्वं भस्मोद्धूलितो ह्यसि ।
इत्युक्तस्तेन राज्ञा वै मन्त्रिणो मुमुहुर्भृशम् ।। ३७ ।।

सोऽपि भद्रासनारूढो राज्यं तत्पर्यपालयत् ।। ३८ ।।

तस्मिन्महागोद इति प्रतीते
सिह्मासनस्थे वरकेरलेषु ।
सर्वप्रजानामभवत्प्रमोदः
सस्यैरवन्ध्या धरणी तदासीत् ।। ३९ ।।

।। इति श्रीशिवरहस्ये नवमांशे सप्तपञ्चाशोऽध्ययः ।।

।। अष्टपञ्चाशोऽध्यायः ।।

स्कन्द उवाच -

वज्रसिंहासनारूढे महागोदे महीभुजि ।
तत्कीर्तिललनापाणौ ब्रह्माण्डं कन्दुकायितम् ।। १ ।।

तस्मिन् काले दरिद्रः सन् भद्राख्यः कोऽपि गायकः ।
मधुरायां महादेवमगासीदर्थवाञ्छया ।। २ ।।

स्वप्ने तं हालवक्त्रेशः समुद्बोध्य दयानिधिः ।
दत्वा पत्रमिदं चोलहस्ते देहीत्यचूचुदत् ।। ३ ।।

सोऽपि केरलमभ्येत्य कोटिकोलापुराभिधम् ।
महोदयपुरं गत्वा राज्ञे पत्रं समार्पयत् ।। ४ ।।

राजा तत्पत्रमादाय शिरस्याधाय शाम्भवम् ।
नृत्यन् गायन् शिवं ध्यायन् भक्त्या क्षितितलेऽपतत् ।। ५

रोमाञ्चकञ्चुकोत्कीर्णप्रमोदाश्रुदृगञ्चलः ।
इति कर्तव्यतामूढो जहर्ष च ननर्त च ।। ६ ।।

तस्मै गायकपुत्राय ददौ सर्वस्वसम्पदम् ।
अमात्यैर्वारितोऽप्यस्मा अददात् क्षितिमण्डलम् ।। ७ ।।

स गायको विलोक्यैवं प्राहामात्यान् किमेतया ।
शम्भोर्नामाख्यसुधया नाहं वसुधया सुखी ।। ८ ।।

सम्पदां समुदायेन भूत्या पत्रं प्रसाध्यताम् ।
ममोपयुक्तमेतावदधिकेन धनेन किम् ।। ९ ।।

इत्युक्त्वा स्वोचितं द्रव्यमनैषीन्मधुरां प्रति ।
स कदाचिन्नृपः शम्भुपूजान्ते नूपुरध्वनिम् ।। १० ।।

अश्रृण्वन् ताण्डवेशस्य यथा पूर्वमचिन्तयत् ।
अद्य किं कृतमीशस्य मयात्यन्तं विषण्णधीः ।। ११ ।।

उरः स्थलं तदा भेत्तुमग्रहीत्करवालकम् ।
मध्ये वक्षसि तं खड्गं निदधानं महीपतिम् ।। १२ ।।

राजन् मा साहसं कर्षीः ऋषितुल्योऽसि हे नृप ।
व्यालम्बि सुन्दरेशस्य श्रीगानं श्रूयतां चिरम् ।। १३ ।।

इति वाक् शाम्भवी व्योम्नि समुदस्थान्नृपं प्रति ।
इत्थं सभापतेर्वाणीं निशम्य नृपतिस्तदा ।। १४ ।।

अहो देव दया भक्तेष्विति विस्मयमाययौ ।
अथ हेमसभां गत्वा नत्वा पादौ महेशितुः ।। १५ ।।

अपर्यन्तमहानन्दघनाम्भोधौ ममज्ज सः ।
अहर्निशं महेशस्य महागोदो महीपतिः ।। १६ ।।

असेवत पदद्वन्द्वं सेवितं सर्वदैवतैः ।
नटेशसेवां कुर्वाणो भक्तिरक्तः स पार्थिवः ।। १७ ।।

तत्रानैषीन्निमिषवत् आवसद्दिवसान् बहून् ।
तदा नृपं समाहूय प्रोवाचेत्थं सभापतिः ।। १८ ।।

सौम्येशगानमाकर्ण्य मया नृप विलम्बितम् ।
इति हेमसभानाथवाक्यं श्रुत्वा स भूपतिः ।। १९ ।।

अथ जम्बुपुराधीशदर्शनोत्सुकमानसः ।
श्रीतिल्लनगरात्तस्मात्सेनया सह निर्ययौ ।। २० ।।

तत्र श्रीकण्ठमुख्यानि स्थानानीशस्य सेवितुम् ।
भक्तियुक्तः प्रणम्यासावाययौ कमलालयम् ।। २१ ।।

नत्वा स्तुत्वा महादेवं वल्मीकेशं प्रहृष्टधीः ।
सुन्दरेशं समालिङ्ग्य तत्रोषित्वा चिरं नृपः ।। २२ ।।

सौम्येन प्रययौ नन्तुं पाण्ड्यदेशशिवालयान् ।
चोलो ययौ हालवक्त्रं शिवशासनलग्नधीः ।। २३ ।।

हालास्यलास्यनृत्तेशं दृष्ट्वा हृष्टो नृपोऽभवत् ।
प्रयातौ पथि भूतेशश्रीधामानि प्रणेमतुः ।। २४ ।।

वहन्तीं सह्यजां तीर्त्वा तत्तीरस्थशिवालयम् ।
दृष्ट्वा नत्वाभितुष्टाव सुन्दरेशेन सादरम् ।। २५ ।।

पञ्चापगातटाधीशं नेमतुश्चोलसुन्दरौ ।
ततो महोदयपुरं सम्प्राप्य प्रीतमानसौ ।। २६ ।।

कुर्वन्तौ विविधां क्रीडां तस्मिन् न्यवसतां चिरम् ।
ततः स चोलः सौम्याय गच्छते कमलालयम् ।। २७ ।।

ददौ धनानि चित्राणि वस्त्राण्याभरणानि च ।
गच्छन्तं सुन्दरं दूरादन्वगाच्चोलभूपतिः ।। २८ ।।

चोळः शिवरतस्तत्र उवास शिवधामसु ।
एकातपत्रेण चिरं सर्वामुर्वीं शशास हि ।। २९ ।।

इतिहासः शाम्भवस्य कथ्यतेऽन्यः सुखोदयः ।
गुणिनो गणनाथस्य गण्यते पुण्यवैभवम् ।। ३० ।।

चम्पायां गणनाथाख्यो विप्राणामग्रणीरभूत् ।
द्रोणीपुरेशश्रीकर्मकरणैकपरायणः ।। ३१ ।।

शिवोद्यानारोपणे च रक्षणेऽनुक्षणे रतः ।
पुष्पापचयने मालाग्रथने(स्वं)सन्न्ययोजयत् (?) ।। ३२ ।।

श्रीमज्जनाम्बुनयने मार्जनालेपनादिषु ।
प्रदीपारोपणे कांश्चिच्छीघ्रं पुस्तकलेखने ।। ३३ ।।

तद्वाचने च कतिचिन्नियोज्य प्राज्यजीवनैः ।
शिवभक्तिकृतः सर्वानुच्चैराभाषणं सदा ।। ३४ ।।

इत्येवमादितो नित्यं शिवकैङ्कर्यकृत्सदा ।
प्रीणयन् ज्ञानसम्बन्धपदद्वन्द्वप्रपन्नधीः ।। ३५ ।।

वर्णाश्रमकुलाचारनिरतो भस्मभूषणः ।
प्रहर्ष(प्रकृष्ट)भक्तिश्रद्धाभ्यां शिवभक्तार्चने रतः ।। ३६ ।।

तस्य भक्तेः परीक्षार्थं त्र्यक्षो विप्राकृतिर्बभौ ।
भस्मत्रिपुण्ड्ररुद्राक्षभूषितो भासुरस्तदा ।। ३७ ।।

हृद्यर्थं कञ्चिदालम्ब्य तद्गेहमगमत्स्वयम् ।
तं नत्वाऽऽह गणश्रेष्ठः किं करोमि प्रशाधि माम् ।। ३८ ।।

इत्युक्तो भूसुरः प्राह भासुराचारचेष्टितम् ।
विचारो मद्धृदि चिरं प्ररूढो गूढमप्यहम् ।। ३९ ।।

वदामि ते श्रृणुष्वैतदेकलिङ्गार्चकः स्वयम् ।
भोक्ष्ये गृहे ते सिद्धान्नं सम्पूज्य प्रमथाधिपम् ।। ४० ।।

लिङ्गं संस्थापयाम्यद्य स्नातुं यामि सरिद्वराम् ।
इत्युक्त्वा निर्गतो विप्रस्तथेति प्रतिगृह्य सः ।। ४१ ।।

लिङ्गं संस्थापयामास स्वगृहे गृहीणीकरे ।
एतस्मिन्नन्तरे विप्रे स्नात्वा तत्र समागते ।। ४२ ।।

अदर्शनं गते लिङ्गे स विप्रः स च भासुरः ।
अन्विष्य सुचिरं तत्र प्राणांस्त्यक्तुं स वै द्विजः ।। ४३ ।।

प्रयत्नमकरोत्तेन सभारोपि[1] स भूसुरः ।
प्राणांस्त्यक्तुमथैच्छत्सः त्रयोऽपि विधिचोदिताः ।। ४४ ।।

तदा महेशवाक्येन हर्षिता भक्तिशोधने ।। ४५ ।।

चोलस्य चापि गणनायकभूसुरस्य
भक्तिं दृढां प्रथप्रोथ[2] दृशा विलोक्य ।
कैलासशैलमनयत्प्रसभं भवाब्धे-
रुत्तारणं शरणमीशजनेषु शर्वः ।। ४६ ।।

।। इति श्रीशिवरहस्ये नवमांशे अष्टपञ्चाशोऽध्ययः ।।

---

1. सदारोऽपि । 2. प्रमथपोऽथ

।। एकोनषष्टितमोऽध्यायः ।।

स्कन्द (उवाच) -

ततः कृताभिधानस्य कृतकीर्तेः कृतात्मनः ।
कृतान्तकस्य चरितं दुरितापहमुच्यते ।। १ ।।

यः शूरधीरवीराणां विजेता विजितेन्द्रियः ।
स भक्तोऽभवदीशाने कलिन्दा पुरनायकः ।। २ ।।

स तु माहेश्वरीमाख्यां जिह्वायां परिवर्तयन् ।
नित्यं भक्तपदार्चातो नान्यच्चक्रे परायणम् ।। ३ ।।

वीरः स गौरीरमणकरुणाकवचो रणे ।
व्यद्रावयन्नृपान्वेगान्नागानिव खगाधिपः ।। ४ ।।

विध्वस्तेषु समस्तेषु विद्रुतेषु नृपेषु सः ।
प्राज्यपूज्यगुणै राज्यं विभज्य प्रशशास सः ।। ५ ।।

स चकार द्विजार्चां स शिवद्रोहकृदन्तकृत् ।
कृतान्तक इति ख्यातः स नाम्नाऽभवदुग्रराट् ।। ६ ।।

नृपैररिभिराधूतोगर्वितैर्द्रोणदामवान् ।
निर्जित्य दुर्न(र्ज)यानेतान् स स्वशीर्षस्रजं दधौ ।। ७ ।।

मकुटेन विना राजा विराजितपराक्रमः ।
अपालयत् भुवं सर्वां सरसां सागराम्बराम् ।। ८ ।।

स राजा मणिकोटीरधारणाय कृतोद्यमः ।
प्रख्यातान् प्रथयामास श्रीतिल्लपुरभूसुरान् ।। ९ ।।

तिल्लभूसुराः (ऊचुः) -

वयं चोलमहीपानां मणिकोटीरदायिनः ।
नेतरेषामिति प्रोच्य ते ययुः केरलक्षितिम् ।। १० ।।

शिवार्चनाय तत्रैकस्तस्थौ तिल्लपुरे द्विजः ।
चिरं तिल्लपुरावासी केरले न्यवसत्सुखम् ।। ११ ।।

श्रीतिल्लपुरविप्रेषु तथाभूतेषु तेषु सः ।
राजा स शयनं भेजे ध्यायन् शैलात्मजासखम् ।। १२ ।।

महेश मकुटं देहि भवत्पादयुगं मम ।
इति प्रार्थनया सार्धं निद्रां निशि विवेश सः ।। १३ ।।

दर्शयित्वा निजं रूपं तस्मै स्वप्ने सभानटः ।
न्यधान्निजपदद्वन्द्वं तन्मूर्ध्नि मकुटोपमम् ।। १४ ।।

प्रबुध्य चोत्थितः प्रातर्नटनाथपदाम्बुदम् ।
दधानो मूर्ध्नि कोटीरं महाराजधुरं दधौ ।। १५ ।।

साक्षात् त्र्यक्षप्रसादेन वीक्षितो विश्वरक्षिता ।
चक्रे रत्नमयं सर्वं श्रीमहेश्वरमन्दिरम् ।। १६ ।।

शिवधामानि चान्यानि महोत्सवयुतानि च ।
पूजयामास स तदा धनदोपमसम्पदा ।। १७ ।।

धीरः केरलदेशस्थान् आह्वयद्भूसुरान् नृपः ।
यथापूर्वं तिल्लवने स्थापयामास तान् द्विजान् ।। १८ ।।

असत्यदास्य इति वै तत्राभूत्कविशेखरः ।
नवं सारस्वतरसं यो मेने जन्मनः फलम् ।। १९ ।।

स भक्तिरसया सूक्त्या विना विषमलोचनम् ।
न स्तोष्येऽहं सुरं वान्यं नरं वेत्यात्तनिश्चयः ।। २० ।।

एवमेव शिवान्नान्यमस्तावीत्स यतस्ततः ।
असत्यदास्यसहितोह्यतिदास्य इति श्रुतः ।। २१ ।।

अतिदास्यः (उवाच) -

सुधाधामखण्डोज्ज्वलच्चारुमौले
ललच्चारुकाकोदरापारहार ।
स्फुरत्सार कर्पूरधाराशरीर
स्मरापरागर्वापहार प्रसीद ।। २२ ।।

सुगङ्गातरङ्गौघरिङ्खज्जटाजूट नीडप्रफुल्लाम्बुजाऽऽरक्तनिर्यत्प्रभा-कोटिकूटानलाकारफाल त्रिपुण्ड्राङ्कमध्योज्ज्वलन्नीलकण्ठ, अगाधीश कन्यासनाथ प्रसीद प्रभो मारमारान्तकाभोगभागान्धकादग्धसन्दिग्धरक्त त्रिशूल । विशालाक्ष उक्षाङ्गसंस्थानहर्षप्रकार्षानुतर्षानटल्लोल दिक्पाल बृन्धोज्ज्वलच्चारुमौलीविलोलाब्जपादाध्वराध्यक्ष पाहि ।।

शिवानङ्गभङ्गोत्थभस्माङ्गसङ्ग कृतार्धाङ्गरामाङ्ग लिङ्गोत्तमाङ्ग, भुजङ्गाङ्ग भूषान्लाक्षोरुपूषाविशेषोरुभासाविशेषाङ्गसङ्ग प्रसीद ।

प्रभो विश्वविश्वाधिकाशास्यगोध्यक्ष(?) उक्षाध्वराध्यक्ष दक्षाध्वरध्वाङ्क्षभूता-सुराध्यक्ष, शिक्षाविनोद विभो पाहि वाहीकृताम्नाय साहित्यमेतत्तवाब्जाधि-पादे समर्प्याहिहार ।

भवामि प्रभो मुक्तिकान्ताकराक्रान्तमार्गः समायाहि मोदम् ।

तस्य सारस्वतस्तोत्रतरङ्गितमनाः शिवः ।
ददौ तस्मै दृढां भक्तिमैश्वर्यमतिमानुषम् ।। २३ ।।

चारुवर्णपरिष्कारा दुहितेव सलक्षणा ।
श्रीमती तस्य कविता जज्ञे शिवपतिव्रता ।। २४ ।।

सारस्वतोरुशब्दार्थमाधुरीचातुरी जुषा ।
सम्बोध्य स कविर्देवं सततं तत्पदं ययौ ।। २५ ।।

एवं स देवेशहृदैभक्त्या
निर्जित्य शत्रून् परिपाल्य पृथ्वीम् ।
समर्च्य सर्वान् सुरभूसुरांश्च
परात्परं शैवपदं प्रपेदे ।। २६ ।।

कृतात्मनस्तस्य जितान्तकस्य
चरित्रमेतत्परमं पवित्रम् ।
यः श्रोत्रपात्रे निदधाति मित्र-
नेत्राब्जपादे लभते स भक्तिम् ।। २७ ।।

कवित्वसूक्त्या स कवीन्द्रभक्त्या
विमुक्तियुक्त्याश्रितशम्भुभक्त्या ।
पवित्रगात्रः श्रृणुयात् त्रिणेत्र-
सुप्रेमचारित्रमहो स पुण्यमाक् ।। २८ ।।

।। इति श्रीशिवरहस्ये नवमांशे एकोनषष्टितमोऽध्ययः ।।

।। षष्टितमोऽध्यायः ।।

स्कन्दः उवाच -

अथाहं कीर्तिचोलस्य कीर्तयिष्यामि वैभवम् ।
कुलाचलशिखारूढा वीरशार्दूललक्षणाः ।। १ ।।

औदार्यवीर्यगाम्भीर्यचातुर्यगुणभूषणाः ।
अभूवन् भुवि भूपालाः शिवकैङ्कर्यतत्पराः ।। २ ।।

अपालयन् चोलमूलं कावेरीवारिवर्धितम् ।
श्रीनिवासं तदादेशं निदेशे कृत्य पार्थिवाः ।। ३ ।।

हृष्टपुष्टजनैः कीर्णं त्रिविष्टपमिवापरम् ।
गोप्तासीत्तत्र गोत्रायाः कीर्तिमित्रोऽभवन्नृपः ।। ४ ।।

अक्रियन्तोत्सवास्तत्र श्रीसदाशिवधामसु ।
आचोदयच्चास्तमयं स नित्यं व्ययमातनोत् ।। ५ ।।

प्रतापकीर्तिनिकरैर्न्यक्कृतार्कनिशाकरैः ।
सर्वमुर्वीपतिर्गर्वं निर्वापय (?) दसौ रिपोः ।। ६ ।।

प्रतापेन स्वकीयेन चक्रे भूचक्रमात्मसात् ।
देवैर्निरूपितमिदं शैवसिद्धान्तदर्शनम् ।। ७ ।।

कृत्यमित्यवगत्यासौ नित्यं तद् ददृशे हृदा ।
सोमावतंसधामानि कुर्वन् सर्वाणि सर्वदा ।। ८ ।।

महापूजोत्सवयुतान्यशादीशे विशांपतिः ।
जित्वा सर्वदिशो जिष्णुर्वर्धिष्णुर्विष्णुविक्रमः ।। ९ ।।

तद्दत्त बहुवित्तानि जगृहे हरपूजने ।
हरधामान्यसौ गत्वा नत्वा स्तुत्वा च भक्तितः ।। १० ।।

जित्वा कृत्वा धनैर्भित्वा हुत्वा तदानले ।
विवेश विलसत्कोषं निजं राज्यं परं ययौ ।। ११ ।।

भूमौ सिन्धुपरीतायां यो ददाति करं न मे ।
स नृपोऽस्ति किमित्याप्तानमात्यानन्वयुङ्क्त सः ।। १२ ।।

गिरिदुर्गाश्रयः कश्चिदधिकाख्योऽकरप्रदः ।
नृपो महानित्यमात्यैरीरितः प्राह तान् नृपः ।। १३ ।।

दुष्प्रापमस्ति किं दुर्गं प्रबलं वा बलस्य मे ।
युष्माभिर्गिरिमारुह्य तत्पांसूक्रियतामिति ।। १४ ।।

कृतैकमत्यास्तेऽमात्या वात्यावृत्याऽगमन्गिरिम् ।
राज्ञाचाज्ञापितास्ते वै संज्ञाप्याजग्मुरेव हि ।। १५ ।।

चूर्णीकर्तुं रिपोर्दुर्गं मार्गं जघ्नुः स्वसैनिकैः ।
आसेदुरधिकाख्यस्य गिरिदुर्गं दुरासदम् ।। १६ ।।

कीर्ति चोलस्य शैलाग्रमारोहन्तीममूं चमूम् ।
प्रत्युद्ययुः पार्वतीया गर्विताः सर्वसेनया ।। १७ ।।

कीर्तिचोलमहीपालसेना प्रत्युज्जगाम सा ।
अधिकाख्यस्य नगरे सेना सा सागरोपमा ।। १८ ।।

चतुरङ्गतरङ्गे ते सेने सिन्धुनिभे उभे ।
आयोधनं विदधतुर्विविधैरायुधैधिया ।। १९ ।।

पत्तिः पदातिना युक्तो रथिनो रथिनां वरैः ।
तुरङ्गिणस्तुरङ्गस्थैर्गजसंस्थो गजेन हि ।। २० ।।

उत्पतन्निपतत्तीक्ष्णबाणपाषाणपेषणम् ।
युद्धबद्धजनस्यार्धं सेनयोरुभयोरभूत् ।। २१

बहुत्वात्प्रबलत्वाच्च कीर्तिचोलमहीभुजः ।
साऽथ पाषाणविक्षेपात्सेनेयं विजयं ययौ ।। २२ ।।

अनया कीर्तिचोलस्य सेनया युद्ध्यमानया ।
अभूदधिकभूपस्य निहतं निखिलं बलम् ।। २३

असुभिस्त्यक्तवसुभिः सह भीत्या ससाध्वसः ।
गहनं गहनं प्रापदधिकस्तु भयाधिकः ।। २४ ।।

निर्भिद्य निःसमं दुर्गं निहत्य निखिलं बलम् ।
धनमादाय निःसीमं *सामन्तैर्यदुपार्जितम् ।। २५ ।।

परेषां च प्रमथनं अमात्याः समुपेत्य ते ।
प्रणम्य कीर्ति चोलाय नृपालाय न्यवेदयन् ।। २६ ।।

वीराश्च रिपुवीराणां निकृत्तानि निजायुधैः ।
कोटीररत्नोत्कर्षाणि शीर्षाण्यस्मा अदर्शयन् ।। २७

तेष्वेकं शीर्षकं दृष्ट्वा तत्र बद्धजटाधरम् ।
विषादवेपथुभरः भूपालो व्याकुलोऽभवत् ।। २८ ।।

शिवं शीर्णजटाजूटं स्वप्ने दृष्ट्वा विलप्य सः ।
पराजयं परेषां च निशम्य परिदेवनम् ।। २९ ।।

---

* सामन्तेभ्यो यदार्जितम् ।

दिष्ट्या मयान्यथा दृष्टा वैरिणो विधिनाधुना ।
मया श्रीभूतिमाहात्म्यं पृथिव्यां परिपालितम् ।। ३० ।।

अविचारापचारोऽयं भक्तस्य हि कृतो मया ।
मन्ये निन्ये स दुःखेन कालं शूलभृदर्चया ।। ३१ ।।

तद्धि सञ्चिन्त्य सोऽमात्यानाह देहविरक्तधीः ।

राजा उवाच -

शम्भो स्थापयितुं दास्यमादास्ये भक्तिमीदृशीम् ।। ३२

गोप्तुं गां गोत्रभित्तुल्यगात्रं पुत्रं ममाद्य वै ।
आत्मजं वै गुणैः पूज्यं प्राज्ये राज्येऽभियोज्यताम् ।। ३३ ।।

इत्यादिश्य नृपोऽमात्यनाज्याक्तं प्राज्यपावकम् ।
प्रविवेश महादेवं ध्यात्वा पञ्चाक्षरं जपन् ।। ३४ ।।

प्रविष्टमात्रे भूपाले शिखी शान्तशिखोऽभवत् ।
ववर्षुः कुसुमासारं विबुधा वसुधाधिपम् ।। ३५ ।.

पुरारिः पुङ्गवारूढः प्रादुर्भूतः सहोमया ।
नृपं तं स्वपदं निन्ये भक्तेन जटिना सह ।। ३६ ।।

आर्तिपापभयहारि श्रृण्वतां
कीर्तिचोलचरितं श्रृणोति यः ।
भक्तिमेत्य सुखधाम संविशेत्
कार्तिकेयजनकस्य तत्पदम् ।। ३७ ।।

।। इति श्रीशिवरहस्ये नवमांशे षष्टितमोऽध्ययः ।।

।। एकषष्टितमोऽध्यायः ।।

स्कन्दः (उवाच) -

उग्रस्थानं सदात्रास्ति सह्यजातीरगोचरम् ।
नरसिह्म इति ख्यातस्तत्राभूत्क्षत्रियाधिपः ।। १ ।।

भवानीपतिपादाब्जभक्तिहृत्पद्मसद्मवान् ।
मेने विभूतिं श्रीभूतिं सम्पत्स्वपि सतीषु यः ।। २ ।।

जेता रिपूणां यो वीरः प्रजाश्च परिपालयन् ।
शरणं चरणं शम्भोः मेने सोऽनुक्षणं विभोः ।। ३ ।।

उमामहेशधामानि सर्वाणि स महीपतिः ।
महोत्सवमहापूजामहिमानि चकार च ।। ४ ।।

आर्द्रायां चन्द्रचूडस्य नृत्यं तत्र व्यलोकयत् ।
मालाप्रदीपनैवेद्यं भूमिभागे समर्चनम् ।। ५ ।।

आर्द्रोत्सवेषु सर्वेषु शिवभक्तानभोजयत् ।
सम्पूज्य गन्धपुष्पाद्यैः निष्कमेकमदापयत् ।। ६ ।।

कालेऽस्मिन् कालभूताङ्गः कश्चिद्भस्माङ्गभासुरः ।
सनखक्षतिरागच्छन्निन्द्यमानो जनैर्वृतः ।। ७ ।।

दुःशीलोऽपि सरिन्मौलेः पादभक्तः स भस्मधृक् ।
अनिन्द्य इत्यसौ राजा द्विगुणं तमपूजयत् ।। ८ ।।

अतिभक्त इति प्राज्ञो ह्यभवत्सह्यजातटे ।
अतिमुक्ता हेमरत्नमणिकुट्टिमपट्टणम् ।। ९ ।।

तत्र त्रिगुणषड्द्वीपसम्पद्दर्शनदर्पणे ।
अस्ति कैवर्तपाटान्तः[1] स्थानं दाननिवेशनम् ।। १० ।।

तत्रातिभक्तिरित्यासीच्छिवभक्तपदार्चकः ।
धीवरो धीवरवरो भवपादब्जसक्तधीः ।। ११ ।।

जालाहृतैर्मीनजालैः सम्पन्नद्रव्यसञ्चयैः ।
ईशोऽयं सर्वदेशानं शर्वभक्तान् समार्चयत् ।। १२ ।।

जालाहृते मीनजाले यो दृष्टः प्रथमं झषः ।
अयं शम्भोरिति जहौ सोऽतिभक्त इति स्मृतः ।। १३ ।।

एकं च मीनमेकस्मिन् वासरे स व्यपोहति ।
एकदाऽयं स्वजलेन प्राप्तं पद्मसमप्रभम् ।। १४ ।।

तं मीनं मेरुकूटाभं[2] नाभूदाक्रष्टुमीश्वरः ।
ततः सर्वेऽपि कैवर्तास्तमाकृष्य कथञ्चन ।। १५ ।।

अयं न मीन इत्यूचुस्तं दृष्ट्वा मीनमद्भुतम् ।
एष शम्भो हि तं दृष्ट्वा तप्ताग्निभ इति जहौ ।। १६(?)

कथ्यते कलिपङ्कस्य वर्तनं पुण्यकीर्तनम् ।
आरामैरभिरामं तमस्ति स्वस्तिदमास्पदम् ।। १७ ।।

पेणाकटपुरं नाम पुण्यं पुण्यजनास्पदम् ।
कलिपङ्काह्वयः[3] कश्चित् वैश्योऽभूत् तत्रवश्यधीः ।। १८

---

1. कैवर्तपाटान्तः-Inside portion of the village of Fishermen.
2. मेरुकूट - A summit of peak of mountain MERU
3. कलिकम्पाह्वयः कश्चित् वैश्योऽभूत् तत्रवश्यधीः ।।

भवानीपदपादब्जमधुपायितमानसः ।
प्रलम्बहस्तप्रासादनाथपादाम्बुजार्चकान् ।। १९ ।।

आर्चयच्छिवभक्तांश्च स्वच्छमानसदर्पणः ।
प्रलम्बहस्तप्रासादनाथस्योत्सवदर्शने ।। २० ।।

नान्यत्स मेने निःसङ्गमङ्गलैश्वर्यनिश्चलः ।
अन्नैः षड्रससम्पन्नैर्व्यञ्जनैश्चित्तरञ्जनैः ।। २१ ।।

अत्यादृतमना भक्तान् भक्तान्नैः समभोजयत् ।
कदाचिद्बहवो भक्ता भोक्तुं तद्गृहमागताः ।। २२ ।।

स तान् भोजयितुं तेषां पादप्रक्षालनं व्यधात् ।
पतिव्रता तस्य पत्नी नाम्ना नीतिमती जलम् ।। २३ ।।

करकात्तकरेणाम्बु दध्रे प्रक्षालनाय सा ।
प्रक्षालनाय तत्पादमस्पृशद्वैश्यसत्तमः ।। २४ ।।

भक्तवेषं समास्थाय शिवोऽभ्यागाद्यदृच्छया ।
तत्पादपद्ममालम्ब्य पादप्रक्षालनाय सः ।। २५ ।।

पादमाकर्षयन्नाह स तदा भस्मभूषितः ।
अकृत्वा शिवलिङ्गार्चामागतोऽस्मि त्वदन्तिकम् ।। २६ ।।

सन्त्यज्य शिवलिङ्गार्चां यो भुङ्क्ते नारको भवेत् ।
इत्युक्तोऽथ बिलम्बन्तीं (?) पत्नीं वीक्ष्याथ कोपनः ।। २७

पत्न्याः पाणिं कृपाणेन चिच्छेदाथाविचिन्तयन् ।
स्वयमादाय करकं प्रक्षाल्यास्य पदद्वयम् ।। २८।।

परिवेष्य स्वयं भक्तान् हृष्टोऽभूद्वैश्य सत्तमः ।
तद्भक्तिं शिवभक्तेषु मनः शक्तिमतीं स्थिराम् ।। २९ ।।

दृष्ट्वा देवः प्रसन्नात्मा प्रादुरास प्रियासखः ।
तं दृष्ट्वा देवदेवेशं तुष्टाव स विशां पतिः ।। ३० ।।

वैश्यः (उवाच) -

भो शम्भो त्रिजगच्छरण्य करुणातारुणवारां निधे
पाहीश प्रमथाधिनाथ गरधृक् विश्वेश विश्वाधिक ।
विश्वाशास्य विभो विभूषणमहाकाकोदराकन्धर
सोमानद्ध किरीटकोटिविलसद्भस्माङ्गरागारुण ।। ३१ ।।

तत्स्तुत्या तोषितः शम्भुस्तमाह विनयान्वितम् ।
शिवः उवाच -
शिवभक्तेषु ते प्रीत्या सुप्रीतास्तु तव प्रिया ।। ३२ ।।

विप्रियं नैव ते किञ्चिन्मत्प्रियस्त्वं न संशयः ।। ३३ ।।

आविर्बभूवाद्रिसुतासहायो
वृषाधिरूढः सुरवर्यसङ्घैः ।
हृष्टः प्रहृष्टश्च तमष्टमूर्तिं
प्रणम्य स प्राञ्जलिरेव तस्थौ ।। ३४ ।।

एवं भवानीपतिरात्मभक्तं
निनाय लोकं निरपायसौख्यम् ।
भक्तिप्रसन्नः परमेश्वरोऽसौ
प्रदाय पाणिं पुनरस्य पत्न्याः ।। ३५ ।।

वैश्योत्तमं तं शिवभक्तवश्यं
पत्न्या समेतं स्वपदं विनिन्ये ।
कलिकामजितः स्थिरात्मनः
कलिकम्पस्य चरित्रमद्‌भुतम् ।
कलिकालजकश्मलापहं
कलयन्कालजिदङ्घ्रिभाग् भवेत् ।।

।। इति श्रीशिवरहस्ये नवमांशे एकषष्टितमोऽध्ययः ।।

।। द्विषष्टितमोऽध्यायः ।।

कलिनीतेः कथ्यतेऽद्यजगद्व्यापिप्रथां कथाम् ।
तौण्डीरमण्डले भाति महीमण्डलमण्डने ।। १ ।।

अधिकापुरनामास्ति पुरं स्वःपुरसन्निभम् ।
विबुधाधिपसौधाभसुधाधवलितं सदा ।। २ ।।

शिवप्राकारसम्बद्धपुरवीथीसमेधितम् ।
प्राकारप्रकरा यत्र सूर्यमार्गनिरोधकाः ।। ३ ।।

समुच्छ्रायाः समीक्ष्यन्ते शरच्चन्द्रांशवो यथा ।
तत्र रत्नमुखद्रव्य वाणिज्यप्राप्तसम्पदा ।। ४ ।।

चक्रिणः श्रूयते वीथी नामतश्चक्रपाटिका ।
तत्र चारुचरित्रोऽभूत्तैलिकान्वयसम्भवः ।। ५ ।।

कामारिकिङ्करः कश्चित्कलिनीतिरितिश्रुतः ।
यशोधनो धनेनापि शोधनः सर्वपाप्मनाम् ।। ६ ।।

मन्दिरान्तर्बहिः शम्भोर्दीपानारोपयन् सदा ।
शिवधर्मपरस्तत्र सोऽवात्सीद्दिनयानतः ।। ७ ।।

भक्तिं परीक्षितुं तस्य तैलिकाधिपतेः स्थिराम् ।
शनैः शनैर्धनं तस्य शमयामास शङ्करः ।। ८ ।।

असङ्ख्यायां क्रमेणैव क्षीणायामपि सम्पदि ।

अत्यादरो न तत्याज शम्भोर्दीपानुरोपणम् ।। ९ ।।
क्रयविक्रयतल्लाभतैलेनैव त्रिशूलिनः ।
दीपानारोपयन् शस्तः स तैलिककुलाधिपः ।। १० ।।

नित्यमत्यन्तदौर्गत्या विक्रीय भ्रमिचक्रकम् ।
मनो नियम्य दैन्ये चाप्यथ क्रीत्वा शिवोत्सवम् ।। ११ ।।

उपपन्नेन तैलेन दीपानारोपयत्प्रभोः ।
सर्वं गृहादि विक्रीय दीपदापनकृत्सदा ।। १२ ।।

कालनीतिस्ततो जायामासीद्विक्रेतुमुत्सुकः ।
विक्रीयते मे जायेयं घनेन क्रीयतामिति ।। १३ ।।

जनेषूद्घोषयामास वीथ्यां वीथ्यां तदा मुदा ।
न क्रीणाति स्म तां कश्चिदाप्रदोषं शिवाज्ञया ।। १४ ।।

स च देवालयं प्राप्य विषण्णात्मा व्यचिन्तयत् ।
काले शिवालये दीपानद्यानर्पयतो मम ।। १५ ।।

किं प्राणैर्गलमुत्कृत्य तद्रक्तैस्तैलपूरणम् ।
करिष्यामीति सङ्कल्प्य कण्ठे खड्गं न्यवेशयत् ।। १६ ।।

तावद्देवोऽस्य जग्राह करवालधरं करम् ।
मा भक्त साहसं कार्षीरित्यवोचद्दयानिधिः ।। १७ ।।

श्रीमतः शक्तिनाथस्य चरितं कथयामि वः ।

कावेरीवारिपूरौधहृष्टसस्यसमाकुले ।। १९ ।।
देशे समृद्धमेवास्ति विरिञ्चिपुरनामकम् ।
क्षेत्रारामाभिरामेऽस्मिंस्तत्र शूद्रकुलोद्भवः ।। २० ।।

शक्तिनाथ इति ख्यातो भक्तिमानभवद्भवे ।
ब्रह्मविष्ण्वादिदुष्प्रापं मञ्जु शिञ्जाननूपुरम् ।। २० ।।

अरुणं श्रीमहेशस्य चरणं शरणं ययौ ।
अनन्यसिद्धसद्वृत्तिजन्मभृच्छिवकर्मकृत् ।। २१ ।।

निन्दकानां महेशस्य सोऽच्छिनद्रसनां रुषा ।
निशातशक्तिधृग्घस्ते निन्दकान्वेषणे रतः ।। २२ ।।

भक्तिगर्वेण न्यक्कुर्वन् तादृशं शिवकर्मकृत् ।
तोषयामास स शिवं सरिच्चन्द्रकलाधरम् ।। २३ ।।

।। इति श्रीशिवरहस्ये नवमांशे द्विषष्टितमोऽध्ययः ।।

।। त्रिषष्टितमोऽध्यायः ।।

काडवः पल्लिनाथोऽभूदन्यो भक्तोऽभवच्छिवे ।
कीर्तिधर्मप्रतापेन सत्यवाक्स महीपतिः ।। १ ।।

कलिं निराकरोद्घोरं शत्रुं युद्धे धनानि च ।
अश्रान्तशिवसिद्धान्तराद्धान्तिकमनाः सदा ।। २ ।।

उर्वीमपालयत्सर्वां प्राज्यसाम्राज्यदीक्षितः ।
राज्ञि तस्मिन् महाप्राज्ञे रक्षति क्षितिमण्डले ।। ३ ।।

नात्यजन्मनुजः कश्चिन्मार्गं मनुनयोचितम् ।
स्वतन्त्रे राज्यतन्त्रेऽपि तन्त्र्या शिवमगायत ।। ४ ।।

कुलाङ्कुरं कुमारं च प्राज्ये राज्येऽभिषिच्य सः ।
शिवकैङ्कर्यधुर्योऽभूदसौ धैर्यभृदग्रणीः ।। ५ ।।

सिषेवे शिवधामानि यानि सन्ति महीतले ।
तेषु धामसु सर्वेषु कुर्वन् कैङ्कर्यमीशितुः ।। ६ ।।

प्राकारगोपुरादीनि मण्टपादीनि कारयन् ।
पुण्डरीकपुरीशस्य सेवां कुर्वन् दिवं ययौ ।। ७ ।।

आविर्भवन्नाधिपुराधिनाथ
आरुह्य गोपुङ्गवमाद्रिजासखः ।
जायासमेतं कलिनीतिमेतं
निजं पदं निष्कलमानिनाय ।। ८ ।।

कलिनीतिकथामिमां शुभां
शिवदीपार्पणजातवैभवाम् ।

हृदये निदधाति यः सदा
    तदयं याति परात्परं पदम् ।। ९ ।।

श्रीवीरभक्तः शिवशासनेन
    त्रासोज्झितस्तादृशकर्मकर्ता ।
सशक्तिरत्यन्तमहेशभक्तो
    मुक्तिं प्रपेदे वरयोगिदुर्लभाम् ।। १० ।।

राज्ञश्चरित्रं परमं पवित्रं
    भुक्तेरिहोपायममुत्र मुक्तेः ।
भक्तिं निधत्ते हृदि शम्भुपादे
    श्रद्धां विधत्ते श्रुतिमौलिमार्गे ।। ११ ।।

अस्तिश्वेतनदीतीरे दक्षिणे वीक्षणास्पदम् ।
मदनान्तकरस्यैव सदनं वदनं श्रियः ।। १२ ।।

शिवभक्तो द्विजस्तत्र शिवपादाब्जसक्तधीः ।
नक्तं भक्ताशनो नित्यं रुद्रसूक्तैः शिवं स्तुवन् ।। १३ ।।

अवर्तिष्ट चिरं कालं शिपिविष्टेष्टमानसः ।
सत्सु सम्प्रीणनार्थेषु[1] विश्राणितधनः सदा ।। १४ ।।

आत्मावनं धनं मेने शिवपादाम्बुजार्चनम् ।
स्वसम्पदां फलं मेने दीपारोपणमित्यसौ ।। १५ ।।

कौसुम्भकमधूकादि विपिनान्यकरोत्सदा ।
तद्बीजकर्षितैस्तैलैर्देवदीपानचीकरत् ।। १६ ।।

---

1. सद्भ्यः सम्प्रीणनार्थाय ।

एवं तस्य स्थितवतो वृष्ट्या वनमनीनशत् ।
कृत्तोपवीतं कृत्वापि दैवदीपान्व्यधाद् द्विजः ।। १७ ।।

स्वभक्तिख्यापनार्थाय शिवोऽस्यार्थमपाहरत् ।
शिवदीपारोपणार्थं महायत्नपरोऽभवत् ।। १८ ।।

ततः स तु द्विजो नित्यं व्याघ्रेश्वरशिवालये ।
विक्रीय वेश्मक्षेत्रादि 'शिवे दीपमदीपयत् ।। १९ ।।

बान्धवान् याचितुं भीतः क्षीणाशेषधनोऽपि सः ।
गत्वा वनं स्वयं छित्वा काष्ठभारवहो द्विजः ।। २० ।।

वीथ्यामानीय विक्रीय तद्द्रव्यक्रीतसर्पिषा ।
दीपानुद्दीपयञ्छम्भोः शिवभक्तिपरोऽभवत् ।। २१ ।।

प्राकाशयत्स दीपालिं निशि पाशविमुक्तये ।
कदाचित्कैश्चिदक्रीते काष्ठभारे द्विजस्तदा ।। २२ ।।

दीपाराधनविघ्नोऽभूत् इति निघ्नन् स्वकं शिरः ।
रुरोद दुःखितो विप्रो हा हा शिव शिवेति सः ।। २३ ।।

सायं देवालयं प्राप्य शिखामुद्दीपयन् स्वकाम् ।
तेन प्राकाशयच्छम्भोर्धाम दिव्यं स भूसुरः ।। २४ ।।

तं प्राह समुदीक्ष्याथ तं त्र्यक्षः स्वपदं नयन् ।
आत्मविद्वेदविद्वंशे ग्रामे कटपुराह्वये ।। २५ ।।

करिनाथ इति ख्यातः कश्चिदासीत्कवीश्वरः ।
त्वङ्गद्गङ्गातरङ्गौघभङ्गि निःसङ्गपाटवैः ।। २६ ।।

सारस्वतैः स भूपालान् वशीचक्रे चतुर्विधैः ।
स चेरचोलपाण्ड्यानां सभासु सदसस्पतिम् ।। २७ ।।

संस्तुवन्मोदमनयत्तैर्दत्तै(तद्दत्तौ)र्द्रव्यसञ्चयैः ।
प्रसरत्कवितासारसमार्जितधनोच्चयैः ।। २८ ।।

प्रबन्धबन्धेन सममाबबन्ध शिवाश्रयान् ।। २९ ।।

कविः (उवाच) -

उच्चण्डताण्डवनिमग्नभुवोद्धृतेभ-
शुण्डोरुकाण्डविधृताब्जजसृष्टिपिण्डम् ।
ब्रह्माण्डभाण्डशकलाकलितोरुमुण्ड-
प्रोत्तुङ्गषण्डमगजापतिमानतोऽस्मि ।। ३० ।।

वेतण्डगण्डकलितेक्षणकुण्डलीश-
श्रीकुण्डलारुणमणिच्छविदीप्तगण्डम् ।
कोदण्डितोत्तमनगोद्धृतकाण्डबाण-
चण्डांशुसूनु विनिवारकमानतोऽस्मि ।। ३१ ।।

त्रैलोक्यनाथं गिरिजासनाथं
कैलासनाथं कवितासनाथः ।
चित्ते दधानः प्रणिधानभावो
देवं सिषेवे गणनाथमूर्तिम् ।। ३२ ।।

कालारिपादे कलितान्तरात्मा
कालान्तरेणामलधीः स वाग्मी ।
हालाहलाहार सदानिवास-
कैलासशैलं निलयं चकार ।। ३३ ।।

।। इति श्रीशिवरहस्ये नवमांशे त्रिषष्टितमोऽध्ययः ।।

।। चतुष्षष्टितमोऽध्यायः ।।

कावेरीवारिकलिते चोलभूपालपालिते ।
देशे प्रकाशविभवमस्ति दीर्घपुरं परम् ।। १ ।।

दीर्घदर्शी दीर्घपुरे तत्र शूद्रकुलोद्भवः ।
नासीरभञ्जनाख्योऽभूत् कोऽपि शङ्करकिङ्करः ।। २ ।।

स बाल्य एव श्रीकण्ठभक्तेषूत्कण्ठमानसः ।
अनिशं पूजयामास पूजया चन्द्रशेखरम् ।। ३ ।।

[1]अङ्गकार्यकलाटो सम्पाद्य स तदा धनम् ।
ओदनैः षड्रसोपेतैर्मोदमानः स शाम्भवान् ।। ४ ।।

विभूति [2]बृसिकां कन्यां कौपीनं च कमण्डलुम् ।
अभिवाञ्छितमन्नं च भक्तेभ्यः प्रददौ मुदा ।। ५ ।।

दुर्बलानां क्षितीशानां प्राप्य युद्धसहायताम् ।
कामारिपादभक्त्यैव जित्वारींस्तानतूतुषत् ।। ६ ।।

कृत्वा राजकुमाराणामस्त्रशिक्षासु पाटवम् ।
सम्पाद्य सम्पदस्ताभिरीशपूजामचीचरत् ।। ७ ।।

नामन्येव शिवादन्यद्वरिष्ठं नेति मन्यताम् ।
(न नाम्न्येव शिवादन्य द्वारिष्ठमिति मन्यताम् ।)
नागमादपरं शास्त्र न पञ्चाक्षरतो मनुः ।। ८ ।।

अध्यक्षगोचरानन्तशिवज्ञान प्रदायकान् ।
अन्त्यजानपि चेशानभक्तांस्ताञ्छिरसानमत् ।। ९ ।।

---

1. अगकार्य - Emblellishment. 2. बृसिका - seat of holy sage

मोदमानः शिवं भेजे भजनेन शिवापतिम् ।
आसीत्पल्लवभूपालवंशाम्भोनिधिचन्द्रमाः ।। १० ।।

पादसिब्म इति ख्यातः सिह्मसंहननो नृपः ।
चतुरङ्गजयाकाङ्क्षी चतुरङ्गबलान्वितः ।। ११ ।।

विनिर्जित्य भुवं भूपानुत्तराशाधुरन्धरान् ।
अर्थानुपचिनोति स्म सदा शङ्करकिङ्करः ।। १२ ।।

स तैरर्थैर्महादेवधामान्येव चकार सः ।
कलयन् विदधेवापीकूपगोपुरमण्टपान् ।। १३ ।।

सह्यजातीरयोश्चक्रे धाम श्रीचन्द्रमौलिनः ।
कालहस्तिपुरीं प्राप्य पुण्डरीकपुरं ययौ ।। १४ ।।

काञ्चीशोणाद्रिवृद्धाद्रिगोपर्वतमुखेषु सः ।
प्रणम्येन्दुकलामौलिमयासीत्कमलालयम् ।। १५ ।।

वल्मीकनाथमानम्य तत्रोवास प्रियासखः ।
मालागेहान्तिके तस्य महिषी पतितं सुमम् ।। १६ ।।

अजिघ्रदेकं कुसुमं स्त्रैणेनाज्ञात हेतुकम् ।
तापसो रागमित्रस्तां विलोक्यातीव कोपनः ।। १७ ।।

बलादाकृष्यतन्नासाकरौ चिच्छेद शस्त्रतः ।
रक्तैरुक्षितवक्षोजा छिन्ननासाग्रनिःस्रुतैः ।। १८ ।।

यथा कुङ्कुमपङ्कैः सा राजपत्नी व्यराजत ।
सा साञ्जनपतद्बाष्पबिन्दुना कीर्णभूषणा ।। १९ ।।

पुष्पाङ्कुरितवल्लीव क्रोशन्ती साऽपतद्भुवि ।
नत्वा वल्मीकनाथं तं निर्गतो नृपतिस्ततः ।। २० ।।

क्रौञ्चीमिवैनां क्रोशन्तीं दृष्ट्वा सोऽतीव रोषवान् ।
मयि जाग्रति वध्येन केन मौढ्यमिदं कृतम् ।। २१ ।।

इतीरयन् स दुःसाध्य ऐधत क्रोधवह्निना ।
त्रासाकुलस्तदा सोऽपि भक्तस्तत्पार्श्वतः स्थितः ।। २२ ।।

रणमित्रो यथावृत्तं नृपायास्मै न्यवेदयत् ।
स तदा ज्ञाततत्त्वार्थो दण्ड्यामेव विचिन्त्य ताम् ।। २३ ।।

पुष्पादातृकरोऽप्यस्याश्छेद्य एवेति निर्गतः ।
भक्त्या तया पार्थिवस्य प्रसन्नः परमेश्वरः ।। २४ ।।

आविर्भूतं वृषारूढं पुरोवल्मीकनायकम् ।
दृष्ट्वा हृष्टः प्रणम्येशं पार्थिवः प्राञ्जलिः स्थितः ।। २५ ।।

जगाद जगतां नाथः भक्त्या प्रीतोऽस्मि ते नृप ।
ईदृशं कर्म कः कुर्यात्त्वमेवेह महीतले ।। २६ ।।

अज्ञाता ह्यपराधस्य महादण्डस्त्वया कृतः ।
राजन् प्रीतो।स्मि ते पत्नी सम्पूर्णावयवा भवेत् ।। २७ ।।

प्राज्यं राज्यं प्रशाधि त्वं समेधितमनामयः ।
पुरस्कृतः पुत्रपौत्रैर्भुङ्क्ष्व भोगान् भुवःस्थले ।। २८ ।।

अन्ते यास्यसि मल्लोकं विलसद्भक्तिभावतः ।
भूयो विवेश भूतेशो निजमेव निवेशनम् ।। २९ ।।

गिरा हर हरेत्युच्चैरूचुः प्राञ्जलयो जनाः[1] ।
ववर्षुः पुष्पवर्षाणि हर्षवन्तः सुरा अपि ।। ३० ।।

भूपालः स्वपुरं प्राप्य स्थापयित्वा शिवालयम् ।
स्थेयसीं शिवमुद्रां च सर्वामुर्वीं शशास सः ।। ३१ ।।

तत्र सङ्कर्षिरित्यासीत्पार्थिवो भानुवंशजः ।
राजा प्रजारञ्जकोऽसौ निर्जित्य निखिलान्नृपान् ।। ३२ ।।

धराधुरममात्येषु निक्षिप्य निभृतोऽभवत् ।
स राजा शिवपादाब्जदास्यकैङ्कर्यमोदभूः ।। ३३ ।।

सभेशस्य सभां चक्रे काञ्चनीमरिचक्रजित् ।
शिवभक्तपदाब्जार्चां कृत्वा नत्वावसन्नृपः ।। ३४ ।।

सोमावतंसधामानि चक्रे हेममयानि सः ।
महापचितियुक्तानि महोत्सवयुतानि सः ।। ३५ ।।

शिवभक्तोऽभवद्भक्तभोजनार्थे कृतादरः ।
क्षुत्क्षामपीडिते काले धान्याष्टादशवर्जिते ।। ३६ ।।

अयमत्यन्तदौर्गत्याद्गत्यन्तरमदृष्टवान् ।
शिवभक्तेषु भक्तार्थं धैर्यधीर्मुदिताशयः ।। ३७ ।।

रात्रौ राज्ञो धान्यकूटं भित्वा धान्यमचूचुरत् ।
एवं संवत्सरं तत्र भक्तभोजनमाचरत् ।। ३८ ।।

दृष्टो गृहीतस्तत्पालैर्द्रुतं राज्ञे निवेदितः ।
ताडितः पीडितोऽत्यन्तं कशाभिः शोकदायिभिः ।। ३९ ।।

---

1. गिरा हर हरेत्युच्चैरुदस्थुर्हर्षजाः स्वनाः ।

किं त्वयाद्यकृतं मुढ गूढचौर्यमिदं कृतम् ।
चिकीर्षितं ते वद मां निर्व्यलीकेन चेतसा ।। ४० ।।

इत्युक्तः स नृपेणैव तदा प्राह मुदा द्विजः ।
क्षुत्क्षामार्तान् जनान् क्षामे भोक्तुं भक्तान् शिवस्य हि ।। ४१

मया महेश्वरप्रीत्यै गत्यभावादिदं कृतम् ।
नृपस्तस्य निशम्योक्तिं उत्क्रान्तमुदिताशयः ।। ४२ ।।

उवाच विभवं सर्वं भक्तसात्कुरु मे द्विज ।
इत्युक्तमात्रे नृपतौ कोशवृद्धिर्बभूव ह ।। ४३ ।।

शिवाज्ञया मुदा राज्ञो दत्तभक्त धनस्य हि ।। ४४ ।।

एवं सदैवेश्वरकिङ्करेभ्यो
विश्राण्य सर्वं विभवं वरेण्यः ।
विचिन्त्य शम्भुं भुवि भुक्तभोगः
पदं स लेभे परमेश्वरस्य ।। ४५ ।।

नासीरभञ्जन इति प्रथितो धरण्याम्
पराक्रमख्यापितसर्वरत्नः ।
सम्प्रीणयन् गिरीशधामसुभक्तवृन्दं
कैलासशैलनिलयं सुलभं प्रपेदे ।। ४६ ।।

स पादसिह्मः परनागसिह्मो
भोगाननेकाननुभूय भूमौ ।
असेवतान्ते परिपूर्णकामः
कैलासशैले शिवपादजाले ।। ४७ ।।

।। इति श्रीशिवरहस्ये नवमांशे चतुष्षष्टितमोऽध्ययः ।।

।। पञ्चषष्टितमोऽध्यायः ।।

स्कन्द उवाच -

रणवीरोऽभवन्नाम्ना शिवद्विजकुलोद्भवः ।
कोऽप्यासीत्कीर्तिमित्राख्यः कल्याणगुणभूषणः ।। १ ।।

पूर्वजन्मकृतैः पुण्यैर्भक्तिमान् परमेश्वरे ।
शिवभृत्यैकधीः सोऽपि त्यक्तसंसारवासनः ।। २ ।।

निद्रातन्द्रादिमुद्रां तां विद्राव्य [1]द्रापिसेवकः ।
स्नानार्थं देवदेवस्य कुम्भोदकमुदावहत् ।। ३ ।।

एवं सम्पूजयामास कुम्भधाराघटस्रवैः ।
घटं सो(वो)ढुमशक्तोऽसौ क्षुधाक्षीणवपुर्बलः ।। ४ ।।

भवानीपदपादाब्जे पपात प्रपतद्घटः ।
देवेशमायया मुह्यन्निविष्टोऽभूत्स निद्रया ।। ५ ।।

प्रसन्नस्तत्क्षणे स्वप्ने प्राहैनं पार्वतीपतिः ।

शिवः उवाच -

यावद्दुर्भिक्षकालान्तं तावद्धेमकृतं घटम् ।। ६ ।।

ददामि पादपीठात्ते क्रीत्वा तेनैव धान्यकम् ।
तेनैव त्वं बली भूत्वा उदकुम्भं दधस्व (?) मे ।। ७ ।।

प्रबुद्ध उत्थितो दृष्ट्वा पीठेटङ्कं[2] हिरण्मयम् ।
कीर्तिमित्रः क्षुधार्तोऽपि प्राप्तमूर्तिरभूत्तदा ।। ८ ।।

सदाशिवार्चनरतः कुम्भधाराग्रतः सदा ।
प्रकाशयामि प्रथितं वीरशार्दूलवैभवम् ।। ९ ।।

---

1. द्रापि - Lord Siva. 2. टंक - coin.

प्रकाशे चोलदेशेऽस्मिन् नाम्ना नागपुरं परम् ।
तत्र शूद्रकुलोत्पन्नोवीरशार्दूल इत्यभूत् ।। १० ।।

स चोलेन्द्रमहीपाल तन्त्रपालः सुशीलवान् ।
पराजित्य परान् युद्धे राज्ञां सम्पदमावहन् ।। ११ ।।

भवानीरमणे भक्तिं भावनापरिपूरिताम् ।
त्यक्तदेवान्तरो देवं भजन् भुजगभूषणम् ।। १२ ।।

पुरारिभोगपूजाभिर्बह्वीभिः परिवर्तते ।
शर्वालयेषु सर्वेषु शिवधर्मानकारयत् ।। १३ ।।

स वीरो वीरशार्दूलो नृपेणाजौ नियोजितः ।
जित्वा रिपून् प्रतिष्ठाप्य शिवलिङ्गान्यनेकशः ।। १४ ।।

बालेन्दुमौलेः पूजार्थं शालिकूटाः सहस्रशः ।
सम्पादिता मयैतेषु मा यूयं कुरुत व्ययम् ।। १५ ।।

यः करोति व्ययं तेषु सदा दण्ड्यः स निर्दयम् ।
इत्युक्त्वा वीरशार्दूलः प्रतस्थे मर्दितुं परान् ।। १६ ।।

अनागते चिरं तस्मिन् काले दुर्भिक्षभक्षिते ।
ते क्षुधाभक्षिताश्चासन् वीरशार्दूलबान्धवाः ।। १७ ।।

स्थितेषु शालिकूटेषु क्षुधया किं म्रियामहे ।
इति निश्चित्य ते सर्वे विभिद्यैतद्व्ययं व्यधुः ।। १८ ।।

वीरः स वीरशार्दूलो विजित्य विमतान् रणे ।
प्रत्याययौ बान्धवान् स्वान् मोदमानमनास्तदा ।। १९ ।।

तेषां ज्ञात्वा शिवद्रोहमजानन्निव विस्मितः ।
अद्य वो द्रविणं दद्यां यूयमायात बान्धवाः ।। २० ।।

इत्यनैषीत्स तान् बन्धून् येनाद्य पुरवासिनः ।
दातुं द्रव्याणि चोद्युक्तो बान्धवान् गृहमागतान् ।। २१ ।।

युष्माभिः शिवपूजार्थं [1]शालिकूटव्ययः कृतः ।
अतः कृतशिवद्रोहान् कोशादाकृष्य चायुधम् ।। २२ ।।

पितृभ्रातृपितृव्यादीन् बान्धवानच्छिनद्रुषा ।
स देव भावनाबद्धो (बान्धवान्) बन्धुच्छेदं न केवलम् ।।

संसारबन्धच्छेदं च शिवाचारं चकार सः ।
स्तनन्धयं काचिदस्य कुलालाकारतां गतम् ।। २४ ।।

संरक्ष्यतामिति सुतं विधवा तत्करे ददौ ।
अयं न गिरिशायार्हः पुष्टमातुः स्तनन्धयः ।। २५ ।।

इति तं वीलशार्दूलः खड्गेनाखण्डयद् द्विधा ।। २६ ।।

तत्कर्म दृष्ट्वा तरुणेन्दुमौलिः
प्रादुर्बभूवास्य पुरः पुरारिः ।
दृष्ट्वाभितुष्टाव शिवं प्रहृष्टो
निष्ठावता निर्मलचेतसा हरम् ।। २७ ।।

हर हर दुरितानि दीनबन्धो
कुरु मम बन्धविमोचनं भवाद्य ।

---

1. शिवपूजार्थमिति सुरक्षितः धान्यकूटः युष्माभिः व्ययितः इति केवलमुक्त्वा ततः तान् कोशाकृष्टेन आयुधेन अच्छिनत् ।

परिहर संसृतिभारमुग्रखेदं
गुरुगरलाशन देव देव पाहि ।। २८ ।।

इत्थं तद्भक्तितुष्टः प्रभुरवददहो भक्त तुष्टोऽस्मि भक्त्या
तव सकलजनास्ते जीविताः सन्तु लोके ।
भोगांश्च भुक्त्वा चिरमेहि मे पदं
संसेव्यमानं गणवृन्दवर्यैः ।। २९ ।।

स तेन नीत्वा गिरिशार्पितेन
कालं च तं काञ्चनटङ्ककेन ।
विटङ्कनाथस्य सपर्यया गतः
स भक्तवर्यः (ययौ स भक्तः) पदमिन्दुमौलेः ।। ३०

कीर्तिमित्रचरिते कृतचेताः
कीर्तिदायिनि सुकर्मपरो यः ।
आर्तिमप्यभिविजित्य भवाप्तां
वर्तते स शिवधाम सीमगः ।। ३१ ।।

स्कन्दः (उवाच)

भक्ताः सर्वे शिवं ध्यात्वा कलावेवं भवन्ति हि ।
शिवभक्तान् समुद्वीक्ष्य शिवभावानुचिन्तकान् ।। ३२ ।।

नीचा अपि शिवे भक्ता भवन्त्येवं हि शैलजे ।
कर्मणा मनसा वाचा सर्वभावेन शङ्करम् ।। ३३ ।।

ये प्रपन्ना महादेवं ते भवन्ति गणेश्वराः ।
चरणं करुणाम्भोधेर्मम ये शरणं गताः ।। ३४ ।।

नैवाप्तजननास्तेऽमी परिच्छेद्याः कथं परैः ।
लोकानालोकयन्तोऽपि निलयाय लयं मम ।। ३५ ।।

निःसीम महिमानस्ते वर्णनीयाः कथं परैः ।
स्मरन्ति च स्मराराते: सदा पदसरोरुहम् ।। ३६ ।।

मत्स्तुतौ गद्गदतरहर्षबाष्पपरिप्लुताः ।
नेत्राम्बुनिर्झरासेक पुलकाङ्कुरभूषणाः ।। ३७ ।।

नादान्तरूपे हृदयाम्बुजस्थे
शिवे परञ्ज्योतिषि चिन्त्यरूपे ।
विन्यस्य चित्तं विरतान्यकामा
कामारिधामैकगता भवन्ति ।। ३८ ।।

विन्यस्यतां चित्तमुमासहाये
ये भक्तमाहात्म्यमिदं महार्थम् ।
दधन्ति (?) चित्ते सततं नरो यः
परात्परं शैवपदं प्रपद्यते ।। ३९ ।

त्रिषष्टिभक्ताः शिपिविष्टनिष्ठाः
कनिष्ठवर्णा अपि ते विशिष्टाः ।
इष्टः शिवस्याब्जपदैकभक्ति-
निष्ठा हि कष्टानपि नाशयन्ति ।। ४० ।।

चण्डालः श्वपचोऽस्तु वा गिरिसुते विप्रोऽपि वा वेदवित्
मद्भक्त्या भुवने वनेऽपि निवसन् भूयाच्छिवे पावनः ।
तस्मै तां वितरामि मुक्तिपदवीं नाचारजातिस्पृहा
नो शीलं न कुलं तदीयमगजे पश्यामि भक्त्याहृतः ।। ४१

योवीतमन्युः सनकादिमान्यो
बालोपमन्युर्मम शैलकन्ये ।
मद्भक्तमान्यं चरितं कलौ युगे
विस्तारयेद्वै शतमन्युहर्षदम् ।। ४२ ।।

सङ्गृह्य तत्सूत्रतयोक्तमेत-
न्मद्भक्तमाहात्म्यमिदं तवेशि ।
भक्तिप्रभावं कलिकालमर्त्ये-
ष्वपीदमेतन्न हि जातिवर्णाः ।। ४३ ।।

संसाराब्धौ विषमविषयागाधबाधैकगर्ते
जन्मावृत्त्यैव मर्त्या मरणभयमहावात्यया शुष्कपर्णाः ।
व्यावृत्तेव प्रभवति शिवे मानवा भारतेऽस्मिन्
कामक्रोधाभिलोभोन्मदमृदितमहानक्रवक्त्रान्तराले ।। ४४ ।।

नवग्रहावग्रहविग्रहार्ति-
जन्यं भयं नैव शिवेऽद्रिकन्ये ।
मामुग्रमीशं शरणं प्रपन्ना
नैवेन्द्रियग्रामपरा भवन्ति ।। ४५ ।।

स्कन्दः उवाच

सदाशिवाख्यः शशिशेखरोदितो
देव्यै मुनेऽम्शो नवमोऽयमेव ।
श्रुत्वा सदाशिवमयो भवतीह विप्रः
स्वर्भानुमुक्त इव शीतगुकान्तितुल्यः ।। ४६ ।।

भक्तानामथभक्तिभावजनुषां भक्तिप्रभावप्रथां
लोकानां कलिकालनिर्णयविधिः श्रीकालकालार्चनम् ।
अस्मिन्नेव शिवेन पर्वतमहापुत्र्यै सवित्र्यै मम
विस्तारेण सदाशिवाश्रयकथा प्रोक्ता श्रुता मुक्तिदा ।।

श्रोतृणामिदमेव मङ्गलमहाशैवं रहस्यं मुने ।
अंशद्वादशमण्डितं श्रुतिमहावाक्यार्थसारोत्तरं
पुण्यं वर्ण्यपदैक पूर्णमगजाकान्ताङ्घ्रिभक्तिप्रदं
तूर्णं स्वस्त्ययनाय कर्णसरसामोदायभूयाद्धि ते ।।

इत्थं स्कन्दसुनन्दितोरुवचसा वन्दारवृन्दैर्गणैः
सानन्दाश्रुविलोचनोऽथ स मुनिः श्रुत्वाभिनन्दञ्छिरः ।
ब्रह्मानन्दरसोत्तरोरु सुहृदा दध्यौ पदं शाम्भवं
धन्योऽस्मीति वदन् मुदा गिरिभवाजातं प्रणम्याह हि ।।

।। इति श्रीशिवरहस्ये नवमांशे पञ्चषष्टितमोऽध्ययः ।।

।। श्रीसाम्बसदाशिवार्पणमस्तु ।।

AN APPEAL

Manuscripts on Palmleaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S. S. M. Library, Thanjavur.

The Manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars for study and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar King of Tanjore, **Rajah Serfoji,** has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world famous **"Sarasvati Mahal Library".** It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DISTRICT COLLECTOR AND DIRECTOR
Sarasvati Mahal Library,
Thanjavur.


சரசுவதி மகால் நூலக அச்சகம்